॥गादा धर्यंचतुर्दशलक्ष्णीप्रारंभः॥

श्रीगणाधिपतयेनमः॥ ॥ननुव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपिव्यभिचाराभावरूपव्याप्तौसाध्यता
वच्छेदकावच्छिन्नसाध्याभावस्यघटकतयाप्रसिद्धिनिबंधनाव्याप्तेर्दुवारतयैववादिनोनिवृत्तेः।अधिकरणधर्मव
च्छिन्नाभावखंडनपरग्रंथानुपपत्तिरतस्तादृशग्रंथमवतारयति।ननिरुक्तादिना।पारिभाषिकमितितांत्रिकसंकेतरू
पपरिभाषयाव्याप्तिप्रतिपादकंननुयोगेनेत्यर्थः।अव्यभिचरितत्वंअव्यभिचरितत्वपदंअथवापारिभाषिक
मव्यभिचरितत्वंपरिभाषयाऽव्यभिचरितत्वपदप्रतिपाद्यंव्याप्यत्वमितिशेषः।ननुयोगेनतत्पदलभ्यमित्यर्थः।
तथाचव्यभिचारघटकस्यसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्यव्याप्तिघटकत्वविरहेपिनक्षतिरितिभावः
शंकते।यत्पदंयधर्मावच्छिन्नपरं अग्रेतत्पदंतधर्मावच्छिन्नपरंसचधर्मोहेतुतावच्छेदकधूमत्वादिःसधेनु
स्थलेहेतुतावच्छेदकावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकत्वादिविशेषणाक्रांतोव्यधिकरणधर्मावच्
छिन्नप्रतियोगिताकोघटत्वादिनावन्ह्याद्यभावादिरेवतस्यचप्रतियोगिसामानाधिकरण्यमावश्यकमिति
लक्षणसमन्वयःव्यभिचारिणिव्यभिचारिनिरूपकाधिकरणीभूतहेत्वधिकरणेसाध्यतावच्छेदकत्वादिविशे

षणान्तः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावादिरपि तस्यच प्रतियोगिसामानाधिकरण्याभावा
नूतादृशाभावस्य प्रतियोग्यधिकरणैकालिकसंबंधेनवृत्तावपि विवक्षणीयत्वविशिष्यावधेत्वधिकरणांतर्भा
वेणप्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः अयमात्माज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्न
प्रतियोगिताकसाध्याभावादिकंमादायाव्याप्तिर्वारणीयहेतुनावच्छेदकविशिष्टसामानाधिकरण्यमभावविशे
षणं अभावस्यवृत्तौसंबंधभेदानिवेशेनवन्हिमान्धूमादित्यादौवन्हित्वादिनावच्छिन्नाभावस्यप्रतियोगिमतिपर्वता
दौकालिकसंबंधेनवृत्तेर्लक्षणसंभवान्नतत्राव्याप्तिवारणांतफलमितिध्येयं। अयमात्मापृथिव्याद्यन्यतेसति
द्रव्यत्वादित्यादौद्रव्यत्वसमानाधिकरणसत्वाद्यवच्छिन्नात्मत्वाद्यभावानांप्रतियोगिसामानाधिकरण्यविर
हादव्याप्तिरतोहेतुसामानाधिकरण्यघटकहेतोहेतुतावच्छेदकवैशिष्यनिवेशः यद्यप्ययमात्माज्ञानादित्यादौ
समानाधिकरणधर्मावच्छिन्नाभावमादायाव्याप्तिरभावसाध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यवि
शेषणानापिवारयितुंशक्यधूमवान्वन्हेरित्यादेर्धूमादिसमानाधिकरणसतादृशाभावस्यप्रतियोगिसामा

नाधिकरण्यावश्यकत्वेपिस्वविशिष्टयावधेयवधिकरणंतर्भावेणप्रतियोगिसामानाधिकरण्यस्येवविवक्षणीय
तयाऽयोगोलोकांतर्भावेणतादृग्गभावस्यातथात्वान्नातिव्याप्तिः स्वविशिष्टहेत्वधिकरणेसन्नयंसदनेवहेतो
रुपादेयतयातत्वमियन्नतत्सदनतस्यैवपरामर्शगोचरत्वाद्धेतुनिष्ठत्वोपपत्तिरिति। तथापिकपिसंयोगाभाव
वान्जातित्वादियादौसाध्यसमानाधिकरण्यस्यकपिसंयोगाद्यासकाभावस्यस्वविशिष्टहेत्वधिकरणग्रसि
ध्यासत्तावानासत्वादियादौसत्ताधिकरणकालेकालिकसंबंधेनविद्यमानस्यसत्ताभावस्यतदप्रसिध्याव्या
सिर्दुवारैवेतिहेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तंयत्तु अयमात्माज्ञानादियादौआत्मत्वा
दिनाआत्मत्वादेरभावस्यलक्षणघटकत्वेपिनाव्याप्तिःतस्यप्रतियोग्यधिकरणीभूतात्मादावेकज्ञानविष
यत्वस्वाश्रयाश्रयत्वादिरूपपरंपरासंबंधेनवर्तमानतयाप्रतियोगिसमानाधिकरण्यादितिसामानाधि
करण्यांतविशेषणमनर्थकमिति। तन्नात्मैकज्ञानविषयत्वादिनाविशिष्टबुद्धेप्रमाणाभावेननतेषांसंसर्गत्वा
भावात्। नचैवंयदभावोव्यभिचारविरोधीतदुपाधिलक्षणेदंहोपाधिर्नहोपाधिरितिप्रतीतिव्यवहारानु

रोधेनाव्याप्यत्वस्य संबंधतायाग्रंथकृतैवस्वीकृतत्वात्।तेन संबंधेनैवात्मवृत्तेरात्मत्वाभावस्यप्रतियोगिसा
मानाधिकरण्यमक्षतमेवेतिवाच्यं।अव्याप्यतायाःसंबंधतायांविवादेनयद्भावपदस्ययद्व्याप्यत्वाद्यभाव
परतामभ्युपगम्यापिग्रंथकृतातादृशलक्षणव्याख्यानात्तत्संबंधतायाअप्रामाणिकत्वाभिप्रायेणैवान्वयस
मानाधिकरण्यदुरुपपादनात्। यावत्पदासत्वेसाध्यतावच्छेदकेसादिविशेषणस्यव्यावृत्तिर्नसंगच्छतेयत्किं
चिद्भावमादायैवलक्षणसमन्वयसंभवादतश्चरमोक्तस्यापितयदस्यव्यावृत्तिंप्रथमतोदर्शयति।सर्वत्रे
ति। तथात्वात्प्रतियोगिसामानाधिकरण्यात्।तथाच।यावत्पदादानेव्यभिचारिमात्रएवाव्याप्तिरिति
भावः।यद्यपिव्यभिचारिस्थलएवदोषस्यकथनीयतयासर्वत्रतादृशभावस्यतथात्वकथनमसंगतं
तथापियावत्पदानुपादानेऽतिव्याप्तिरेवनाव्याप्तिरितिएतत्सूचनायसर्वत्रेत्युक्तं।अथवासर्वत्र।स
र्वाधिकरणावच्छेदेन।तथात्व।विवक्षणीयस्यस्वविशिष्टयावधेयाधिकरणगतभावीयप्रतियोगिसा
मानाधिकरण्यस्यसत्वंसत्वंननुयावत्पदादानेसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्र

तियोगिताकत्वंपरित्यज्यसाध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावोविशेषणीयः। तव्याप्यत्वंचाव
व्यापकतत्कत्वमतोनानवस्थावन्हिमान्धूमादित्यादौतत्तद्वन्ह्याद्यभावानांसाध्यतावच्छेदकव्याप्यप्रति
योगिताकानांयथाविवक्षणीयसामानाधिकरण्यविरहेपिघटत्वादिनावन्ह्याद्यभावमादायैवलक्षणसंग
तिः। इत्थंचधूमवान्वह्नेरित्यादावाद्यभावमादायनातिव्याप्तिसंभवःतस्यधूमताद्यव्याप्यप्रतियो
गिताकत्वेनलक्षणघटकत्वविरहात्। एवंसतिहेतुसमानाधिकरणत्वविशेषणमनर्थकमितिचेत्। तद
पितर्हित्यज्यतमिस्यांकापरिहारायतथाविधाभावनिवेशोपियत्रावच्छेदकव्याप्तिस्तत्रयावत्पदस्यव्यावृत्तिमा
ह। अतएवेति। अतएवयावत्पदोपादानादेव। द्वित्वावच्छिन्नाभावस्य। भूतत्वभूर्तत्वोभयत्वावच्छिन्नाभाव
स्य। प्रतियोगिसामानाधिकरण्येपि। मनसिहेत्वधिकरणेमूर्तत्वरूपप्रतियोगिसामानाधिकरण्येपि। तथा
चयावत्पदानुपादानेसाध्यतावच्छेदकव्याप्यप्रतियोगितादृशाभावस्यैवप्रतियोगिसमाना
धिकरणतयातिव्याप्तिःस्यादितिभावः। यावत्पदसत्वेयादृशाभावमादायातिव्याप्तिवारणंतादृशाभावंद

त्ति

र्शयति। भूतत्वमनोन्यत्वाद्यभावस्येति। भूतत्वाभावस्यमनोन्यत्वाभावस्यचेयर्थः। अतथात्वात्। प्रतियोग्यस
मानाधिकरणत्वात्। यावत्पदस्तेसाध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशनेवन्हिमान्धूमादित्यादौ
तादृशयावदंतर्गतमहानसीयवन्द्वाद्यभावमादायेवाव्याप्तिःस्यादितियथोक्तविशेषणस्यैवोपादेयतयाना
दृशाभावयोरपिलक्षणघटत्वादितिभावः। भूतत्वस्यबहिरिंद्रियग्राह्यविशेषगुणत्वकतयाप्रतियोगिस्वरूपा
णांतन्निष्ठप्रतियोगितानांचालनीयन्यायेनोत्पत्तिकालावच्छेदेनवासाध्यवन्निष्ठाभावप्रतियोगितावच्छे
दकतयाभूतत्वाभावस्यनसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमितिसाशंक्येनारवं
ड्याप्यवृत्तिमनोन्यत्वाभावानुधावनं। उक्तरीत्यातत्रैवेयादिग्रंथावतारात्रथमतोवाच्यताभावमादायस
र्वत्रैवव्यभिचारिण्यतिव्याप्तेर्दर्शितत्वात्साध्याभावमादायव्यभिचारिविशेषेतिव्याप्तिप्रदर्शनंसंदर्भविरु
धमितिसाशंकानवकाशः। कचित्तुयावत्पदानुपादानेवाच्यतादरुदासीनपदार्थस्याभावमादायव्यभिचा
रितासामान्येऽतिव्याप्तिर्विश्राम्यतु। साध्याभावमादायक्वचिदतिव्याप्तिःस्यात्सार्वयावत्पदोपादानान्नभव

तीयभिप्रायकतयानसंदर्भविरस्थमित्याहुः। परेतु। ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगीताकयावद्
भावनिवेशेनैवाप्यपत्तेः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावद्भावनिवेशनम
फलंतादृशप्रतियोगिताकत्वविशेषण[illegible]व्यावर्तनीयस्यतत्तद्धर्म्याद्यभावस्यवह्नित्वव्यापकप्रतियोगिताक
त्वाभावेनोक्तविशेषणेनापिव्यावर्तनसंभवादतआह। अतएवेति। यत्तत्वसाध्यतावच्छेदकावच्छिन्नव्या
पकतावच्छेदकप्रतियोगिताकाभावयावत्वमुपात्तं। ननुसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावेतए
वेयर्थंभूतत्वेति। साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेभूतत्वमूर्तत्वोभयवान्मूर्तत्वा
दित्यादौभूतत्वाभावमनोन्यत्वाभावप्रतियोगितयोरुभयत्वाव्यापकत्वेनोभयत्वावच्छिन्नप्रतियोगिता
काभावादेरवलक्षणघटकतयातिव्याप्तिः स्यात्यथोक्तविशेषणाक्रांताभावनिवेशेचभूतत्वमनोन्यत्वा
भावानामपिलक्षणघटकतयानातिव्याप्तिरितिभावः। नचसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभा
वनिवेशेपिहेतुसमानाधिकरणस्यमनोभिन्नभेदस्यप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसामानाधि

करण्यविरहान्नातिव्याप्तिः।साध्यतावच्छेदकावच्छिन्नव्यापकतायालक्षणनिवेशेनादृशव्यापकताघटकसंबं
धेनप्रतियोगिसामानाधिकरण्यनिवेशसंभवात्प्रतियोगितावच्छेदकसंबंधेनवर्त्तमानसामानाधिकरण्यस्यवि
वक्षणीयत्वादितिवाच्यं। प्रतियोगितावच्छेदकसंबंधेनतत्सामानाधिकरण्यनिवेशेपिवन्हिमान् धूमादित्या
दौहेतुसमानाधिकरणस्यवन्हित्वव्यापकप्रतियोगितावच्छेदकसंबंधेनप्रति
योगिसामानाधिकरण्यंपर्वतांतर्भावेणनास्तीत्यव्याप्त्यातेनसंबंधेनप्रतियोगिसामा नाधिकरण्यस्य
निवेशसंभवात्साध्यतावच्छेदकसंबंधेनैवप्रतियोगिसामानाधिकरण्यमंगत्यावाच्यं। तथाचमनोभिन्न
भेदस्यतेनसंबंधेनमूर्त्तत्वादिरूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तिःसाध्यतावच्छेदक
संबंधेनप्रतियोगिसामानाधिकरण्यनिवेशेवक्ष्यमाणस्थलांतरेप्यतिव्याप्तिःस्यादितितुनास्माकंदोष
इत्यभिप्रायइतिव्याचक्षुः।तत्तुनसमीचीनतयाप्रतिभाति।साध्यतावच्छेदकेत्यादिविशेषणव्यावृत्तेःप
श्चाद्वक्ष्यमाणतयातदुत्तरमेवसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणमस्थलेसाध्यतावच्छेदकव्यापकप्र

किं

तियोगिताकत्वविशेषणं नोपात्तमित्याकांक्षोदयादादावव्याप्तादृशविशेषणपरित्यागबीजकथनस्यासंगत
त्वादितिगगत्वाभावस्यतिप्रतियोग्यसमानाधिकरणत्वादित्यर्थकेनातथात्वादित्यनेनान्वयः।तथाचसाध्यता
वच्छेदकस्याद्यनुपादानेऽसंभवइतिभावः।यद्यपिगगत्वाभावादेरपिपूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रति
योगिसामानाधिकरण्यंपर्वतादावप्यस्तितथापिव्यापकतायालक्षणघटकत्वभावरूपप्रतियोगिसामाना
धिकरण्यंधूमवान्वह्नेरित्यादौधूमाभावादौपूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामाना
धिकरण्यमादायातिव्याप्तिर्वारणायावश्यंविवक्षणीयंतथाचायमसंभवइतिभावःसाध्यप्रतियोगिकाऽ
भावनिवेशेपिगगत्वाद्यभावमादायासंभववारणसंभवात्तत्तत्साध्यव्यक्त्यभावस्येतिअस्यवनानाव्यक्ति
कइत्यादिःतथावसाध्याभावनिवेशेपिवन्हिमान्धूमादिमादावव्याप्तिःस्यादितिभावःसाध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकत्वंचसाध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वगुण
कर्मान्यत्वविशिष्टसत्तावान्जातेरित्यादौविशिष्टसत्ताव्यापकतावच्छेदिकायाअपिद्रव्यत्वाद्यभावप्रतियोगि

तायानसाध्यवल्लिष्टभावप्रतियोगितानवच्छेदकत्वंसत्तावतिगुणेदोतादृशप्रतियोगितावच्छिन्नाभावसत्वा
दत्तोविशिष्टसत्ताद्यभावएवलक्षणघटकःतस्यचगुणेदोसत्तादिरूपप्रतियोगिसमानाधिकरणत्वाद
तिव्याप्तिरजःसाध्यतावच्छेदकावच्छिन्नवोपादानंतथाचसतिद्रव्यत्वाभावप्रतियोगितायाअपिविशिष्टस
त्तावाद्यवच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतयातादृशभावानांचगुणेदावतथात्वान्नातिव्याप्तिः
यत्किंचिद्रूपावच्छिन्नसाध्यवत्तानिवेशेचसत्तावानूजातेरित्यादौविशिष्टसत्ताव्यापकतावच्छेदकप्रतियो
गितादव्यत्वाद्यभावादिकमादायाव्याप्तिर्बोध्यासाध्यवत्वंसाध्यतावच्छेदकसंबंधेनबोध्यं। अन्यथा
धूमवान्वह्नेरित्यादौधूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाःकालिकविशेषणतयाविषयिता
दिसंबंधेनधूमादिमतिकालेज्ञानादौचसंयोगादि संबंधेनस्वावच्छिन्नाभावसत्वात्नकापिसं
बंधेननव्याप्यकतावच्छेदकवमितिकेवलान्वयिवाच्यत्वादिनिष्ठप्रतियोगितेवस्वरूपादिसंबंधघटितव्या
प्यकतावच्छेदकस्यादियतिव्याप्तिःनचसंबंधसामान्येनधूमादिमन्निष्ठायोभावस्तदीयविषयितासंबंधा

वच्छिन्नप्रतियोगितानवच्छेदिकायाप्रमानिष्ठप्रतियोगितानिरूपकप्रमाभावस्यचनविवक्षणीयसाध्यतावच्छेद
कसंबंधेनसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्संबंधेनस्वविशिष्टयाव
धेत्वधिकरणप्रतियोगिसामानाधिकरण्यंसाध्यतावच्छेदकसंयोगादिसंबंधावच्छिन्नसाध्यनिष्ठव्याप्यतानि
रूपितस्वप्रतियोगिनिष्ठव्यापकतायांसंयोगादिसंबंधावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासंबं
धस्यापिघटकतयातेनसंबंधेनायोगोलकादौप्रतियोगिनासत्वादितिवाच्यंयतोविषयतायाविषयतात्वेने
वसंबंधताप्रामाणिकीनतुतथाविधविशेष्यतात्वेनेतिपरंत्वेतादृशदिग्गसमवायेनज्ञानादिसाध्यकद्र
व्यत्वादिहेतावेवातिव्याप्तिवारणंसंभवतितल्लज्ञानाभावस्यसंबंधसामान्येनसाध्यनिष्ठव्याप्यतानिरू पि
तविषयितासंबंधघटितव्यापकतानवच्छेदकप्रतियोगितांकस्यसाध्यतावच्छेदकसंबंधेनसाध्यनिष्ठव्या
प्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्संबंधांतर्गतसमवायेनघटादौप्रतियोगिसामा
नाधिकरण्यविरहादिति। नचसंबंधसामान्येनधूमादिमन्निष्ठायोगावस्तदीयसंबंधसामान्यावच्छिन्नप्र

प्रतियोगितायांधूमाद्यभावीयसंबंधसामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकंसंयोगत्वावच्छिन्नसंयोगादि
संबंधेनधूमादेर्धूमादिमत्यभावसत्वेपिसंबंधत्वरूपव्यापकधर्मावच्छिन्नसंयोगादिसंबंधावच्छिन्नप्रतियोगिता
कतदभावासत्वात्। तथाचधूमाद्यभावस्यापिलक्षणघटकतयातस्यचसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्य
निष्ठव्याप्यतानिरूपितस्वप्रतियोगितावच्छिन्नव्यापकताघटकसंयोगत्वाद्यवच्छिन्नसंयोगादिसंबंधेनप्रतियोगि
सामानाधिकरण्यविरहान्नातिव्याप्तिरितिवाच्यंसंबंधत्वेनसंबंधानामभावप्रतियोगितावच्छेदकसंबंधत्वेऽ
मानाभावात्तेनरूपेणसंबंधानांव्यापकताघटकत्वासंभवात्। वस्तुतस्तत्प्रतियोगिसामानाधिकरण्यशरी
रेव्यापकतायाःस्वातंत्र्येणनिवेशस्यप्रतिक्षेप्यत्वात्तानवान्द्रव्यत्वादिसादावतिव्याप्तिरबाधतिध्येयं।वस्तु
तस्तुसंयोगसमवायादिसाधारणानुगतसंबंधत्वस्यकथंचित्तत्वेपितेनरूपेणसंयोगादीनांसंबंध
तयाभानस्यनिर्युक्तिकतयाव्यापकताशरीरेलाघवानुरोधात्साध्यप्रकारेणअधिकरणस्यभानेःसाध्यसंबं
धोपिविशिष्यसंसर्गतयानिवेश्यः।तथाचविशिष्यसाध्यतावच्छेदकसंबंधनिवेशनमावश्यकंयत्किंचित्संबं

धेनसाध्यवत्तायाव्यापकतावच्छेदकत्वेतुवन्हिमान् धूमादित्यादौविषयितासंबंधेनसाध्यंप्रतिगुणत्वाद्यभावप्रति
योगितायाअपिव्यापकतावच्छेदकतयातादृशभावस्यलक्षणघटकत्वेतस्यचपर्वतादौप्रतियोगिसामानाधि
करण्यविरहादसंभवोबोध्यः। साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशेसर्वस्यैवसाध्यवन्निष्ठद्वि
त्वाद्यवच्छिन्नाभावप्रतियोगितयातादृशभावाप्रतियोगिनोप्रसिद्धिरित्यतावच्छेदकगर्भतातादृशप्रतियो
गितानवच्छेदकत्वंचतादृशप्रतियोगितायांसमानाधिकरणंसद्यद्यदवच्छेदकंतत्तदन्यत्वं। अन्यथाव्यतिरेकि
प्रतियोगितामात्रस्यैवव्यधिकरणतयासाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतयाविरुद्धघटत्वपटत्वोभ
याद्यवच्छिन्नप्रयोगिताकप्रमेयसामान्याभावस्यैवलक्षणघटत्वेनव्यभिचारित्वप्रसंगात्। यत्तुसाध्यता
वच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्याप
कप्रतियोगिकत्वनिवेशेनैवसर्वसामंजस्येनिरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलंच
न्हिमान् धूमादित्यादौघटत्वादिनावन्ह्याद्यभावप्रतियोगिनांवन्ह्यादीनांचालनीयत्वान्नसाध्यवन्निष्ठ

भेदप्रतियोगितावच्छेदकत्वेपि घटत्वादिनाऽ[illegible]द्रव्यत्वाद्यभावमादायेवलक्षणसमन्व
यसंभवात्व्यभिचारिणिव्यभिचारनिरूपकाधिकरणभेदाभावमादायेवातिव्याप्तिवारणसंभवाच्च।नन्वसाध्य
वन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षयातादृशविशेषणस्यनलघुशरीरतेतिवाच्यं।व्या
पकतावच्छेदकताघटकाभावप्रतियोगितावच्छेदकतायांस्वरूपसंबंधावच्छिन्नतत्स्याधिकस्यनिवेशनीयतया
एतन्मतेततदनिवेशेनलाघवात्तन्मतेतदनिवेशेसर्वासामेवप्रतियोगितानांसाध्यवन्निष्ठो विषयितासंबंधे
नस्वावच्छिन्नस्याभावःतत्प्रतियोगितावच्छेदकतयाव्यापकतावच्छेदकप्रतियोगितायाएवाप्रसिध्यापत्तेःभेद
प्रतियोगितावच्छेदकतायांव्यापकताघटकसंबंधावच्छिन्नत्वस्यैतन्मतेनिवेशवत्तन्मतेप्यभावप्रतियोगि
तायांतन्निवेशस्यावश्यकतयातदंशेसाम्यादिति।तदसत्तत्रतानवच्छेदकप्रतियोगिकत्वमनवच्छेदकनिष्ठप्र
तियोगितानिरूपकत्वंप्रतियोगितायांतन्निष्ठत्वंचस्वरूपसंबंधेनवाच्यं।अन्यथावह्निमान्धूमादित्यादाव
पिविषयतयासाध्यव्यापकप्रमेयमित्याकारकविश्वविषयकज्ञानेविषयितासंबंधेनज्ञेत्वाद्यभावीयप्रति

योगितायावृत्तेसादृश्यभावस्यलक्षणघटकतापातात्। विषयितायावृत्तिनियामकतया एतद्दोषानवकाशेपि
तद्धूम्हिमानेतधूमादेतद्रूपवानेतद्रसादिसादोजलत्वाद्यभावप्रतियोगितायाःकालिकसंबंधेनसाध्यव्यापक
साध्यतत्समानाधिकरणकर्मादौवर्तमानतयालक्षणघटकत्वापातात्। तथाचव्यापकनिरूपितवृत्तीतत्संबं
धावच्छिन्नत्वनिवेशस्यैवतन्मतेप्यावश्यकतयालाघवावकाशः विपरीतमेवगौरवमाधेयत्वांशनिवेशाधि
क्येनेतिमत्तव्यापकनिरूपप्रतियोगितात्वेनाभावान निवेशनीयायेनात्तगौरवंस्यादपित्वनुयोगितासंबंधे
नव्यापकविशेषितात्वतत्तच्चव्यापकतावच्छेदकप्रतियोगितात्वेनाभावनिवेशापेक्षयालाघवमक्षतमे
वेतिवाच्यं प्रतियोगिप्रकारिभूतधर्मावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगितायाअभावांशेप्रतियोगिसं
बंधतयाभाने पटादिमतिघटत्वावच्छिन्नाभावविषयिण्याः द्रव्यंनास्तीयाकारकप्रतीतेरापत्तेः तदवच्छिन्ननि
रूपितानुयोगितायाएवसंसर्गतयाभानोपगमात्व्यापकतावच्छिन्नविशेषितताभावस्यलक्षणेनिवेशेव्या
पकत्वावच्छिन्ननिरूपितानुयोगितायाःसंबंधसंसर्गधतयानिवेशनीयतयासएवतोहेतुसमानाधिकरणसा

ध्यव्यापकत्वावच्छिन्नसाध्यव्यापकाभावस्यसंबंधविशेषावच्छिन्नप्रतियोगितास्यकथंचित्प्रसिध्यालक्षणस
मन्वयेसंभवेपिव्यभिचारिण्यतिव्याप्तिःव्यभिचारनिरूपकाधिकरणेयिकस्यचित्साध्यव्यापकस्यवृत्तेःव्यधिक
रणधर्मावच्छिन्नाभावस्यलक्षणघटकत्वानुपपत्तश्चतिएवं अनवच्छेदकपदेनावच्छेदकतापर्याप्यनधिकरण
त्वमवश्यंवाच्यं अन्यथाद्रव्यत्वाभावादरपिपूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्व
तियोगिकत्वालक्षणघटकत्वापत्तेः तथाचघटत्वावच्छिन्नघटाभावादरपिलक्षणघटकत्वापत्तिःवह्निमनिष्ठ
भेदप्रतियोगितावच्छेदकतायाः घटत्वविशिष्टपर्याप्ततयारूढघटस्यतत्पर्याप्यनधिकरणत्वात्। अथनि
रुक्तव्यापकतावच्छेदकतायानिवेशेकपिसंयोगाभावादिसाध्यकस्थलेकपिसंयोगाद्यात्मकाभावानांलक्ष
णघटकत्वानुपपत्तिःकपिसंयोगाभावादिनिष्ठतत्प्रतियोगितानांसाध्यवन्निष्ठकपिसंयोगाद्यात्मकाभाव
प्रतियोगितावच्छेदकतादिसग्रिमग्रंथविरोधः मत्वव्यापकताघटकाभावेप्रतियोगिवैय्यधिकरण्यविशे
षणसत्वात्साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्यनव्यापकताघटकतेतिवाच्यं। प्रकृतेव्यापकतायांता

दृश्यविशेषणप्रवेशस्यनिष्प्रयोजनकत्वात्। अन्यकेचित्तुव्यापकतापदकाभावेप्रतियोगिवैयधिकरण्यनि
वेशनमावश्यकंअन्यथाऽभावेसंबंधसामान्येनसाध्यवन्निष्ठत्वनिवेशेकालपरिण[illegible]वात्द्रव्यत्वादित्यादौ
व्यतिरेकिताऽवच्छेदकप्रतियोगितासामान्यस्यैवकालिकसंबंधेनसाध्यवद्वृत्तिर्यःस्वावच्छिन्नाभावस्तत्प्रतियो
गितावच्छेदकतयावाच्यत्वादिनिष्ठप्रतियोगितायास्वव्यापकतावच्छेदकतयातिव्याप्त्यापत्तेः। दैशिकविशे
षणतासंबंधेनतन्निष्ठत्वनिवेशेभावस्यतेनसंबंधेनवृत्तेरप्रामाणिकतयावह्निमान्धूमादित्यादौपर्वत
त्वाद्यभावनिष्ठप्रतियोगितायाअपिव्यापकतावच्छेदकतापत्त्यापर्वतत्वाद्यात्मकाभावस्थापिलक्षणघट
कतापातात्। हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपितादृशसंबंधावच्छिन्नत्वनिवेशेनात्रास्थान
तादृशसंबंधनिवेशनप्रतियोगितानवच्छेदकतमियन्नचव्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिता
वच्छेदकतावारणायसामानाधिकरण्यप्रत्यासत्यवच्छिन्नत्वनिवेशेनगौरवात्। अभावप्रतियोगिवैधिक
रण्यनिवेशनमेवाचित्तंव्यधिकरणधर्मावच्छिन्नाभावस्यप्रतियोगिसमानाधिकरणतयैवतन्मादायदो

षासंभवात् एतन्मते अवच्छेदकतायां सामानाधिकरण्यप्रयासस्यवच्छिन्नत्वस्यानिवेशात्। अभावीयवृत्तौसंबं
धभेदानिवेशाच्चलाघवं। प्रतियोगिवैय्यधिकरण्येनप्रतियोगिसमानाधिकरणभिन्नत्वंतथासतितद्घ्नेसं
योगाद्यभावस्यप्रतियोगिसमानाधिकरणतयाभावांतरमादायतद्घ्नेसंयोगादिनिष्ठप्रतियोगितायाअ
पिवह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वापत्तेः किंतुप्रतियोग्यनधिकरणवृत्ति
त्वंतथाच प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावइत्यभावांतार्थनिष्कर्षः। अत्रचव्यापकताघटक
याभिमतायःसंबंधस्तेनसंबंधेनप्रतियोग्यधिकरणत्वंवाच्यंतेनकालपरिणामादिसाध्यकस्थलेसंबंधसा
मान्येनप्रतियोग्यनधिकरणसाध्याधिकरणप्रसिद्धावपिनक्षतिः। कालःसर्वान्कालपरिमाणदित्यादौसा
ध्यतावच्छेदककालिकसंबंधेनप्रतियोग्यनधिकरणसाध्याधिकरणप्रसिद्धातादृशसंबंधस्यव्यापकता
घटकत्वासंभवेपिनक्षतिः तत्रसमवायादिसंबंधघटितव्यापकतावच्छेदकप्रतियोगितावंघटत्वादिनाद्र
व्यत्वाद्यभावमादायैवलक्षणसमन्वयसंभवात्। अथैवंदेशिकविशेषणतासंबंधस्यचापिव्यापकताघ

टकत्वं नस्यात्। सर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनस्तेनसंबंधेनसाध्यवतिवृत्तेस्तेन
संबंधेनस्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः नचतादृशसंबंधस्यव्यापकत्वाघटकत्वेपि
क्षतिरिहः सामान्याभावनिरूपितसाध्यकस्थलेपिविषयितासंबंधघटितव्यापकतावच्छेदकप्रतियोगितांकसा
ध्यकत्वप्रकारकप्रमाभावमादायैवोपपत्तिसंभवादितिवाच्यं। तादृशसंबंधस्यातथात्वेतेनसंबंधेनकपिसं
योगाभावादिसाध्यकमेयत्वादिहेतुकस्थलेतन्निष्ठकपिसंयोगात्मकाभावीयप्रतियोगितायाव्यापकतावं
देकतानुपपत्याऽग्रिमग्रंथासंगतितादवस्थ्यादितिचेन्न लाघवानुरोधेनयेनसंबंधेनयादृशप्रतियोगिता
वच्छेदकविशिष्टानधिकरणंसाध्यवत्तादृशप्रतियोगितानवच्छेदकत्वमेवतादृशसंबंधघटितव्यापकता
वच्छेदकत्वमितिवक्तव्यंइत्थंचकपिसंयोगाभावादिसाध्यकस्थलेतन्निष्ठप्रतियोगित्वावच्छिन्नप्रतियोगिता
नाक्तयादृशघटनोपादातुंशक्यतेतादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्यसाध्यवत्यसंभवात्
किंतुघटत्वाभावनिष्ठप्रतियोगित्वावच्छिन्नप्रतियोगितेवदैशिकविशेषणतयातदवच्छेदकावच्छिन्नानधि

करणत्वस्यसाध्यवतिघटादौसत्वात्ततद्व्यवच्छेदकत्वंकपिसंयोगाभावादिनिष्ठप्रतियोगितायाइतिकपिसंयो
गादेर्दशिकविशेषणतापटितव्यापकताकच्छेदकप्रतियोगितात्वनिर्वाहःसमनियताभावेक्यमतेघटाद्यभा
वानामपिघटत्वादिनाप्रमेयसामान्याभावाभिन्नतयाप्रमेयमात्रप्रतियोगिकत्वेनप्रतियोग्यनधिकरणीभू
तसाध्यवतोप्रसिद्धिरतःप्रतियोगितावदनधिकरणत्वंविहायप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवे
शःनव्यघटाद्यभावानांप्रमेयमात्रप्रतियोगिकत्वेपितदीयघटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमा
दायव्यापकतालक्षणसामंजस्यमितिवाच्यं।तादृशभावानांभेदेघटानास्तीत्यादिप्रतीतीनामपिघटत्वादि
विशेषितघटादिवृत्तित्वेनयावत्प्रमेयनिष्ठप्रतियोगितावगाहितसंभवात्।घटादिमात्रवृत्तिप्रतियोगितायाः
अप्रामाणिकत्वात्समनियताभावानाम भेदानभ्युपगंतृनयेपिसाध्याभावादिप्रतियोगितयासाध्यवद्वृत्ति
पदार्थाभावस्यप्रतियोगितामादायतादृशप्रतियोगितानांव्यापकतानवच्छेदकत्वापत्तिवारणायप्रतियोगि
तावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकं।अथद्रव्यत्वाद्यभावीयद्रव्यत्वनिष्ठप्रतियोगितानाम

पिसंयोगादिव्यधिकरणसंबंधघटितव्यापकतावच्छेदकत्वापत्तिः संयोगादिनातादृशप्रतियोगितात्मकप्रतियोगि
तावच्छेदकविशिष्टानधिकरणप्रसिध्यातादृशप्रतियोगितेयत्रतादृशप्रतियोगितावच्छिन्नायाः प्रतियोगिना
यानुपादातुमशक्यत्वात्प्रतियोगितांतरमुपादायतत्रानवच्छेदकत्वांतसत्वातूतथाचयावद्व्यापकताघटकसंबं
धांतर्गतसंयोगादिनाद्रव्यत्वाद्यभावस्यप्रतियोगिसामानाधिकरण्यासंभवादसंभवः। नचसंयोगादिना
द्रव्यत्वाद्यभावस्यस्वसमनियतघटत्वावच्छिन्नप्रतियोगिताकवन्ह्याद्यभावाभिन्नतयासंयोगादिनावन्ह्या
दिरूपप्रतियोगिसामानाधिकरण्यसत्वान्नासंभवइतिवाच्यं। एवमपिसत्तावान्जातेरित्यादौहत्वधिकरणा
वच्छेदनतादृशभावानांसंयोगेनप्रतियोगिसामानाधिकरण्यासंभवेनाव्याप्तेर्दुर्वारत्वात्। नचव्याप
कताघटकेनाभिमतोयःसंबंधस्तेनसंबंधेनवृत्तिमन्निष्ठत्वेनप्रतियोगितायाविशेषणीयत्वात्द्रव्यत्वा
देःसंयोगादिनावृत्तित्वाउक्तदोषानवकाशइतिवाच्यं। तत्तत्कलघुरूपसमनियतगुरुधर्मस्यानवच्छे
दकत्वेघटाद्यभावीयप्रतियोगितायाअपिवन्ह्यादिव्यापकतावच्छेदकत्वापत्तिः तादृशप्रतियोगितानि

शिष्टघटाद्यभावप्रतियोगितायांलाघवेनघटत्वादेरवावच्छेदकतयाघटाद्यभावप्रतियोगितानांतदनव
च्छेदकत्वात् नचप्रतियोगितायास्तदभावीयप्रतियोगितात्वेनावच्छेदकतायांगौरवमपिस्वरूपतोऽवच्छेद
कत्वेऽविशेषः।प्रतियोगितायाःस्वरूपतोभानाभावेननूपेक्षावच्छेदकतायाअप्यसंभवादितिपरि
भाषिकमेवावच्छेदकत्वंव्यापकताशरीरेनिवेशनीयंतथाचसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकीयो
धर्मस्तदवच्छिन्नाभाववदसंबद्धस्वविशिष्टसामान्यकत्वंफलतःसाध्यवद्यत्किंचिद्व्यक्त्यसंबद्धस्वविशिष्टसा
मान्यकंयद्यत्स्वंतदन्यत्वमेवव्यापकतावच्छेदकत्वंतथाचकपिसंयोगाद्यात्मकाभावस्यापिसाध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकप्रतियोगितात्वमनायासेनैवनिर्वहतियतःकपिसंयोगाद्यभावनिष्ठप्रतियोगि
तानिरूपितस्यसर्वत्रैवसाध्यवतिवृत्तेस्तस्याश्चस्वपदेनोपादानुमशक्यत्वात्।तादृशंस्वधर्मांतरमेवतदन्य
त्वंचतादृशप्रतियोगितायामक्षतमेवेतिअसंबंधत्वंशरीरेव्यापकताघटकत्वनाभिमतायःसंबंधःस
एवनिवेशनीयःद्रव्यत्वादिनिष्ठप्रतियोगित्वंचसंयोगादिसंबंधेनसाध्यवदसंबंधस्वविशिष्टसामान्य

कमेवातोनसंयोगादिघटितव्यापकतावच्छेदकत्वंनास्तीतिनोक्तदोषावकाशइतिदिक्। येनसंबंधेनहेतुरिति।
व्याप्यतावच्छेदकत्वेनाभिमतोयःसंबंध[illegible]
[illegible]इत्यर्थः। बोध्यमित्यस्यहेतुसामानाधिकरण्यघटकमित्यादिःतेनतादृशविशेषणेन। आसत्वेसा
ध्यइति अयमात्माज्ञानादित्यादावित्यर्थः। साध्याभावस्यसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्यअतथा
त्वेपित्वविशिष्टस्यहेतुतावच्छेदकसंबंधेनहेत्वधिकरणस्याप्रसिद्धावित्वक्षणीयस्यविशिष्टहेत्वधिकरणा
वच्छेदेनप्रतियोगिसामानाधिकरण्यविरहेपिनक्षतिर्नव्याप्तिःवन्हिमान्धूमादित्यादौधूमावयवादित्व
स्यैवन्हितायावच्छिन्नाभावस्यस्वविशिष्टत्वेनहेतुतावच्छेदकसंबंधेनहेत्वधिकरणंगतदवच्छेदेनप्रतियो
गिसामानाधिकरण्यंसंभवत्येवतथाविधहेत्वधिकरणपर्वतादेर्जन्यमात्रस्यकालोपाधितयाकालिक
संबंधेनतादृशभावादिविशिष्टत्वात्तदंतर्भावेणतेनसंबंधेनतादृशप्रतियोगिसामानाधिकरण्य
स्यापिसत्वाच्च असमावेशिष्टादौसंबंधविशेषानिवेशादित्यभिप्रायेणनित्यमात्रवृत्तिहेतुकस्थलानु

धावनं।अथवन्हिव्यापकस्यचरमक्रियाभावस्ययोभावस्तत्स्यकालिकसंबंधेन हेत्वधिकरणेमहाकालेव र्तमानस्यनविवक्षणीर्येसामानाधिकरण्यसंभवः नद्विशिष्टस्यहेतुतावच्छेदकसंयोगेनधूमाधिकरणस्याप्र सिद्धेः।धूमाधिकरणपर्वतादेस्तदसमानकालीनतयातत्रकालिकसंबंधेनापितद्वैशिष्ट्यासंभवादिति ऽ आसत्तसाध्यकपर्यंतानुधावनमफलंनचचरमनियामकसंयोगेनधूमसंबंधिनिपरमाणावेचचरमक्रिया वैशिष्ट्यस्यप्रसिध्यात्तत्रचरमक्रियाभावरूपप्रतियोगिनोपिसत्वात्संभवत्येवविवक्षणीयप्रतियोगिसामा नाधिकरण्यंतादात्म्यसंबंधावच्छिन्नहेतुकस्थलानुरोधेनहेत्वधिकरणावच्छेदनेयत्नेहेतुसंबंधित्वमात्रस्येव विवक्षितत्वादितिवाच्यं।यादृशपरमाणौकदापिधूमसंयोगोनास्तितदीयचरमक्रियात्मकाभाववैशिष्ट्य स्यहेतुसंबंधिन्यसत्वेनतन्मादायेवाव्याप्तिसंभवादितिचेन्नमहाकालस्येवचरमनियामकसंयोगसंबंधेन संबंधितयातत्रकालिकसंबंधेनचरमक्रियात्मकाभाववैशिष्ट्यस्यदेशिकविशेषणतयातदभावस्यापि सत्वेनविवक्षणीयप्रतियोगिसामानाधिकरण्यसंभवात्।चरमनियामकसंयोगस्यापिसंयोगत्वेनहेतु

नावच्छेदकसंबंधत्वात्। नचतथापिवृत्तिनियामकसंयोगेनधूमहेतुकस्थलेऽव्याप्तिरस्येवेतिवाच्यंतेनरूपेण संबंधतायांमानाभावात्। कालस्यावृत्तितयाकालेधूमसंयोगस्यकालनिष्ठधूमाधेयत्वानियामकत्वेपिधूमस्थेतेनसंबंधेनवृत्तित्वमस्त्येवेत्यस्यापिसत्वचत्वात्। वन्हिमान्धूमादित्यादौसाध्याभावमादायनाव्याप्तिसंभवः। किंतुचरमक्रियात्मकाभावमादायेवत्यव्याप्तेःस्फुटतरप्रतिपत्यर्थंमात्मत्वादिसाध्यकस्थलानुधावनस्यसार्थकत्वाच्चेति"नानुज्ञानवानात्मामहाकालात्यंतरत्वादित्यादौहेतुसमानाधिकरणंसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगितावच्छेदकावच्छिन्नाभावानामवस्तुविशिष्टहेत्वधिकरणमहाकालेकालिकसंबंधेनप्रतियोगिसामानाधिकरण्यसत्वादतिव्याप्तिः। नचतादात्म्येनज्ञानव्यापकस्यात्मनोभावएवकालेनप्रतियोगिसमानाधिकरणः आत्मनोवृत्तितयाकालेकालिसंबंधेनाप्यवृत्तेरितिवाच्यं। आत्मनःकालावृत्तित्वेकालवृत्तित्वघटितकारणत्वाद्यनुपपत्तातदुपगमस्यावश्यकत्वात्। नित्यद्रव्याणांकालावृत्तित्वेपिमहाकालभिन्नोद्रव्यत्वादीश्वरज्ञानभिन्नंगुणत्वादित्यादावतिव्याप्तिः वृत्तिमतामेवमहाकालभेदईश्वरज्ञानभेदव्यापक

तया तद्भावानांयावतामेवमहाकालेईश्वरज्ञानादेश्चकालिकविशेषणतावि षयितादिसंबंधघटितप्रतियोगि
सामानाधिकरण्यसत्वादित्यतआह। एवंदलांतरेपीतिदलांतरेप्रतियोगिसामानाधिकरण्यकटकप्रतियोगिम
त्तादलेसंबंधभेदनिबंधनोदोषः।कालिकादिसंबंधमादायातिव्याप्तिरूपःसंबंधैक्यविवक्षयाव्यापकताघट
कसंबंधप्रतियोगिसत्ताघटकसंबंधयोरैक्यविवक्षयातथाचज्ञानवानात्मामहाकालान्यतरत्वात्।महाका
लभिन्नोद्रव्यत्वादित्यादौसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितव्यापकताघटकस
मवायदेशिकविशेषणतादिसंबंधेनज्ञानाभावमहाकालभेदाभावादिप्रतियोगिनांकालादाववृत्तेर्नाति
व्याप्तिरितिभावः।अत्रचयेनयेनसंबंधेनस्वप्रतियोगित्वावच्छिन्नस्यसाध्यतावच्छेदकावच्छिन्नव्यापकता
तेनतेनसंबंधेन प्रतियोगिसामानाधिकरण्यमभावस्यविवक्षणीयं अन्यथाइदंनित्यज्ञानंनित्यत्वेसति
सविषयकत्वादित्यादौहेतुसमानाधिकरणनित्यज्ञानत्वाद्यभावस्यप्रतियोगिनः साध्यंप्रतिविषयितासंबंधे
नापिव्यापकतयातेनसंबंधेनहेत्वधिकरणेश्वरेदोषसोःप्रतियोगिसामानाधिकरण्येनातिव्याप्तिःयेन

येनेसक्तोचतथाविधसमवायादिसंबंधेनातथात्वान्नातिव्याप्तिः अन्नसाध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपि
तस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्संबंधत्वेननादृशसंबंधस्यप्रतियोगिसामानाधिकरण्यशरी
रेनस्वातंत्र्येणनिवेशःतथासति अभावेसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषण
वैय्यर्थ्यापातात्नहितादृशविशेषणानुपादानेगोत्वाद्यभावमादायासंभवःसंभवतिगोत्वाद्यभावानामपिहेत्व
धिकरणपूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटकदेशिकविशेषणतासंबंधेनप्र
तियोगिसामानाधिकरण्यसत्वात्।धूमवान्वह्नेरिसादौधूमाद्यभावस्यायोगोलकपूर्वक्षणादिवृत्तित्वोशिवि
शिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्येपियावद्व्यापकताघटकसंबंधांतर्गतसंयोगादिनाप्रतियो
गिसामानाधिकरण्यविरहात्।घटत्वाद्यभाववान्प्रमेयत्वादिसादौघटत्वाद्यात्मकाभावस्यचतादृशप्रति
योगिसामानाधिकरण्येपिविशेष्यतासंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यघटादिवृत्तेर्घ
टत्वाभावादिप्रकारकप्रमायास्तादृशसंबंधेनाभावस्ययावद्व्यापकताघटकसंबंधांतर्गततादृशसंबं

धेनघटप्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तेरनवकाशात् अपितुसाध्यतावच्छेदकावच्छिन्नव्याप्यता
निरूपितयद्यत्संबंधघटितव्यापकतावच्छेदकप्रतियोगिताकायेयंभावात्तत्तत्संबंधेनप्रतियोगिसमाना
धिकरणइयंचक्रमेणैवनिवेशाव्यापकतायाएकधेवलक्षणेनिवेशइति। यत्तुसाध्यतावच्छेदकसंबंधेनप्र
तियोगिसामानाधिकरण्यनिवेशान्नज्ञानवानात्मेहाकालान्यतरत्वादिसादावतिव्याप्तिः इत्थंचव्यापक
तासाध्यतावच्छेदकसंबंधघटिताग्राह्या अतएववन्हिमान्धूमादिसादोघटत्वादिनाघटवत्तित्वविशिष्टद्र
व्यत्वादिनावाद्रव्यत्वादेरभावस्यसमवायादिसंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य
साध्यतावच्छेदकसंयोगादिसंबंधेनप्रतियोगिसामानाधिकरण्यविरहेपिनक्षतिरिति तन्नतथासतिकालि
कविशेषणतयामहाकालान्यत्वविशिष्टघटादेःसाध्यकालत्वादिहेतावतिव्याप्त्यापत्तेः तन्नमहाकालान्यत्व
विशिष्टघटाभावमहाकालान्यत्वाभावादीनांकालिकसंबंधेनमहाकालेघटादिरूपप्रतियोगिसामाना
धिकरण्यसत्वात्। यद्यपिमहाकालान्यत्वविशिष्टोपिघटोमहाकालेवर्ततेअन्यथासिद्धांतलक्षणेमहाका

लोघटवान्कालपरिमाणादित्यादौमहाकालान्यत्वविशिष्टघटाभावस्ये
वप्रतियोगिव्यधिकरणस्यकालभेदसंबंधाभावघटितप्रतियोगित्वव्यधिकरण्यनिर्वचनायासस्यनिष्प्रयो
जनकत्वापत्तेरितिदर्शितविशिष्टसाध्यकस्थलेकालत्वादिःसंधेतुरवेतिमन्यतेतदापिघटत्वाभाववान्प्रमे
यत्वादित्यादौघटत्वात्काभावस्यसाध्यतावच्छेदकविशेषणतासंबंधेनकिंचिद्विशिष्टस्वाभावात्मकप्रतियो
गिसामानाधिकरण्यसंबादतिव्याप्तिस्तन्मतेदुर्वारैवनचतेनसंबंधेनभावरूपप्रतियोगिसामानाधिकरण्यवि
वक्षणान्नायंदोषइतिवाच्यं।तथासत्यभावसाध्यकसंधेतोनिरुक्तयावदभावांतर्गतस्यभावरूपसाध्याभावस्य
भावरूपप्रतियोग्यप्रसिध्याभावरूपप्रतियोगिसामानाधिकरण्यासंभवादव्याप्तेः।एवंसाध्यतावच्छेदकसं
बंधेनव्यापकत्वादिनिवेशेसर्वत्रसाध्यवान्वह्नेरित्यादावाद्यत्वाद्यभावमादायातिव्याप्तिप्रदर्शनस्या
संगत्यापत्तश्चेति।यत्तुदीधितिकृताविशेषणतासंबंधेनव्यापकतासंबंधेनप्रतियोगिसामानाधिकरण्यं
सर्वत्रसाध्यवत्वप्रकारकप्रमाविषयत्वाद्यभावमादायेवलक्षणसंगमनमतिव्याप्तिवारणंचेतितदपि

क्तातिव्याप्तेरात्मत्वादिसाध्यकस्थलेसाध्याभावमादायहेतुतावच्छेदकसंबंधव्यावृत्तिप्रदर्शनविरोधाच्चानुपा
देयमेवकिंचित्तुप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसामानाधिकरण्यप्रवेशन्नप्रागुक्तातिव्याप्तिःइत्थंच्चा
पकतापितेनसंबंधेनबोध्याऽतोवह्निमान्धूमादित्यादौसंयोगादिघटितसाध्यव्यापकतावच्छेदकप्रतियो
गिनाकस्यसमवायसंबंधावच्छिन्नप्रतियोगितांकवन्ध्यत्वाभावस्यहेत्वधिकरणसमवायादिनाप्रतियोगिसा
मानाधिकरण्यविरहेपिनक्षतिःतादृशभावानांसाध्यतावच्छेदकसंबंधघटितसाध्यनिष्ठव्यापयतानिरूपित
स्वप्रतियोगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकप्रतियोगितांकत्वाभावेननिरुक्तयावद्भावानंतः
पातित्वादितिनचैवंव्यधिकरणधर्मावच्छिन्नाभावस्यसंबंधावच्छिन्नप्रतियोगितांकत्वेमानाभावेनतादृशा
भावस्यलक्षणघटकत्वानुपपत्तिरितिवाच्यं।संयोगेनघटत्वेनपटोनास्तीत्यनुभवबलात्तादृशभावप्रति
योगितायामपिसंबंधस्यावच्छेदकत्वात्।अनुभवानादरेचसमानाधिकरणधर्मावच्छिन्नाभावप्रतियो
गितायामपिसंबंधस्यावच्छेदकत्वासिद्धेःअथबाधबुद्धिप्रतिबंधकतायाःसंबंधविशेषनियंत्रितत्वानु

रोधेनसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यसंबंधावच्छिन्नप्रतियोगितात्वमावश्यकं अन्यथा
कैकविधघटाभावज्ञानस्यसंयोगसमवायादिरूपनिखिलसंसर्गावगाहिज्ञानप्रतिबंधकत्वप्रसंगात्।नचसंयोगा
दिसंबंधावच्छिन्नघटादिप्रकारकबुद्धिंप्रतिवस्तुगत्यासंयोगादिसंबंधेनघटादिमत्ताविरोधीयोभावस्तज्ज्ञानत्वेन
प्रतिबंधकत्वान्नोक्तातिप्रसंगइतिवाच्यं।वास्तवतादृशाभावज्ञानत्वादिनाप्रतिबंधकत्वेघटाभावत्वेनपदार्थांत
रावगाहिज्ञानस्यघटादिमत्ताज्ञानाविरोधित्वप्रसंगात्।तस्मात्तत्संसर्गकविशिष्टबुद्धीनत्तत्संसर्गावच्छिन्न
प्रतियोगिताकाभावत्वावगाहिज्ञानत्वेनप्रतिबंधकतायावक्तव्यतयासमानाधिकरणधर्मावच्छिन्नप्रतियोगि
तायांसंबंधस्यावच्छेदकतासिद्धिरितिचेत्तर्हिघटत्वादिनापटाद्यवगाहिज्ञानमघटत्वादिनापटाद्यभावज्ञानयो
रपिप्रतिबध्यप्रतिबंधकभावसत्वात्तादृशप्रतिबध्यप्रतिबंधकभावस्यसंबंधविशेषनियंत्रितत्वानुरोधेन
व्यधिकरणधर्मावच्छिन्नस्वप्रतियोगितायाअपिसंबंधावच्छिन्नत्वावश्यकत्वात्व्यधिकरणधर्मावच्छिन्नाभावज्ञा
नस्याप्रतिबंधकत्वे बाधग्रंथेलाघवोपनीतकांचनमयत्वादिनावह्न्याद्यनुमितिविरोधितयाकांचनमयत्वा

यावच्छिन्नप्रतियोगिताकवन्ध्याद्यभावस्यहेत्वाभासतोक्तसंगत्यापत्तेरित्यलमप्रकृतविचारेणेतिचेन्न।तदपि
नसाधीयः।निखिलाभावस्यकिंचिद्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतदेशिकविशेषणतासंबंधे
नैतादृशप्रतियोगिसामानाधिकरण्यनिवेशेनिखिलव्यधिकरणधर्मावावच्छिन्नाभावानामेक्यमतेनि
खिलसंबंधानामेककतादृशाभावप्रतियोगितावच्छेदकतयाचाचिदपिहेत्वधिकरणसंयोगविषयितादिरूप
सकलसंबंधेनप्रतियोगिनोक्तेरसंभवापत्तेःप्रकारांतरानुसरणेचगौरवात्।अथयावत्वमनुपादायसाध्य
तावच्छेदकव्याप्यप्रतियोगिताकस्यतदुपादायसाध्यतावच्छेदकव्यापकप्रतियोगिताकस्यवाभावस्यनिवेशे
उभयत्वावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तिस्तदानतुरूपसामान्याभावसाध्यकप्राचांमतेविरुध्यपृथिवी
त्वादिहेतावृसत्रकिंबीजंतथासतितत्रापिरूपसामान्याभावाभावस्यरूपध्वंसप्रागभावादिरूपप्रतियोगि
सामानाधिकरण्यसत्वेनातिव्याप्तिसंभवादित्याशंकापरिहारायस्वमतेतस्यलक्ष्यत्वमवोपपादयतिरूपा
दीतियथोक्तलक्षणेतिव्याप्तिशंकयातुनेतद्ग्रंथावतारःतन्नपृथिवीत्वन्यत्वाद्यभावस्योपियावदंतर्गततया

तस्यपृथिव्यांपृथिवीभेदरूपप्रतियोगिसामानाधिकरण्यासंभवेनातिव्याप्तेरनवकाशत्वात्।यत्तूत्पत्तिकालाव
च्छेदेनरूपसामान्याभावस्यपृथिवामपिसत्वेनपृथिव्यन्यत्वाभावस्यनरूपसामान्याभाववयापकतावच्छेदकप्र
तियोगितावच्छेदकमित्यभिसंधिपूर्वकंप्राचीनप्रवादमात्रेणासंधेतुत्वाभिमानिनांयथोक्तलक्षणेतिव्याप्तिशंकानि
राकरोतिनरूपादीतिसंधेतुरवेतियादृशरीत्यापृथिव्यन्यत्वाभावस्यलक्षणाघटकत्वोपपत्तिःतादृशरीत्यासाध्यवति
हेतुमत्तायाअव्यावश्यकतयासंधेतुरवेसत्यर्थइतिव्याख्यानंतदनुपादेयमेवतादृशशंकितुःपृथिव्यांरूपसामा
न्याभावसत्वेविप्रतिपत्तावेवातिव्याप्तिशंकासंभवेनाग्रेपृथिव्यांरूपसामान्याभावस्यव्यवस्थापनोपयिकाका
क्षानुपपत्तेतदसंगत्यापत्तेः।प्रलयेमहाप्रलयेपरमाणूनांनित्यतयातत्रोत्पत्तिकालावच्छेदेनरूपसामान्याभा
वासंभवइतिभावःनचपिपाकाद्रूपनाशोत्पत्तिकालेपूर्वरूपात्मकप्रतिबंधकसत्वेनरूपांतरानुपपत्तेरा
नीमपिपरमाणौरूपसामान्याभावसंभवःतथाप्यविनश्यदवस्थरूपस्यप्रतिबंधकत्वेपूर्वरूपनाशोत्पत्तिक्ष
णेएवपाकजरूपोत्पत्तिसंभवइसभिप्रायेणप्रलयपर्यंतानुधावनंउत्पत्तिकालइतिअवयविद्रव्यस्यजन्यतया

मेइत्यर्थः।रक्तंनूपंनास्तीतिप्रत्ययइतिध्वंसप्रागभावयोरसंतानाभावविरोधितंत्रपूर्वरक्तध्वंसाभिरक्तप्रागभा
वयोःसत्वनासंतानाभावावगाहित्याःसमानकालादृशप्रतीतेरनुपपत्तेरितिभावः।एकःरक्तंनूपंनास्तीतिप्रत्ययःध्वं
सादीसादिनाप्रागभावपरिग्रहः। पूर्वापरेतियत्रघटादौपाकादेकरक्तरूपनाशानंतरंनूपांतरमुत्पन्नंतन्नाशानं
तरंरक्तांतरंततस्तन्नाशानंतरंचोत्पन्नरूपांतरनाशानंतरंरक्तांतरमुत्पत्स्यतेतत्रमध्यरक्तदशायारक्तंनूपंना
स्तीतिमतीत्यापत्तेरित्यर्थः।तन्नापिरक्तरूपध्वंसप्रागभावयोःसत्वादितिभावः एतेनभवन्मतरक्तत्वावच्छिन्नप्रति
योगीताकासंतानाभाववत्तादृशएवध्वंसप्रागभावोनादृशप्रतीतिविषयावंतरारक्तसमानकालीनोपूर्वापर
रक्तध्वंसप्रागभावोवेतनथाविधावितिनातिप्रसंगइतिनिरस्तंतादृशध्वंसप्रागभावयोरेवरूपांतरदशायांता
दृशप्रतीतिनियामकत्वायतयोरपितथात्वस्वीकारस्यावश्यकत्वात्।तत्रमध्यरक्तध्वंसप्रागभावयोस्तथात्वस्वी
कारेनपूर्वापररक्ततादशायांतादशप्रत्ययापत्तेः।नचरक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावाववता
दृशप्रतीतिविषयोदृश्यंचरक्तरूप[illegible]दशायांलौकिकप्रत्यक्षात्मकस्तादशप्रत्ययआपाद्यतेअनुमित्यात्मको

वा आधेरक्तरूपलौकिकप्रत्यक्षसामग्यारक्तत्वावच्छिन्नप्रतियोगिताकत्वेनतदभावप्रत्यक्षंप्रतिप्रतिबंधकत्वा
नापत्तिः अन्यथाभवन्मतेपिरूपांतरकालावच्छेदेनतदुत्तरक्तत्वावच्छिन्नायंताभावस्यैवतदानींधर्म्यंतरघटित
सन्निकर्षात्तद्वृत्तितयाप्रत्यक्षापत्तेः विशेष्यघटितसन्निकर्षत्वेनसन्निकर्षस्यहेतुत्वात्। रक्तरूपग्रहप्रतिबंध
कदोषादिसत्वेचतादृशप्रत्ययस्यैवत्वात्नांयः तद्रूपावच्छिन्नैगाप्यवताज्ञानादिमतेऽनुमानिकतथाविधप्र भाव
त्ययस्यैवत्वात्। नचतादृशप्रत्ययस्यभ्रमत्वापत्तिःभवन्मतेपितथाविधायंताभावस्यतत्रसत्वातादृशप्रत्यय
स्यभ्रमत्वेनइष्टापत्तेः यदाचतत्ररक्तंरूपंतत्कालावगाहितदानींतेनरक्तरूपंतत्कालावच्छेदेनैवध्वंसप्रागभा न
वयोरक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणतादृशविषयबाधात्तधर्मोपलक्षितताभावांशेतत्कालावच्छिन्न
त्वावगाहिप्रत्ययस्यप्रमात्वंपुनरिष्टमेवनचतधर्मिनिष्ठध्वंसादेस्तत्कालावच्छेदनरक्तत्वावच्छिन्नप्रतियोगि
ताकत्वंकल्प्यतेकिंवातत्कालावच्छेदनतधर्मिस्थयावरक्तत्वावच्छिन्नप्रतियोगिताकायंताभावःकल्प्यतेइत्यत्रवि
निगमनाविरहाध्वंसाद्यधिकरणेयंताभावसिद्धिर्निष्प्रत्यूहेवेतिवाच्यं। ध्वंसप्रागभावाधिकरणेसंताभा

५ अत्ररक्तंरूपंनास्तीतिप्रत्ययस्यप्रमात्वंपुनरशक्यापादनेनादृशप्रत्ययेनरक्तत्वावच्छिन्नप्रतियोगिताकत्वेनतत्कालावच्छिन्नत्वावगाहनात्ययत्व

वाकल्पतेध्वंसादेरतिरिक्तात्यंताभावाकल्पनेनलाघवात्ररक्तरूपात्यंताभावस्येवतन्मतेरक्तरूपध्वंसात्यंताभा
वस्यनियततयानस्येवध्वंसात्यंताभावत्वात्।मेवंतधर्मावच्छिन्नप्रतियोगितात्वस्याव्याप्यवृत्तित्वोपगमेवि
शेषाभावानामेवाधिकरणविशेषावच्छेदेनसामान्यधर्मावच्छिन्नप्रतियोगितात्वसंभवादतिरिक्तसामान्या
भावासिद्धिप्रसंगः एवमेकस्यैवाभावस्याधिकरणविशेषकालविशेषवृत्तित्वावच्छेदेनघटत्वपटत्वादिरूप
नानाधर्मावच्छिन्नप्रतियोगीतात्वसंभवेनाभावभेदविलोपप्रसंगः एवंरक्ताधिकरणकालावच्छेदेनरक्त
ध्वंसादेरक्तत्वावच्छिन्नप्रतियोगितात्वोपगमेतत्समानाधिकरणतत्सभनियतध्वंसायंतरस्यतत्समानाधि
करणैकत्वादेववातादृशकालावच्छेदेनतत्कल्पनमादायविनिगमनाविरहसंगश्चेतिध्वंसप्रागभावाधिकर
णेऽत्यंताभावकल्पनमेवन्याय्यंऽथैतादृशयुक्त्यारक्तध्वंसादिमतितदत्यंताभावसिद्धावपिरूपध्वंसादिम
त्यांपृथिव्यांरूपत्वावच्छिन्नाभावोनिर्युक्तिकएवेतिचेन्न।रूपोत्पत्तिद्वितीयक्षणेपुनस्तदधिकरणेसामान्य
सामग्रीबलात्तदुत्पांतरापत्तिवारणायरूपंप्रतिरूपत्वावच्छिन्नाभावस्यहेतुत्वंकल्पनीयंएवंचोत्पत्तिकालेपा

कादूपनाशोत्पत्ति[illegible]क्षणेचरूपत्वावच्छिन्नाभावस्वीकारेनदुक्तंरूपानुत्पादप्रसंगःरूपो
त्पादानंतरंरूपसामान्यस्यपुनरुत्पादश्चप्रागभावहेतुनयादुर्वारःरूपवत्यपिपाकजभाविरूपप्रागभावसत्वात्।
नचैवमपिपृथिव्यांरूपोत्पत्तेःप्राक्तनाभावोनिर्युक्तिकः यत्कालावच्छेदेनतत्रूपोत्पत्तेःप्राक्तनाभावोभवतास्वीक्रियतेतत्काला
वच्छेदेनरूपप्रागभावरूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणैवोपपत्तेरिति वाच्यं।दत्तोत्तरत्वात्।इदंतत्वधे
यंउक्तयुक्त्याउत्पत्तिकालावच्छेदेनघटादौरूपत्वावच्छिन्नाभावसिध्दावपिप्रलयकालावच्छेदेनपरमाण्वेतत्स
त्वेमानाभावः एवंरूपंप्रतिरूपत्वावच्छिन्नाभावहेतुत्वमेवनकल्प्यते।स्पर्शेपिसमनुरोधेनावश्यकल्पनीयस्पर्शसा
मान्याभावस्यतंप्रतिहेतुतयैवरूपवतिरूपांतरंप्रतिहेतुतोच्छेदेनशक्यवारणत्वात्।वायोस्पर्शोत्पत्त्यनंतरंस्पर्शोत्पत्तिवारण
यस्पर्शंप्रतिरूपाभावहेतुतायाःवक्तुमशक्यत्वात्।तन्त्रस्पर्शाभावहेतुतायाआवश्यकत्वात्।नचरूपंप्रति
स्पर्शाभावहेतुत्वेयत्रपाकोद्रूपसत्वेस्पर्शनाशस्तत्रस्पर्शांतरोत्पत्तिकालेरूपांतरोत्पादप्रसंगइतिवाच्यं।एक
जातीयस्यैवाग्निसंयोगस्यरूपरसगंधस्पर्शनाशकतयास्पर्शनाशकालेरूपनाशस्यावश्यकत्वात्।एवंघं

ता

स्ता

सप्रागभावाधिकरणसामपिकात्यंताभावानभ्युपगंतृमतेनादृग्यंताभावोनन्तदनधिकरणेषुकल्प्यतेअनंता
धिकरणेषुतादृग्भावकाल्पनामपेक्ष्यलाघवादेकेकेषुतत्धर्मावच्छिन्नवृद्धेदेषुतत्धर्मावच्छिन्नप्रतियोगिताकत्यं
ल्पनेनैवोपपत्तेरितिबाध्यंतत्सामानाधिकरण्यंप्रतियोगिसामानाधिकरण्यंसविशिष्टतिस्वयन्नाभावप्रतियो
गिसामानाधिकरण्यंग्राह्यंसएवहेत्वधिकरणावच्छेदनेतिहेतुतावच्छेदकसंबंधनहेतुतावच्छेदकावच्छिन्नाधि
करणंयत्तत्सामान्यांतर्भावेनेत्यर्थः।तेनवन्हेभावस्यधूमावयवावच्छेदनेद्रव्यंविशिष्टसत्वादित्यादौद्रव्यः
त्वाद्यभावस्यगुणाद्यवच्छेदनप्रतियोगिसामानाधिकरण्यविरहेपिनक्षतिःपर्वतादेःकालोपाधिवानभ्युपग
मेधूमवत्वप्रकारकभ्रमाविषयत्वाद्यभावस्यक्वचिदपिप्रतियोगिसामानाधिकरण्यस्योपपादयितुमशक्य
तयाधूमवान्वन्हेरित्यादौअतिव्याप्यप्रसक्तेर्दर्शितविवक्षायाःस्थलांतरेप्रयोजनमाहतेनगोत्वेतीतदूतिग
वादिमतिकालिकसंबंधेनगोत्वादिनागवादौसाध्यप्रलयांतर्भावेनव्यभिचारिणिगोत्वादिहेतोलक्षणघट
कानांगोत्वाद्यवच्छिन्नाभावानांगवादिमतिएतत्कालेगवाद्यनधिकरणदेशावच्छेदनमहाकालेचप्रलयाव

छेदेनवर्तमानतयाप्रतियोगिसामानाधिकरण्यमक्षतमेवएवंदैशिकविशेषणतागवादिव्यापकप्रलया
न्यत्वादेरभावोपितनसंबंधेनप्रलयान्यत्वादिमतिमहाकालेकालिकसंबंधेनवर्तमानतयाप्रतियोगिसमानाधिक
रण्यरूपप्रतियोगिसामानाधिकरण्यघटकीभूताभाववृत्तीसंबंधविशेषानिवेशादित्यतिव्याप्तिःस्यात्निरुक्तविव
क्षणेचस्वविशिष्टयावधेत्वधिकरणांतर्गतप्रलयांतर्भावेनतादृशाभावानांनप्रतियोगिसामानाधिकरण्यंप्रल
यतत्प्रतियोगिनोवृत्तिरितिसमुदायार्थःगवादिव्यापकस्यचरमध्वंसादेरभावस्ययोऽभावश्चरमध्वंसादिस्तस्य
गवादिमतिखंडकालेनप्रतियोगिसामानाधिकरण्यंतन्नतस्यावृत्तेरतोमहाकालेवर्त्तमानंमहाकालेचकालिक
संबंधेनवृत्तेस्तथात्वमक्षतमेवगगनाध्यक्षस्थलेव्यापकतावच्छेदकजन्यद्रव्यत्वप्रलयावृत्तित्वाद्यवच्छिन्नाभाव
मादायातिव्याप्तिवारणंनसंभवतीतिस्फुटीकरणायतद्रूपावच्छिन्नसाध्यकस्थलेप्यतिव्याप्तिमाहयत्रकालत्व
मित्यादिना।अथैवंतादृशविवक्षायक्षयालाघवात्प्रतियोगिसामानाधिकरण्यघटकाभावीयवृत्तौदैशिक
विशेषणताविशेषावच्छिन्नत्वमेवनिवेश्यनांतथासतिदैशिकविशेषणताविशेषसंबंधेनप्रलयान्यत्वादेरभा

वस्यप्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्युधारस्यशक्यत्वात्।नन्वेवंवन्हिमान्धूमादित्यादौकालिकविशे
षणतादिशेषसंबंधेनहेत्वधिकरणवृत्तेर्द्रव्यत्वादिनाद्रव्यत्वादेरभावस्यदेशिकविशेषणतयाद्रव्यवृत्तित्वाभा
वादव्याप्तिरितिवाच्यंहेतुसामानाधिकरण्यशरीरेपिअभावीयवृत्तेर्देशिकविशेषणतासंबंधावच्छिन्नवस्यनि
वेशनीयत्वात्।तावतापिलाघवान्नायात्।नन्वेदेशिकविशेषणतयाविशेषणप्रतियोगिसामानाधिकरण्यनिवेशे
पिउक्तस्थलेऽतिव्याप्तिस्तदवस्थैवप्रलयान्यत्वाभावस्यप्रलयमानवृत्तेरभावमात्राधिकरणकतयाप्रलयास
काधिकरणस्वरूपत्वात्तस्यप्रलयान्यत्वरूपप्रतियोग्यधिकरणपरमाण्वादेर्देशिकविशेषणतयावृत्तेरितिवा
च्यं।एवमपिप्रलयान्यकालत्वादेरभावस्यप्रलयातिरिक्तगगनादावपिवर्तमानस्यप्रलयानासकतयाप्रतियो
गिसामानाधिकरण्यदुरुपपादतयातिव्याप्यनवकाशत्वात्।नवादेशिकविशेषणतयाप्रतियोगिसामानाधिक
रण्यप्रवेशेपिदेशिकविशेषणतासंबंधेनप्रलयावृत्तिसाध्यकालत्वादिहतावतिव्याप्तिर्दुर्वारेवतलप्रलय
भावस्यव्यभिचारनिरूपकाधिकरणतयासाध्यतावच्छेदकसंबंधेनसाध्यप्रतियोगितावच्छेदिकायदभा

वप्रतियोगिताव्यापकतावच्छेदकसंबंधावच्छिन्नप्रतियोगीताकस्यतस्यप्रलयमात्रवृत्तितयाप्रलयात्मकत्वान्निरु
क्तरीत्यैवप्रतियोगिसामानाधिकरण्यात्इतरसंबंधावच्छिन्नाभावस्यप्रलयान्यवृत्तितयाप्रलयानात्मकत्वेपिस्व
तरामेवप्रतियोगिसमानाधिकरणत्वादितिनिरुक्तविवक्षणमावश्यकमतदभिप्रेत्यैवप्रलयावृत्तिसाध्यका
नुसरणंग्रंथकृतइतिवस्तुतस्तुप्रलयादिमात्रवृत्तेरभावस्यप्रलयान्यनात्मकत्वेपिदर्शितस्थलेषुउक्तविवक्षा
मंतरेणातिव्याप्तिवारणमशक्यंप्रलयान्यत्वादेरभावस्यापिस्वप्रतियोगिनिरूप्यव्यापकतावच्छेदकस्वरूपसंबंधेन
प्रलयात्मकनानाध्वंसांतर्गतयत्किंचिध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनोऽधिकरणेषुध्वंसांतरेषु
स्वप्रतियोगिसमानाधिकरणत्वात्।यत्किंचिध्वंसान्यत्वाभावस्यतध्वंसमात्रवृत्तेस्तध्वंसवृत्तित्वविशिष्टस्वाभा
वाधिकरणध्वंसांतरसत्वेपिकालिकसंबंधावच्छिन्नप्रतियोगिनाकस्वाभावस्यस्वानधिकरणध्वंसांतरावच्छे
देनस्वाधिकरणेपिसत्वेननतेनैवतत्प्रतियोगिसमानाधिकरणत्वात्प्रलयान्यत्वोपलक्षितप्रमायाविषयता
संबंधेनकेवलान्वयितयातादृशसंबंधावच्छिन्नतादृशप्रमाभावाप्रसिद्धेःप्रलयान्यत्वविशिष्टप्रमाभावस्यप्र

ल्येप्रसिद्धावपिप्रलयतदन्यविषयकनित्यप्रमानूपप्रतियोगिसमानाधिकरणत्वात्प्रलयाविषयकं जन्य प्रमाभावस्यच
जन्यप्रमामानप्रतियोगिकतयाकालिकाव्याप्यवृत्तितया प्रतियोगिमत्यपितद्ध्वंसकालावच्छेदेनवृत्तेस्तादृशाभा
वमादायातिव्याप्तिवारणसंभवात्। उक्तविवक्षणेतुप्रलयेप्रलयाविषयकप्रमाभावस्यविषयतयाप्रतियोगिसा
मानाधिकरण्यविरहादतिव्याप्तिवारणसंभवः एवमुक्तरीत्याघटत्वाभाववान्मेयत्वादित्यादौव्याप्तिर्बोध्याहेतुमति
प्रतिप्रलयइतिहेतुमत्सामान्यांतर्गतप्रलयांतर्भावेनेत्यर्थः।तत्सामानाधिकरण्याभावात्गवादिरूपप्रतियोगि
सामानाधिकरण्याभावात्।अत्रगवादेरभावस्यसनुपज्यतेहेतुमतिस्ववैशिष्ट्यनिवेशफलमाह।स्वविशिष्ट
नीतिसांप्रदायिकैर्द्रव्यसंयोगसामान्याभावानभ्युपगमात्साध्यतुल्यार्थकपिसंयोगाभावपर्यंतानुधावनंसकलहेत्व
धिकरणवृत्तित्वपीतिनित्यगुणादौ कनापिसंबंधेनकपिसंयोगासत्वादितिभावः। एतेनहेत्वधिकरणसामा
न्यांतर्भावेनप्रतियोगिसामानाधिकरण्यंनास्तीतिसूचितंनाव्याप्तिरितिनित्यगुणादेःस्वविशिष्टत्वाभावात्तदंत
र्भावेऽप्यतथात्वेपिस्वविशिष्टहेत्वधिकरणांतर्भावेनतथात्वस्याक्षतत्वात्।अत्रव्यापकताघटकाभावउक्तयुक्त्याप्र

इतिभावः

जन्य

प्र० स्व०

व्या०

तियोगिवैय्यधिकरण्यस्यप्रवेशनीयतयासाध्यवद्यत्किंचिद्व्यक्त्यसंबंधस्वविशिष्टसामान्यकभिन्नत्वरूपव्यापकतावच्छेदकस्यनिवेशनीयतयावाकपिसंयोगाभावादिनिष्ठप्रतियोगितायाअपिव्यापकतावच्छेदकत्वनिर्वाहइत्यभिप्रेत्यकपिसंयोगाद्यात्मकाभावमादायाव्याप्तिरुक्ता[क]अन्यथापुनःसत्तावान्जातेरित्यादौकालिकसंबंधेनहेतुसामानाधिकरण्यंनासत्तात्वावच्छिन्नसत्ताद्यभावान्नहेत्वधिकरणसामान्यांतर्गतगगनाद्यंतर्भावेनप्रतियोगिसामानाधिकरण्यविरहप्रसक्त्यासर्वत्रसाध्यस्यविशिष्टतिविरोगमावश्यकमितिआदिपदग्राह्यमपितादृशस्थलमेवेत्यपिबोध्यं॥अत्रचसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकायावंतोभावाःप्रसंकहेतुतावच्छेदकविशिष्टाधिकरणसामान्यांतर्भवितयत्रकचित्पदार्थेतत्प्रतियोगिसामानाधिकरण्यंसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकायावंतोभावाःयत्रूपविशिष्टाधिकरणवृत्तिव्यापकतावच्छेदकप्रतियोगिताकाःतद्रूपवत्त्वमित्यादिकंतादृशाभावेहेतुसामानाधिकरण्यविशेषणघटितंहेत्वधिकरणेस्वविशिष्टत्वविशेषणघटितंचैवंधिकरणधर्मावच्छिन्नाभावघटितंलघुलक्षणंसंभवतीतिबोध्यं॥ननुधूमवान्वह्नेरित्यादावति

यत्

व्याप्तिः धूमाभावादपिअयोगोलकादौगोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वात्।गोत्वाद्यभावस्यतत्प्र
तियोगित्वंचधूमाभावेजलवृत्तित्वविशिष्टगोत्वाभावोनास्तीतिप्रतीतिनियामकाभावस्याभावाधिकरणकाभा
वप्रतियोगिकाभावतयाधिकरणीभूतधूमाभावस्वरूपत्वात्जलवृत्तित्वविशिष्टगोत्वाद्यभावस्यस्वधर्मिविशेष्या
नतिरिक्तत्वादियांश्चयंजलवृत्तित्वविशिष्टगोत्वाभावोभावस्यधूमाभावातिरिक्तकूटाभावस्वरूपतांप्रदर्श्य
नूतत्वस्वरूपतांप्रतिक्षिपतिजलेत्यादिनानचधूमाभावस्यस्वप्रतियोगितिष्ठव्यापकताघटकयावत्संबंधांतर्गतसं
योगसंबंधेनप्रतियोगिसामानाधिकरण्यविरहात्कथमतिव्याप्तिरुक्तेतिवाच्यंजलवृत्तित्वविशिष्टगोत्वाभावद्र
व्यान्यतराभावस्याप्युक्तयुक्त्याधूमाभावस्वरूपतासंभवात्तत्संयोगसंबंधेनद्रव्यात्मकप्रतियोगिनेवसमानाधि
करणत्वात्।नचैवंजलेवृत्तिद्रव्यमवतत्प्रतियोगितस्यैवप्रतियोगितावच्छेदकजलवृत्तित्ववैशिष्ट्यानवांतत्वात्
तस्यचधूमाभावविशिष्टसकलवह्निमतिवृत्तौमानाभावान्नातिव्याप्तिः प्रसज्यतेयदिजलवृत्तित्ववैशि
ष्ट्यंअन्यतरत्वघटकीभूतभेदप्रतियोगिनिगोत्वाभावत्वावच्छिन्नएवविशेषणंनतुभेदत्वावच्छिन्नेविशेष

णतयाप्रतियोगितावच्छेदकमितिजलावृत्तिद्रव्यस्यापितत्प्रतियोगित्वमिष्यते। तदातादृशाभावस्य विशिष्टाभा
वात्मकतयाअन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणधूमाभावाधिकरणकत्वानुपप
त्तिरितिवाच्यंजलवृत्तिद्रव्यंधूमाभावविशिष्यादृशहेत्वधिकरणे नियमतोवर्तेतेतादृशव्यभिचारिहेतुकस्थले
एवधूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यमादायातिव्याप्तिमाशंक्यजलवृत्तीयादि
ग्रंथस्यावतरणीयत्वात्। नचैवंतादृशगन्यतराभावस्यैवधूमाभावात्मरूपतायाप्रतिक्षेपउचितइतिविशिष्टगोत्वाभाव
स्याभावइतिग्रंथासंगतिर्दुर्वारिवेतिवाच्यंतादृशग्रंथस्यापिगोत्वाभावप्रतियोगिकाभावत्वेनरूपेणजलवृत्तित्व
विशिष्टतादृशगन्यतरत्वावच्छिन्नाभावपरत्वात्। नचैवमपिअयोगोलकभेदाद्यभावस्यायोगोलकत्वादिरूपभावा
त्मकस्यस्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपतावि रहात्तस्यप्रतियोगिसामानाधिकरण्येनघटतद्
व्यतिव्याप्यप्रसक्तिःसाध्यतावच्छेदकसंबंधेनव्यापकतायालक्षणघटकत्वंप्रागेवदूषितंअतोनायोगोलकाद्य
त्वाद्यभावस्यलक्षणघटकतसंभवइतिवाच्यं।अयोगोलकभेदाभावादेरपिपूर्वक्षणवृत्तित्वविशिष्टस्वाभाव

रूपप्रतियोगिसामानाधिकरण्यसंभवात्‌ नन्वेवं धूमाभावस्यगोत्वाभावाद्यप्रतियोगिकत्वेपिपूर्वक्षणवृत्तित्वविशि
ष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभवादतिव्याप्तितादवस्थ्यमितिवाच्यंतादृशप्रतियोगिनःस्वप्रति
योगिनिष्ठव्यापकताघटकयावत्संबंधांतर्गतसंयोगादिनासामानाधिकरण्यविरहात्‌ घटत्वाभाववान्मयत्वा
दित्यादावपिघटत्वाभावादिप्रकारकजन्यप्रमाभावस्ययावद्व्यापकताघटकसंबंधांतर्गतविशेष्यतासंबंधेनप्र
तियोगिसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात्‌नन्वेवंजलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभा
वस्यधूमाद्यभावस्वरूपतयासंयोगेनप्रतियोगीसामानाधिकरण्यसंभवेपिधूमवत्वप्रकारकप्रमाभावस्यया
वद्व्यापकताघटकसंबंधांतर्गतविशेष्यतासंबंधेनप्रतियोगिसामानाधिकरण्यासंभवात्‌धूमवान्वह्नेरित्यादा
वतिव्याप्त्यप्रसक्त्यातादृशभावस्यधूमभावस्वरूपताप्रतिक्षेपानयुक्तइतिवाच्यंतादृशभावस्यतत्स्वरूपत्वेनु
क्त्यायुक्त्याधूमवत्वप्रकारकप्रमाभावनिष्ठस्यजलादिवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारकप्रमान्यतराभा
वस्यतत्स्वरूपतयाद्रव्यत्वप्रकारकप्रमायाअपितत्प्रतियोगित्वेनतयैवसंविशेष्यतासंबंधेनतादृशभावस्य

प्र० स्व०

सामानाधिकरण्यसत्वादतिव्याप्तिप्रसक्तिरिति नन्वेवमपि धूमवान्वह्नेरिति सादावतिव्याप्तिर्दुर्वारा उक्ताभावस्यज्ञलताद्य
भावस्वरूपत्वेनतुल्ययुक्त्या धूमवद्वृत्तित्वविशिष्टतादृशाभावस्य धूमाभावस्वरूपत्वेनद्रव्यसामान्यस्यतत्प्रतियोगिता
नपायात् एवंधूमाद्यभावस्यधूमत्वादिनाप्रमेयसामान्याभावसमनियतत्वेनतदभिन्नत्वोपगमात् प्रमेयमात्र
स्येवतत्प्रतियोगित्वात्यत्किंचिधूमत्वादिनाप्रमेयंनास्तीतिप्रतीतेर्धूममात्रस्यैवप्रतियोगित्वग्रहः नतुप्रमेयांत
रस्यअथवा प्रतियोगिसामानाधिकरण्यभ्रमेरिस्वत्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगितानिवे
शनीया एवंचतादृशप्रतियोगिताकोहेतुसमानाधिकरणाभावोग्राह्यः यावत्प्रमेयनिष्ठप्रतियोगितावत्तथावि
धधूमत्वाद्यवच्छिन्नैवतादृशधर्मानवच्छिन्नाचधूमादिमात्रवृत्तिप्रतियोगितैवतदाश्रयसामानाधिकरण्यंचनायो
गोलकाद्यंतर्भावेनेतिमन्यतेतथापिधूमाभावस्यवह्निधूमाभयाभावसमनियततयातदभिन्नत्वेनवह्नेरपि
तदभावप्रतियोगितयायोगोलकान्यत्वाभावस्यायोगोलकान्यवृत्तित्वविशिष्टाकाशभावाभावसमनियततया
तदभिन्नत्वेनाकाशभावस्यापितत्प्रतियोगितया धूमवत्वादिप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशि

ष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियतत्वया द्रव्यत्वप्रकारकप्रमाया अपितत्प्रतियोगित्वेन धूमवद्भेदस्य धूमव
त्वसंभिन्नाभावसमनियतत्वात्तदभिन्नत्वेनसन्मात्रस्येव तत्प्रतियोगितया हेतुसमानाधिकरणता
दृश्याभावानांस्वविशिष्टयावधेयावधिकरणांतर्भावेण दर्शितप्रतियोगिभिःसामानाधिकरण्यमक्षतमेवेयति
व्याप्तिः अथसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिकायायाप्रतियोगितातन्निरूपकाभावानांस्वविशिष्ट
यावधेयावधिकरणावच्छेदकतत्तत्प्रतियोगिताश्रयसामानाधिकरण्यंविवक्षणीयमितिनातिव्याप्तिरितिचेन्न
हितादृशीयायाप्रतियोगितात दाश्रयसामानाधिकरण्यंयत्रकत्रचिद्यावद्यधिकरणांतर्भावेनतत्वमिये २
तावतैवसामंजस्येअभावे यावत्त्वस्यतत्प्रतियोगितानिरूपकत्वस्यहेतुसामानाधिकरण्यविशेषस्येणहेत्वधि
करणेचस्वविशिष्टतविशेषणस्यैवैय्यर्थ्यप्रसंगः एवंसर्वत्रहेतुसमानाधिकरणमुभयत्वाद्यवच्छिन्नप्रति
योगिताकसाध्याभावमादायलक्षणसमन्वयसंभवाद्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेपि
क्षतिविरहेण तादृशव्याप्तिलक्षणशंकायांप्रतियोग्यवृत्तिश्चयेनतादृशभावखंडनस्यासंगतापत्तिरि

एवं धूमाभावाधिकरणकधूमवद्वृत्तिविशिष्टगोत्वाभावद्रव्यान्यतराभावस्यधूमाभावस्वरूपेपितादृशाभावप्रतियोगितावच्छेदकधूमवद्वृत्तिविशिष्टावच्छिन्नसमानाधिकरणतादृशाभावस्यचविशिष्टहेत्वधिकरणतत्समानाधिकरण्यविरहेणानातिव्याप्तिः७

स्वतोलक्षणांतरमाह। यत्तत्समानाधिकरणेति अत्रापियत्तत्पदयोः पूर्ववत्तेन धर्मावच्छिन्नधरत्वावच्छिन्नाधेयत्वनिरूपितवह्निमान् धूमादित्यादेरसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावोवह्नितेनघटाद्यभावारवृत्तेर्वाचस्वविशिष्टयावधेयावधिकरणांतर्भावेणवह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतथालक्षणसमन्वयः अत्रापिप्रतियोगिसामानाधिकरण्यनिवेशउत्तरीत्या धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः तथाचधूमाद्यभावानां वह्निधूमाभयत्वाद्यवच्छिन्नप्रतियोगिताश्रयवह्न्यादिनासामानाधिकरण्यसत्वेपिप्रतियोगितावच्छेदकीभूतनादृशाभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः द्रव्यत्वेन धूमोनास्तीत्यादिप्रतीत्यासद्द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वेनभासतेअपितु धूमत्वादेरेवद्रव्यत्वादिरूपतृतीयोल्लिखितेवशिष्यमात्रंधूमादौभासतइत्यपेयतेअतस्तादृशप्रतीतिविषयाभावस्यधूमाभावादिसमानियतत्वात्तत्प्रतियोगिताभावत्वास्वाश्रयप्रतियोगितात्वरूपवैशिष्ट्यवच्छेदकद्रव्यत्वादिकमपिधूमाद्यभावप्रतियोगिता

वच्छेदकमितिप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरण्यविवक्षणेप्यतिव्याप्तिर्दुर्वारा।नाशंकायानावकाशः
रूपेण धूमकालावच्छिन्नधूमवह्नित्वविशिष्टस्यवन्ह्यभावस्तस्यधूमाभावसमनियततयावन्हि
त्वमपिधूमाभावप्रतियोगितावच्छेदकमित्यपास्तंवन्हित्वेनतादृशधूमवह्नित्वविशिष्टंनास्तीतिप्रतीतोता
दृशधूमवह्नित्वविशिष्टस्यवप्रतियोगितावच्छेदकत्वावगाहिलोपगमात्।अन्यथाधूमवह्नित्वविशिष्टव
ह्निमतिधूमश्रत्यवन्हित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्वेनतादृशप्रतीतिमुदय
प्रसंगात्।अस्तुवातादृशवैशिष्ट्यसहितस्यवन्हित्वस्यतथात्वंतावतापिनक्षतिः।प्रतियोगितावच्छेदकपद
स्यप्रतियोगितावच्छेदकतात्पर्यग्राह्यधिकरणपरत्वात्।अथैवमपिघटभिन्नत्वेन धूमघटान्यतरन्नास्तीति
त्रघटधूमान्यतरत्वमात्रस्यनप्रतियोगितावच्छेदकत्वभानं धूमश्रत्यघटवतितादृशप्रतीत्यनुपपत्तेः।ना
पिघटभिन्नत्वसहितस्यतस्यगौरवात्।किंतुघटभिन्नत्वमात्रस्यैवएवंचतादृशाभावस्यधूमाभावसमनिय
ततयाधूमाभावस्यापिघटभिन्नत्वंप्रतियोगितावच्छेदकंएवंभेदत्वेनायोगोलकभेदघटासंताभावान्य

तराभावस्यायोगोलकभेदावच्छिन्नाभावसमनियततयाभेदत्वमप्ययोगोलकभेदाभावप्रतियोगितावच्छेदकं
एवंद्रव्यत्वभिन्नत्वेनद्रव्यत्वधर्मतान्यतराभावस्यधूमभेदसमनियततयाद्रव्यत्वभिन्नत्वमपिधर्मभेदप्रतियो
गितावच्छेदकंएवंइच्छान्यत्वमनइच्छायोगोलकाविषयकज्ञानान्यतराभावादनतिरिक्तं योगोलकाविषयकज्ञा
नाभावस्यइच्छान्यत्वमपिप्रतियोगितावच्छेदकंतादृशधर्मावच्छिन्नानांचायोगोलकादावपिसत्वादतिव्याप्तिरतद
वस्थेवेतिचेन्नतर्हिप्रतियोगितावच्छेदकयननप्रतियोगितायान्यूनवृत्तिभिन्नंसद्यदवच्छेदकंतदवच्छिन्नत्वं
यन्न्यूनवृत्तिर्यःसमानाधिकरणभेदप्रतियोगितावच्छेदकवंसतिसमानाधिकरणत्वंतद्भिन्नत्वंचव्यधिक
रणधर्मसाधारणंघटध्वंसान्यतरादिनिष्ठप्रतियोगितायाश्चन्यूनवृत्तियवघटभिन्नत्वादिकंनवह्नित्वेनप्र
मेयंनास्तीयत्रप्रमेयसामान्यवृत्तिस्तेनवह्नित्वावच्छिन्नप्रतियोगितायाप्रतीयतवह्निर्नास्तीयत्रापिवह्निर
त्तितयासेवप्रतीयतइत्यपपयतएकधर्मावच्छिन्नविभिन्नप्रतियोगिताकल्पनेगौरवात्।तथाचकालिकादि
संबंधेनहेतुसमानाधिकरणवह्नित्वावच्छिन्नवध्यभावप्रतियोगितायान्यूनवृत्तिभिन्नावच्छेदकाप्रसि

ध्याप्यवृत्तिरितिवाच्यं।वह्नित्वेनप्रमेयंनास्तीतिप्रतीतेःप्रमेयत्वविशेषितस्यवह्नेरेवप्रतियोगित्वंभासतेनान्य
स्यस्यानुपगमइतितादृशाभावप्रतियोगितायाःप्रमेयसामान्यवृत्तित्वस्यैवासिद्धेः।अथवाप्रतियोगितावच्छेद
कपदंप्रतियोगितायाअनतिरिक्तवृत्तिसंघटवच्छेदकंतथाचंअनतिरिक्तवृत्तित्वंचस्वव्यापकतत्कात्यवत्तत्सा
मानाधिकरण्योभयाभाववत्त्वंतथात्वंचव्यधिकरणधर्मसाधारणमपिघटध्वंसान्यतरादिनिष्ठप्रतियोगि
तायाश्चातिरिक्तत्वंसवघटभिन्नत्वादिकंतादृशप्रतियोगितायायावद्घटभिन्नादिसाधारण्यप्रसक्तःवह्नित्वाद्य
वच्छिन्नप्रतियोगितायाश्चप्रमेयसामान्यवृत्तित्वेपितदनतिरिक्तत्वंसवच्छेदकंवह्नित्वादिकमेवस्वव्यापकत
त्कात्यत्वसामानाधिकरण्योपसिद्धत्वादितिनानुपपत्तिगंधोपीतिप्रतियोगितायाःस्वन्यूनवृत्तिभिन्नायाःयदवच्छेद
कंतदवच्छिन्नसामानाधिकरण्यंवाविवक्षितंन्यूनवृत्तित्वंसामानाधिकरण्यघटितमितिव्यधिकरणधर्म
संग्रहःतत्प्रतियोगितासमानाधिकरणंसत्यंतत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकंतदन्यन
प्रतियोगितावच्छेदकंवानिवेश्यं॥तल्लक्ष्यगसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका

भावनिवेशेवन्हिमानूधूमादिसादौवन्हित्वादिनाघटाद्यभावसमनियतत्वेनघटत्वादिना वन्ह्याद्यभावस्यहेत्वधिक
रणावच्छेदेनवन्हित्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसंभवेपिवन्हि घटोभयत्वावच्छिन्ना
भावस्यापितथाविधतयातस्यप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावनासंभवइतोवापकतावच्छेद
कनूपावच्छिन्नप्रतियोगिताकत्वमुक्तंअतएवाधिकरणधर्मावच्छिन्नाभावेनव्युपगमेहेतुसमानाधिकरण्यस्सा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकनूपावच्छिन्नाभावस्याप्रसिध्यासंभवः अयमात्माज्ञानादित्यादौकेवला
न्वयिसाध्यकव्याप्तिर्वाभवतीत्यभिप्रायकतयाप्रतियोग्यवृत्तिश्चेत्यादिग्रंथसंगतिः नचायमात्माज्ञानादिसा
दौपूर्वक्षणादिवृत्तित्वविशिष्टात्मत्वादेरात्मत्वादिव्यापकतावच्छेदकतयातदवच्छिन्नाभावस्योत्तरक्षणावच्छेदेन
हेतुसमानाधिकरणतयाइदंवाच्यंज्ञेयत्वात्गुणत्वादित्यादावपिपूर्वक्षणान्यक्षणवृत्तित्वविशिष्टवाच्यत्वादेर्वि
षयतासंबंधेनजन्यज्ञानत्वविश्वविषयकजन्यज्ञाननिष्ठतज्ज्ञप्तित्वादेः साध्यव्यापकतावच्छेदकतयातदवच्छिन्ना
भावस्यचैतत्क्षणावच्छेदेनप्रलयादर्भावेनवहेतुसमानाधिकरणतयाव्यधिकरणधर्मावच्छिन्नाभावानभ्युपग

मेपिनतादृशसंबंधाप्रसिद्धेरितिवाच्यं। प्रतियोगिवैय्यधिकरण्यघटितव्यापकतायाएवनिवेशनीयतयानिरुक्तधर्मा
वच्छिन्नाभावानामपिसाध्यवतिसत्वेनतादृशधर्मावच्छिन्नंप्रतियोगितावच्छेदकत्वासंभवात्तत्रचसाध्यतावच्छेदकावच्छिन्नप्र
तियोगिताकाभावएवकिंनिक्ष्यतेप्रमेयसाध्यकस्थलेसंयोगसंबंधावच्छिन्नप्रमेय
त्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादायलक्षणसमन्वयादितिवाच्यं। तथासतिलघुरूपसम्प्रतियत
गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेनतद्रूपावच्छिन्नसाध्यकतथाविधाभावाप्रसिध्योव्याप्यापत्तेः अ
त्रचज्ञानवानात्मामहाकालान्यतरवादित्यादावतिव्याप्तिवारणायसाध्यतावच्छेदकसंबंधेनव्यापकत्वतत्रैव
संबंधेनप्रतियोगिसामानाधिकरण्यंविवक्षणीयंमहाकालान्यत्वविशिष्टघटादिसाध्यकस्थलेकालत्वाद
व्यभिचारित्वेपितत्रहेतुसमानाधिकरणस्यमहाकालान्यत्वविशिष्टघटाद्यभावस्यप्रतियोगितावच्छेदकवि
शिष्टसामानाधिकरण्याभावेनातिव्याप्त्यभावात्। तादात्म्यसंबंधेनप्रमेयसाध्यकेतादृशसंबंधेनसाध्यंप्र
तितादृशसंबंधेनव्यापकतायामवच्छेदकीभूतायः प्रमेयत्वादिरूपकेवलान्वयिधर्मस्तदवच्छिन्नस्यसंयोग

दि समवायिविषयितासंबंधावच्छिन्नाभावमादायैव लक्षणसमन्वयसंभवात्। अभाव प्रतियोगितायांसाध्यतावच्छेद
कसंबंधावच्छिन्नत्वस्यप्रयोजनविरहेणानिवेशात्तन्निवेशेपिव्यधिकरणसमवायित्वावच्छिन्नप्रतियोगितावच्छे
दकनाकप्रमेयत्वादिमद्वृदमादायलक्षणसमन्वयसंभवात्। समवायितयावाच्यत्ववद्वृदापिद्रष्टव्यइतिमिश्राःत्वा
नादृशमेदस्यापिसांदृसमतत्वादितिकेचित्। तदसत्। घटत्वाभाववान्प्रमेयत्वादित्यादौपूर्वोक्तदिशातिव्याप्तेः
स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्संबंधेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकर
ण्यनिवेशनमपिनसत्। तथासतिइदंवाच्यंज्ञेयत्वादित्यादौविषयतासंयोगादिसंबंधावच्छिन्नप्रतियोगिता
काभावमादायव्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपिलक्षणसामंजस्यात्प्रतियोग्यवृत्तिश्चेतिग्रंथाच
तारसंगतेः। एतेन विषयतासंबंधेनव्यापकतातेनैवसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकर
ण्यंविवक्षणीयंसाध्यवत्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादायसर्वत्रलक्षणसंगमनमतिव्याप्तिवार
णंचेतिनिरस्तंज्ञेयत्वत्वादिनावाच्यत्वादीनामभावइत्यतादृशग्रंथासंगतेश्चज्ञेयत्वस्यज्ञानविषयतात्मक

स्वविषयतासंबंधेनाव्यापकत्वात्किंतु स्वप्रतियोगितावच्छेदकसंबंधेन व्यापकत्वंतेनैव प्रतियोगितावच्छेदका
वच्छिन्नभावसामानाधिकरण्यं विवक्षणीयंव्यभिचारिणिसाध्याभावस्यकिंचिद्विशिष्टस्वाभावनिष्ठप्रतियो
गितावच्छेदकविशेषणतादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्येपित
दवच्छिन्नभावसामानाधिकरण्यासंभवान्नातिव्याप्तिः किंचिद्विशिष्टस्यस्वस्याभावः सामानाधिकरण्यसं
बंधेनतद्विशिष्टस्याभावश्चविशिष्टस्वसमनियतोपिस्वस्मादतिरिक्तरिक्तएव अभावमात्रप्रतियोगिकाभा
वस्येवतदभावप्रतियोगिरूपतायाःसिद्धांतसिद्धत्वात् अतोधूमाद्यभावस्यसामानाधिकरण्यसंबंधेनह्र
दादिरत्तित्वविशिष्टधूमाद्यभावाभावविशिष्टत्वावच्छिन्नभावसामानाधिकरण्येपिनक्षतिः यैयावद्भावाना
मित्यत्राभावपदंभावभिन्नपरंअतःकालिकादिसंबंधेनहेतुसमानाधिकरणसमवन्ध्यादिव्यापकतावच्छेदक
रूपावच्छिन्नह्रदत्वाद्यभावाभावस्यह्रदत्वादेःस्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासंभ
वेपिनक्षतिः नचह्रदत्वाभावाभावस्यह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियततयास्वप्रतियोगि

७ रूपतत्स्वप्रतियोगितावच्छेदकावच्छिन्नभावत्वविशेषणमुपेक्ष्यप्रतियोगितावच्छेदकत्वाभावादित्यंनिवेशनीयं।तादृशाभावविशिष्टत्वंचतादृशाभावसाधारणमितिनदोषः॥७

तावच्छेदकतादृशप्रमाविषयत्वावच्छिन्नभावसामानाधिकरण्यमस्यवेतिवाच्यंतस्यभावत्वेनाभिन्नत्वात् एवं
सतिकपिसंयोगाभाववान्मेयत्वादित्यादौकपिसंयोगात्मकाभावस्यलक्षणघटकत्वेपिविवक्षणीयस्वविधि
ष्टस्यसार्थकता पूर्वदिग्वर्तेयानन्यभावभिन्नाभाववविवक्षणेपि अयमस्माज्जानादिसादौदेशिकविशेष
णतयाहेतुसमानाधिकरणस्यसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसंबंधावच्छिन्नप्रति
योगिताकाकाशगभावाभाववत्तावच्छिन्नप्रतियोगिताकस्याकाशगभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्न
भावसामानाधिकरण्यासंभवाल्लक्षणसमन्वयासंभवइतिवाच्यं।आकाशगभावीयतादृशगभावत्वस्यदे
शिकविशेषणतयासाध्यवृत्तेराकाशगभावस्यप्रतियोगितावच्छेदकतयासाध्यव्यापकतावच्छेदकत्वविर
हेणतदवच्छिन्नाभावस्यलक्षणघटकत्वात् अस्तुवाव्यापकतावच्छेदकरूपत्वभाववृत्तित्वविशेषणंदृदं
वाच्यंज्ञेयत्वादित्यादौचव्यधिकरणसंबंधावच्छिन्नप्रतियोगित्ताकवाच्यत्वाच्यभावस्यप्रतियोगितावच्छेद
कंनप्रतियोगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकमतस्तादृशभावस्यनलक्षणघटकतेतिनाक्त

प्रतियोग्यरत्तिश्चेत्यादिग्रंथासंगतिरिति नच प्रतियोगितावच्छेदकसंबंधेनव्यापकताविवक्षणेदंवाच्यंज्ञेयत्वा
दिसादौविषयितासंबंधेनवाच्यत्वादिमतोज्ञानादेर्यः स्वरूपसंबंधेनाभावस्तस्य स्वप्रतियोगितावच्छेदकीभू
तस्वरूपसंबंधघटितवाच्यतनिरूप्यापकतावच्छेदकवाच्यत्वाद्यवच्छिन्नप्रतियोगितात्वेहेतुसमानाधि
करणतयास्वरूपसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतयावत्तन्न्यधिक
रणधर्मावच्छिन्नाभावानभ्युपगमेपितमादायैवलक्षणसामंजस्यमितितादृशग्रंथासंगतितादवस्थ्यमि
तिवाच्यं। धूमवान्वह्नेरित्यादौसंयोगसंबंधावच्छिन्नप्रतियोगिताकधूमाद्यभावस्यकालिकसंबंधेनधूमत्वा
दिविशिष्टवन्त्वादिनासमंसंयोगेनासमवायादिसंबंधावच्छिन्नप्रतियोगिताकस्यायोगोलकावृत्तिजा
तित्वाद्यवच्छिन्नाभावस्यकालिकसंबंधेनतादृशजातित्वादिविशिष्टायोगोलकीयरूपादिनासमंसमावा
येनासंबंधावच्छिन्नप्रतियोगिताकस्यधूमवत्प्रकारकममाविषयतायाद्यभावस्यकालिकसंबंधेन
तादृशविषयतत्वादिविशिष्टसंयोगादिध्वंसेनाऽनुयोगितासंबंधेनतादृशविषयत्वादिविशिष्टताद्

त्वादिव्यापकतानवच्छेदकत्वाद्घ्यत्वादिसाध्यकस्थलेनतादृशभावानांलक्षणघटकतातथाचतादृशभावएव दुर्लभइत्यतआह।ज्ञेयत्वादिनेतिवाच्यत्वादीनामिसादिपदाद्घटादेरपिपरिग्रहःशेषमितिस्वविशिष्टयावधे त्वधिकरणांतर्भावेनप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनंहेतुसामानाधिकरण्यशरीरे संबंधविशेषनिवेशनंतत्प्रयोजनंचेत्यर्थः। अत्रचनिरुक्ताभावेषुस्वविशिष्टहेत्वधिकरणसामान्यांतर्भावेनप्र तियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशापेक्षयाप्रतियोगिवृत्तित्वमेवनिवेशयितुमुचितंस धेतोव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानांतादृशभावानांकेवलान्वयितयाप्रतियोगिव्यधिकृत्तलक्ष णसमन्वयसंभवात्।वह्निमान्धूमादित्यादौकालिकादिसंबंधेनहेतुसमानाधिकरणस्यनूपान्यत्वप्रकारकप्र माविषयतायाभावस्यदेशिकविशेषणतयाहेतुसामानाधिकरण्यनिवेशेनवह्न्यादिभेदस्यप्रतियोगितावच्छे दकतादात्म्यसंबंधघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेणचलक्षणघटकतयाप्रति योग्यवृत्तित्वेपिनक्षतिःकपिसंयोगाभाववान्मेयत्वादित्यादौकपिसंयोगादेरप्रसिद्धेरीसाव्यापकतावच्छेदकरू

यावच्छिन्नप्रतियोगिताकत्वविरहेणदेशिकविशेषणतया हेतुसामानाधिकरण्यविरहेणभावभिन्नत्वविरहेणच
लक्षणघटकतयाप्रतियोग्यवृत्तित्वेपिनक्षतिःधूमवान्वह्नेरित्यादौधूमाद्यभावस्यप्रतियोगिवृत्तित्वेपिअयोगो
लकान्यत्वप्रकारकप्रमाविषयत्वाभावस्यभावप्रतियोगिकतयायोगोलकत्वाद्यतिरिक्तस्यप्रतियोग्यवृत्ति
त्वान्नातिव्याप्तिरित्यवधेयं।चक्रवर्तिलक्षणन्तुनाहकत्वितिव्याप्यवृत्तेरितिसाध्येतोसाध्यावृत्तिघटत्वादिना
साध्याभावावलक्षणघटकःतत्प्रतियोगितानवच्छेदकत्वस्यसाध्यतावच्छेदकेसत्वालक्षणसमन्वयः।व्यभि
चारिणिसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापिलक्षणघटकत्वान्नातिव्याप्तिःकपिसंयोगिएतद्वृक्षत्वा
दित्यादौअव्याप्तेर्वारणायव्याप्यवृत्तेरितिवैयर्थ्यंनिरवच्छिन्नवृत्तिकत्वेनतु अवच्छिन्नवृत्तिकान्यत्वं
कपिसंयोगित्वादित्यादौकपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावादद्रव्येऽवच्छिन्नवृत्तिकतयानदन्यत्वा
भावात्घटत्वादिनासाध्याभावस्यैवलक्षणघटकतयातिव्याप्यापत्तेःनिरुक्तव्याप्यवृत्तित्वविशिष्टस्यहेत्वधि
करणवृत्तित्वंबोध्यंअन्यथाकपिसंयोगिएतत्वादित्यादौकपिसंयोगसामान्याभावस्यद्रव्येहेतुसमानाधिकर

णतया गुणादौ चनिरवच्छिन्नवृत्तिकतयातमादाग्व्याप्तिवारणसंभवात् तेहेतुधिकरण निरूपितनिरवच्छिन्नाधेयता
वत्वंहेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणतानिरूपकत्वंवादलवदूपपर्यवसितार्थः केचित्तुव्याप्यवृत्तेर्हेतुसमानाधि
करणसाभावस्येतिसमुदायस्य। हेत्वधिकरणेव्याप्यवृत्तिर्यस्साध्याभावस्तस्येयर्थः। हेत्वधिकरणेव्याप्यवृत्तित्वं
चहेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकंयदभावनिष्ठ
तत्त्यक्तित्वंतत्वंनचविशिष्टसत्तावान्जातेरियादोगुणादिनिष्ठसत्तादिरूपाभावप्रतियोगितायांविशिष्टस
त्ताभावनिष्ठतद्व्यक्तित्वस्यावच्छेदकत्वादविशिष्टसत्ताद्यभावस्यव्याप्यवृत्तितानुपपत्तिःयदभावाभावत्वावच्छि
न्नानधिकरणत्वंहेतुमतस्तत्वमितिविवक्षणेव्यधिकरणधर्मावच्छिन्नाभावासंग्राहप्रसंगस्तदभावाप्रसिद्धे
रितिवाच्यं। यत्किंचिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानिरूपकतानवच्छेदकंयदभावत्वंतत्स्यविवक्षित
त्वात्। गुणेगुणान्यत्वविशिष्टसत्ताभावोनास्तीतिप्रत्ययेनविशिष्टसत्ताभावत्वाद्यवच्छिन्ननिरूपितानुयोगि
ताविशिष्टायाःसत्तायांगुणादिवृत्तितानभ्युपगमेनविशिष्टसत्वाद्यभावस्य व्याप्यवृत्तितानिर्वाहादित्याहुः॥

ननुसंयोगिभिन्नंप्रमेयत्वादिसत्तातिव्याप्तिःसंयोगिभेदाभावस्यतद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्या
व्याप्यवृत्तित्वेनलक्षणघटकत्वाभावाव्यधिकरणधर्मावच्छिन्नाभावमादायलक्षणसंगमनादितिचेन्नसंयोगि
भेदस्यव्याप्यवृत्तित्वेनतस्यद्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वावच्छिन्नभेदसमनियततयातदभिन्नत्व
नतद्भेदप्रतियोगितावच्छेदकद्रव्यत्वादिकमपिसंयोगिभेदाभावःतस्यहेत्वधिकरणेव्याप्यवृत्तितयातत्प्रतियो
गितावच्छेदकत्वस्यचसाध्यतावच्छेदकसत्वेनातिव्याप्तयनवकाशात्एवंद्रव्यान्यत्वविशिष्टसत्ताभाववान्द्रव्य
त्वादियादौव्याप्यवृत्तेः सत्ताद्रूपाभावस्यप्रतियोगितावच्छेदकंसाध्यतावच्छेदकमित्यव्याप्तिरित्यपिनाशंकनी
यंसत्तादिमत्वेपिद्रव्यादौद्रव्यान्यत्वविशिष्टसत्ताभावोनास्तीत्यादिप्रसयानुदयात्विशिष्टनिरूपिताधिकर
णताविशेषस्यैवविशिष्टाभावाभावत्वोपगमादितिशिष्टाभावस्यविशिष्टाधिकरणत्वाभावसमनियतत्वेनतद्भे
भिन्नतयाविशिष्टसत्ताधिकरणतायाअपिविशिष्टाभावप्रतियोगित्वात्। परंतुसंयोगत्वेनसंयोगनिरूपिता
याअधिकरणतायाःकिंचिदवच्छिन्नत्वेपिसंयोगिभेदाभावत्वेनतन्निरूपिताधिकरणतानिरवच्छिन्नैवद्रव्यसं

योगिभेदस्याप्रत्ययात्। अवच्छेदकमनंतर्भाव्य तदभावत्वावच्छिन्नवृत्ताप्रतीतेः एवंद्रव्यादौ सत्तात्वावच्छिन्न सत्ता
धिकरणनास्तेपिद्रव्यात्यत्वविशिष्टसत्तात्वादिनैवतदवच्छिन्नप्रतियोगिताकाभावाभावत्वेनापिनवृत्तिः तन्नवि
शिष्टाभावेनास्तीत्यप्रत्ययात्। तथाचसाध्यनिरूपादृशप्रतियोगितानिरूपितात्वावच्छिन्नाधिक
रणताहत्वधिकरणवृत्तित्तादृशप्रतियोगितानवच्छेदकत्वमेवसाध्यतावच्छेदकनिवेश्यमितिनकश्चिद्दोषइत्याहुः
अथान्यहत्वधिकरणवृत्तित्वंयदियेनकेनचित्संबंधेनतदाकालिकसंबंधेनधूमाधिकरणवृत्तिवह्नित्वाद्यवच्छिन्न
वन्ह्यभावादिकमादायाव्याप्तिःयदिचकालिकसंबंधेनकालेवन्ह्यभावादर्वृत्तिर्वन्ह्यनधिकरणदेशावच्छिन्नेवेति
नासाहत्वधिकरणनिरवच्छिन्नवृत्तिकइतिमन्यतेतदापिसत्तावान्जातेरित्यादौविषयितासंबंधेनहेतुयतिज्ञा
नादौवर्तमानसाध्याभावमादायाव्याप्तिर्दुर्वारैवदेशिकविशेषणतासंबंधेनहेत्वधिकरणवृत्तित्वनिवेशेवप
टत्वाभावसाध्यकेव्यभिचारिण्यतिव्याप्तिः तत्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यभावरूपसा
ध्याभावस्यतेनसंबंधेनावृत्तेर्वाधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघटकत्वात्एवंकालिकसंबंधाव

छिन्नप्रतियोगितांके आकाशाभावाभावसाध्ये आत्मत्वादिहेतावव्याप्तिः देशिकविशेषणतया हेतुसमानाधिकरण
स्याकाशाभावस्य प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकेनैतात्कालिकसंबंधेनाकाशाभावरूपप्रतियोगि
मत्तायाश्चैकालिकसंबंधावच्छिन्नप्रतियोगिताकाशाभावाभावानास्तीति प्रत्ययनियामकत्वादाकाशाभावस्ये
वतादृशसाध्याभावरूपत्वेबाधकविरहादितिचेन्नस्वीयतादृशप्रतियोगिताश्रयवताज्ञानंप्रतियादृशसंबंधेनस्व
प्रकारकज्ञानंविरोधितादृशसंबंधेनहेत्वधिकरणवृत्तित्वाभावस्तदीयतादृशप्रतियोगितानवच्छेदकतयैवनिवे
शनीयत्वात् आकाशाभावस्यदेशिकसंबंधस्यानदर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयःअपि
तुकालिकसंबंधएवनचतेनसंबंधेनसआत्मनिवर्त्ततिअतआकाशाभावीयसाध्यनिष्ठप्रतियोगितायानया
दृशप्रतियोगितयाननापादानसंभवःअपितुत्वधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगितायाएवता
दृशाभावज्ञानस्यदेशिकविशेषणतासंसर्गकस्यत्वधिकरणधर्मप्रकारणसाध्यवत्तावगाहिनंभ्रमंप्रतिवि
रोधित्वात् सामान्यतःप्रतियोगिप्रकारकज्ञाननिवेशेआकाशप्रकारकज्ञानंप्रतिदेशिकविशेषणतासंबंधे

नआकाशाभावप्रकारकज्ञानस्यप्रतिबंधकतयोक्तदोषतादवस्थ्यमितियादृशप्रतियोगितानिरूपकत्वंप्रतियोगितासंबंधेनयत्साध्यवत्ताज्ञानंचतत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारकंयादृशंतेनाकाशत्वेनतादृशसाध्यवत्ताज्ञानंप्रतिदेशिकविशेषणतयाकाशाभावप्रकारकज्ञानस्यविरोधित्वेपिनक्षतिः एवंचप्रतियोगितासंबंधावगाहित्वनिवेशप्रयोजनाभावात्। यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानंप्रतिप्रतिबंधकमित्यवक्तव्यंसाध्यवत्ताज्ञानविरोधित्वंवारणतल्लक्षणनिवेश्यंनचाकाशत्वादिनासाध्यवत्ताज्ञानविरोधितामादायदधितदोषतादवस्थ्यं साध्यतावच्छेदकावच्छिन्नप्रकारताकज्ञानविरोधित्वपर्यंतनिवेश्यंअधिकरणधर्मावच्छिन्नप्रतियोगितासाध्याभाववत्ताज्ञानस्यव्यधिकरणधर्मादिप्रकारकसाध्यवत्ताज्ञानंप्रत्यविरोधित्वेनसाध्यतावच्छेदकावच्छिन्नप्रकारताकज्ञानाविरोधितयातादृशसाध्याभावाप्रसिद्धेरितिवाच्यं। घटत्वविशिष्टवन्हिमद्ह्रदादिज्ञानस्यापिसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वस्याधिकंविशादिन्यायेनाक्षतत्वात्। नचतन्मात्रावच्छिन्नप्रकारताकत्वमवश्यंनिवेश्यमन्यथाआकाशत्वनिरुक्तसाध्यतावच्छेदकोभयरूपेणसाध्यवत्ताज्ञानंप्रतिदेशिकविशे

घणतयाआकाशभावक्तज्ञानस्यविरोधितयातद्दोषतादवस्थ्यमितिकश्चंव्यधिकरणधर्मावच्छिन्नाभावसंग्रहइ
तिवाच्यंप्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारतानिवेशेपिव्यधिकरणधर्मावच्छिन्नाभावासंग्रहस्तदवच्छिन्नप्रक
रतामात्रनिवेशेउक्तस्थलेआकाशभावीयदेशिकविशेषणतायाःवारणासंभवात्। द्वितीयलक्षणायादृशप्रति
योगितावच्छेदकयादृशप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरो
धितानिवेशेनप्रतीकारसंभवात्। आकाशत्वादेश्चकारणंभावाभावत्वादिरूपप्रतियोगितावच्छेदकातिरिक्तत
यातदवच्छिन्नप्रकारताकज्ञानविरोधितादायदोषाभावात्। हेतुसमानाधिकरणस्यव्याप्यवृत्तेर्वह्नित्वादिना
घटाभावस्यप्रतियोगितावच्छेदकमेववह्नित्वादिरूपंसाध्यतावच्छेदकमतःसाध्याभावस्यतियधपिवह्नित्वेन
घटाभावादर्घटत्वेनवन्ध्याभावाच्चभिन्नतयातादृशाभावोपिसाध्याभावएवतथापिप्रतियोगितावच्छेदकभेद
नाभावभेदमतेनेदंलक्षणंसमनियतभावेक्यमतमभिप्रायेणचाग्रिमंलक्षणं अथवाहेतुसमानाधिकरण
भावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वनिवेशेनदोषः वह्नित्वादिनाघटाद्यभावस्यघटत्वादिनावन्ध्या

४ प्रकारतायाश्चलिङ्गज्ञानंप्रतियेनसंबंधेनसप्रकारकज्ञानंविरोधीतिविवक्षणेवनएतल्लक्षणेसाध्यतावच्छेदकयादृशप्रतियोगितावच्छेदकाभ्यांतिरि
क्तानवच्छिन्न ४

त्वाभावाभिन्नतेपितदीयघटादिनिष्ठप्रतियोगितायाश्चव्यधिकरणवन्हित्वाद्यवच्छिन्नत्वेनवन्ह्यादिनिष्ठप्रतियो
गितायांवह्नित्वादेरनवच्छेदकत्वात्।प्रतियोगितासाध्यतावच्छेदकसंबंधावच्छिन्नत्वेननिवेशनीयातेनसंबंधां
तरावच्छिन्नप्रतियोगिताकसाध्याभावमादायनासंभवःव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाअपिसंबंधा
वच्छिन्नत्वेव्यवस्थापितत्वेवप्रतियोगितावच्छेदकत्वंचसाध्यतावच्छेदकतासंबंधावच्छिन्नंग्राह्यंतेनगु
णवान्द्रव्यत्वादित्यादौहेतुसमानाधिकरणस्यविषयितयागुणत्वादिमतःसमवायेनाभावस्यज्ञानादिनि
ष्ठप्रतियोगितावच्छेदकत्वेपिसाध्यतावच्छेदकस्यनक्षतिः॥सर्वत्रत्वावच्छिन्नप्रतियोगिताकसाध्याभावमा
दायैवतल्लक्षणसमन्वयसंभवाद्व्यधिकरणधर्मावच्छिन्नाभावोभ्युपगमेपिक्षतिविरहेणव्यधिकरणध
र्मावच्छिन्नाभावखंडनंमूलक्षतोऽकिंचित्करमतोलक्षणांतरमाहहेतुसमानाधिकरणेतिअत्रव्यधिक
रणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकसाध्यतावच्छेद
कमादायाव्याप्तेर्वारणायोपात्तस्यसामानाधिकरण्येनप्रस्यैवव्यर्थ्यात्लक्षणसामंजस्यमितितादृशभाव

खंडनंसंगच्छते। अत्रापिहेतुसमानाधिकरणस्यव्याप्यवृत्तेरित्यस्यपूर्वोक्तरूपपर्यवसितार्थः। व्यावृत्यादिकमपिपू
र्वोक्तमेवात्रकालिकसंबंधावच्छिन्नप्रतियोगिताकात्यंताभावाभाववानासत्वादित्यादावव्याप्तिवारणायपूर्वोक्तरीत्य
नुसरणगौरवाद्व्याप्यवृत्तित्वंपरित्यज्यप्रतियोगिव्यधिकरणत्वनाभावंविशेषयति प्रतियोगिव्यधिकरणस्यवेतिपू
र्वलक्षणसाध्याभावस्यविशिष्यापादानात्तस्यचहेत्वधिकरणसाध्यरूपप्रतियोगिनासामानाधिकरण्यमाव
श्यकमेवैकव्यक्तिवृत्तिसाध्यकेऽतस्तत्प्रतियोगिव्यधिकरणसाध्याभावाप्रसिध्याऽव्याप्तिरितितन्नोक्तंप्रतियो
गिव्यधिकरणत्वंचनप्रतियोग्यधिकरणवृत्तित्वंसंयोगिसत्वादिसाद्योसंयोगाद्यभावस्यातथात्वादभावांतरमा
यातिव्याप्तेः किंतुप्रतियोग्यनधिकरणवृत्तित्वंएवंचप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तेरिति
दलक्षणपर्यवसितार्थः। प्रतियोग्यनधिकरणत्वंचसाध्यतावच्छेदकसंबंधेनप्रतियोग्यधिकरणभि
न्नत्वमतःसमवायेनज्ञानादिसाध्यकेद्रव्यत्वादिहेतोर्नातिव्याप्तिः इत्थंचप्रतियोगितानसंबंधविशेषा
वच्छिन्नत्वेनविशेषणीयाविशेषणताविशेषणाभावसाध्यकसर्वस्यैवाभावस्यतेनसंबंधेनकिंचिद्भि

क्षस्याभावरूपप्रतियोगिसमानाधिकरणतयाप्रतियोगिव्यधिकरणाभावाप्रसिद्धिरतायादृशप्रतियोगिता
श्रयानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकंयत्साध्यतावच्छेदकं
तदवच्छिन्नसामानाधिकरण्यमिति सिद्धांतलक्षणवक्ष्यमाणरीत्यानिष्कर्षणीयं अथविशिष्टसत्तावान्जा
तेरिसत्वातिव्याप्तिवारणायतादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वंहेतुमतइत्यस्यैववाच्यतया
वन्हिमान्धूमादित्यादौवन्हित्वादिनाघटाद्यभावीयप्रतियोगितायालक्षणघटकत्वासंभवस्तदवच्छेदक
वन्हित्वावच्छिन्नानधिकरणत्वस्यहेतुमत्यसत्वात्तथाचसामानाधिकरण्येनैत्यनर्थकं अन्यकेचित्तादृशप्र
तियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयानधिकरणत्वंहेतुमतइत्यवतत्सार्थक्यायविव
क्षणीयंदर्शितामावीयप्रतियोगितावच्छेदकवन्हित्वादिविशिष्टस्यहेतुमतिसत्वेपितादृशप्रतियोगिता
श्रयघटादेरसत्वादुभयानधिकरणत्वंहेतुमतोऽक्षतमेवनितादृशप्रतियोगितावच्छेदकत्वमादायदोष
वारकतयासामानाधिकरण्येनेत्यस्यसार्थकतानन्वन्हित्वेनघटाद्यभावस्यप्रतियोगितावन्हिभिन्नया

वहृत्तिरेकैवस्वीक्रियतेनतुघटादिरूपप्रतियोगिभेदनभिन्ना अभावस्यप्रतियोगितावच्छेदकस्यचैक्यात्त
थाचघटादिनिष्ठप्रतियोगिताश्रयसाधनादेरवसाधनवतिसत्वात्तादृशप्रतियोगिताश्रयानधिकरणत्व
नतत्रेतिनसामानाधिकरण्येनहेत्वसिद्धिः नचैवंसामानाधिकरण्येनहेत्वसिद्धिपरिहारस्यसार्थकतासंभवः प्रतियोगिभेदेनप्रतियोगितायाभेदेतुमहान्सीयव
न्ह्यादिनिष्ठायाःवन्ह्यादिसामान्याभावीयप्रतियोगितायाःपर्वतीयवन्ह्यादिवृत्तितयातादृशप्रतियोगिता
श्रयानधिकरणत्वस्यहेतुभतिपर्वतादेरसत्वात्वन्हित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरितिवाच्यंयतःप्रति
योगिभेदनप्रतियोगितायाःनभेदः अपित्ववच्छेदकभेदनैवएवमपिवन्हिभिन्नवान्घटादिरयंदोवन्हिभि
न्नत्वेनवन्ह्यभावीयप्रतियोगितायाःवन्हिभिन्नेसंभावितत्वयातदाश्रयानधिकरणत्वस्यवन्हिशून्यहेतुमस
क्षत्तयातादृशप्रतियोगितायावच्छेदकत्वमादायाव्याप्तेर्वारकतयासामानाधिकरण्येनतस्यसार्थकतामहा
कालोघटवान्कालपरिमाणादिमत्वादोमहाकालान्यत्वविशिष्टघटाद्यभावप्रतियोगितेवतादृशीमहाकाल
स्यतदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताऽन्यत्वात् अथवावक्ष्यमाणरीत्यासाध्य

नावच्छेदकसंबंधसामान्येयादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वया दृशप्रतियोगिताश्रयप्रतियो
गिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकवैतत्त्वावच्छिन्नाभावस्तदनवच्छेदकत्वमेववाच्यंएवंचतन्ना
वृत्तिगगनाद्यभावप्रतियोगितावच्छेदकवह्नित्व विशिष्टप्रतियोगिकत्वतदाश्रयवह्निभिन्नप्रतियोगिकत्व
योरेकस्मिन्नसंबंधेऽसत्वेनतादृशप्रतियोगितायाअपितथात्वात्तदूरकत्वया पिसामानाधिकरण्येनत्व
स्यसफलत्वमवश्यमित्याहुः। परेतु असंताभावस्येवान्योन्याभावस्या पिप्रतियोग्यवृत्तिधर्मावच्छिन्नप्रति
योगिताकत्वापगमात्पर्वतादौवह्नित्वविशिष्टाद्यवच्छिन्नजलादिमद्भेदोपिप्रामाणिकः। एवंचस्वावच्छेदकवि
शिष्टावच्छिन्नस्वाश्रयवन्निष्ठप्रतियोगिताकभेदवत्वाधिकरणकंयत्प्रतियोगित्वंतदनवच्छेदकत्वंसाध्यतावच्छे
दकंयत्किंचिद्व्यक्तिनिवेशनीयंएवंचवह्नित्वादिनाजलाद्यभावीयप्रतियोगितापितादृशंस्वंकथितमेदस्यतदवच्छेदकवह्नि
त्वादिविशिष्टावच्छिन्नतदाश्रयजलादिमन्निष्ठप्रतियोगिताकत्वात्। अतस्तद्भेदकतामादायदोषवारण
यसामानाधिकरण्येनेतिसंयोगीद्रव्यत्वात्वह्निमान्धूमादियादौसंयोगत्वावह्नित्वाद्यवच्छिन्नसंयोगवन्धा

यभावप्रतियोगितायाः गुणत्वह्रदत्वाद्यवच्छिन्नसंयोगिपर्वतभेदसंयोगवन्त्वाद्यवच्छिन्नगुणह्रदादिभेदंचादाय
तथात्वावारणायावच्छिन्नांतनिष्ठांतयोरुपादानं।अथवायादृशप्रतियोगितावच्छेदकावच्छिन्नयादृशप्रतियोगि
ताश्रयवृत्तिप्रतियोगितावच्छेदकताकभेदवत्वंहेतुस्तत्तदनवच्छेदकत्वंविवक्षणीयंवन्हित्वादिनाघटाद्यभा
वप्रतियोगितापेक्षेतादृशीतादृशप्रतियोगितावच्छेदकवन्हित्वाद्यवच्छिन्नतादृशप्रतियोगितासमानाधिकर
णप्रतियोगितावच्छेदकताकस्यवन्हित्वेनघटवान्नेतिप्रतीतिविषयभेदस्यहेतुमत्त्वात्।व्यधिकरणधर्म
स्यायंताभावप्रतियोगितावच्छेदकत्वदन्योन्याभावप्रतियोगितावच्छेदकतायामप्यवच्छेदकत्वात्।अतएवस
मवायित्वाद्यवाच्यत्ववद्ह्रदोपिद्रष्टव्यइतिमिश्रैरप्यहितंद्रष्टव्यंचतादृशप्रतियोगितावारणायसामानाधिकरण्ये
नेतिहेतुमत्तावन्हित्वेनघटवद्ह्रदभेदवत्वंघटत्वेनवन्हिमद्ह्रदभेदवत्वंचादायवन्हित्वावच्छिन्नवन्हिनिष्ठप्रतियोगिता
यास्तादृशत्ववारणायप्रकृतप्रतियोगितासमानाधिकरणत्वंतदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियोगितावच्छे
दकतायांनिवेशनेमहाकालोघटवान्कालपरिमाणादिसादोमहाकालान्यत्वविशिष्टघटाद्यभावीयप्रति

योगितासादायैवलक्षणसमन्वयः॥ननुगगनत्वपटत्वादिनाघटाद्यभावीयप्रतियोगितां( )तस्याः गगनाद्यवच्छिन्नघटाद्यवच्छिन्नकालभेदंगगनत्वपटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदंचादाय पूर्वप्रतीकार्थलाभसंभवेपिसामानाधिकरण्येनतदवच्छेदकस्याप्रसिद्धेःअथवातादृशप्रतियोगितासामान्येयधर्मसामानाधिकरण्यविशिष्टयधर्मावच्छेदकताभावस्तधर्मविशिष्टसामानाधिकरण्येव्याप्तिरियेवविवक्षणीयंएवंचव्यधिकरणधर्मावच्छिन्नप्रतियोगितासादायापिलक्षणसमन्वयस्तन्नसंभवतीत्यवधेयं॥वन्हितेनवन्हिधूमाभयंनास्तीयेतादृशप्रतीतिविषयाभावस्यवन्हिमान्वन्हितेनवन्हिधूमाभयवानेतिप्रतीतिसिद्धभेदमादायप्रतियोगिव्यधिकरणत्वपितस्यप्रतियोगितावच्छेदकत्वेनवन्हित्वमात्रेपर्यासंतथासतिवन्हित्वरूपप्रतियोगितावच्छेदकविशिष्टवन्हिरूपप्रतियोगिमतितादृशाभावाप्रसंयप्रसंगात्॥किंतुवन्हित्वतदुभयत्वयोरवतस्यर्थापिरतस्तादृशप्रतियोगितायांसमानाधिकरणतयावच्छेदकतेपिवन्हित्वस्यनक्षतिः यदिचतादृशाभावप्रतियोगितावच्छेदकंवन्हितादिकमेवनतुप्रतियोगिविशेषणतापन्नमुभयत्वंप्रतियोगिविशेषणतानापन्नेप्र

च० त०

तियोगितावच्छेदकतावगाहि प्रतीयातहिशेषणतापन्नेतदनवगाहनात् अन्यथावन्हित्वेनघटो नास्तीत्या
दावपिवन्हित्वघटत्वाद्युभयावच्छेदकत्वपर्यापत्तेश्चवन्हित्वे
नोभयाभावप्रतियोगिताव्यासज्यवृत्तिरतोन तादृशभावस्यकेवलान्वयित्वानुपपत्तिरितिमन्यतेतदासा मा
नाधिकरण्येनयस्यप्रतियोगिता पर्याप्यधिकरणवृत्तित्वेनेयर्थ इत्याहुःतदुभयमपिनयुक्तं एवंसतिघटत्वा
दिनासाध्यभावप्रतियोगितायाअपिनिरुक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसंभवेनप्रथमलक्षणेप्रति
योगिवैयधिकरण्यानभिधानस्यनिर्बीजतयासंभवविरोधापत्तेः"वस्तुतोप्रतियोगितासंबंधावच्छिन्नप्रका यादृश
रतावच्छेदकयत्किंचिद्धर्मावच्छिन्नानधिकरणत्वंहेतुमतस्तदनवच्छेदकत्वंसाध्यतावच्छेदकस्यविवक्षणीयं
कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकंकपिसंयोगत्वा
दिकमेवतदवच्छिन्नानधिकरणत्वंचनहेतुमतइतिनकपिसंयोगीएतद्वृक्षत्वादियादावव्याप्तिःघटत्वावच्छि
न्नप्रतियोगिताकत्वसंबंधेनचप्रमेयत्वादिनाप्रतियोगिनाघटत्वेनप्रमेयंनास्तीत्यादिज्ञानेभानात्प्रमे

यत्वाद्यवच्छिन्नाधिकरणत्वस्य हेतुमत्त्वसंभवात्। घटत्वाद्यवच्छिन्नप्रतियोगितायाः यादृशप्रतियोगितेयत्ने च० त०
नोपादानासंभवात्तथाविधप्रतियोगितायाअप्रसिद्धिरतोयत्किंचिदित्यत्रदंडिमानू दंडिसंयोगादित्यादौ
तत्तद्दंडावच्छिन्नाधिकरणत्वमादायदंडिसामान्याभावस्यप्रतियोगिवैयधिकरण्येपिनक्षतिःतत्तद्दंडावच्छि
न्नासंतानाभावप्रतियोगितावच्छेदकत्वमादायदोषवारणायतन्नपरंपरासंबंधेनदंडत्वादेःसाध्यतावच्छेदकता
स्वीकारस्यावश्यकत्वात्ततसंयोगत्वतद्वन्हित्वादि विशिष्टप्रतियोगिविषयकाभावभानेसंयोगत्ववन्हित्वादि
रूपसामान्यधर्मावच्छिन्नप्रतियोगितायाःसंसर्गतयाभानेमानाभावात्तसंयोगत्वतद्वन्हित्वाद्यवच्छिन्नाधि
करणत्वेपिहेतुमतोनक्षतिःसंयोगत्ववन्हित्वाद्यवच्छिन्नप्रतियोगितायाः घटत्वाद्यवच्छिन्नत्वेनघटानास्तीय
भावबुधोसंसर्गतयाभानोपगमेभ्रमानिरूपितत्वेनप्रकारताविशेषणीयाविशिष्टसत्तावान्जातेरिया
दौविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकं त्वाद्यवच्छिन्नाधिकरणत्वस्य
हेतुमतिसत्वान्नातिव्याप्तिःवन्हित्वाद्यवच्छिन्नघटादिनिष्ठव्यधिकरण + विशिष्टसत्ता+धर्मावच्छिन्नाभावी

यप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकघटत्वाद्यवच्छिन्नाधिकरणत्वस्यहेतुमतिसत्वा[illegible]
[illegible]सामानाधिकरण्येनयस्यसार्थकतारूपकमात्रवृत्तिसाध्यकस्थलेसाध्यनिष्ठप्रतियोगि
तासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नाधिकरणत्वंनहेतुमतइतिसाध्यवृत्तितथाविधप्रतियोगितायाअ
प्रसिध्यानपूर्वोक्तलक्षणप्रतियोगित्वाधिकरणत्वंनिवेशितम् वन्हित्वादिनाऽभयाभावमादायदोषस्तूपपूर्ववद् वन्हिघटो
वधारणीयप्रतियोगितायांतुयदिघटत्वेनवन्हिर्नास्तिवन्हित्वेनघटोनास्तीत्यादौवन्हित्वघटत्वादिरूपसमानाधिक
रणधर्मस्यापिप्रतियोगितावच्छेदकत्वंभासते अन्यथातादृशप्रतीतेःप्रतियोगिनिष्ठतत्तद्धर्माणामुपलक्ष
णतयाभानेतद्विशिष्टवैशिष्ट्यानवगाहितयातन्निर्विकल्पकानंतरमप्युपपत्तेःनचवन्हित्वघटत्वादेःप्र
तियोगितावच्छेदकतानवगाहनेतन्निर्विकल्पकानंतरंतादृग्भावबुद्धिरेवप्रतियोगितावच्छेदकतया
यदवभासतेतन्निर्विकल्पकानंतरमवाभावप्रत्ययानुपगमादितिवाच्यंवन्हित्वादिनिर्विकल्पकानंतरंतथा
विधप्रत्ययोपगमेविशेषाभावेनतदुत्तरंवन्हित्वाद्यंशेप्रतियोगितावच्छेदकतानवगाहिवन्हिर्नास्तीत्याद्याका

रकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्ययस्यापिस्वीकारापत्तेरित्यन्यत्तदाप्यवृत्तितो निवेशपक्षेवन्हित्वा
दर्व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवन्ह्याद्यभावप्रतियोगितावच्छेदकतामादायासंभवप्र सक्तिरित्यालोच्यप्रतियोगिवै
यधिकरण्यनिवेशनमनुसारनदर्थः प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेवतथासत्यपिहेतुभ
तोघटत्वादिविशिष्टानधिकरणतयावन्हित्वादिनाघटाद्यभावमादायदोषप्रसक्त्यासामानाधिकरण्येनेतस्य
सार्थक्यसंभवात्नचप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वंप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताव
च्छेदकताकभेदवत्वंतथाचसंयोगत्वाद्यवच्छिन्न घटादिमद्भेदमादायसंयोगात्यंताभावस्यप्रतियोगिवैय्यधिकरण्या
पतिःभेदप्रतियोगितावच्छेदकतायांप्रकृतप्रतियोगितासामानाधिकरण्यनिवेशनेचपरेत्यादिनाऽभिहित
द्वितीयकल्प एवपर्यवसानमितिघटत्वादिनावन्ह्याद्यभावस्यापिप्रतियोगिवैय्यधिकरण्यापत्यावन्हित्वादेस्तत्प्रति
योगितायाःसामानाधिकरण्येनावच्छेदकतयाव्यापिरितिवाच्यं।वधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदक
ताकभेदानभ्युपगमेनोक्तापत्त्यसंभवात्घटत्वेनपटवानेत्यादौघटत्वाद्यवच्छिन्नपटात्यंताभावस्यैवविषय

त्वोपगमात्। प्रतियोगितावच्छेदकंसामानाधिकरण्येनयत्रावच्छेदकंतादृशप्रतियोगितावच्छेदकताकएवाभेदो
निवेश्यः अथैवमपिघटत्वाद्यवच्छिन्नवन्ह्याद्यभावस्यघटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्यप्रतियोगितावच्छेद
कत्वमादायाव्याप्तिर्दुर्वारेतिचेन्नसामानाधिकरण्येनप्रतियोगितायामवच्छेदकंयद्यत्तदवच्छिन्नतत्समानाधि
करणप्रतियोगितावच्छेदकताकभेदस्यैवनिवेशनीयत्वात्। अथवन्हित्वादिनाघटाद्यभावस्ययदिघटत्वा
दिकंप्रतियोगितावच्छेदकंतदाघटादिमतितादृशभावासत्वप्रसंगइतिवन्हित्वघटत्वोरेवावच्छेदकतापर्या
प्तिरुपगंतव्यातथाचानवच्छेदकपदस्यावच्छेदकतापर्याप्तिनधिकरणपरतयाव्याख्येयतयैवतादृशभावप्र
तियोगितामादायदोषाप्रसक्तेःसामानाधिकरण्येनतस्यैवव्यर्थ्यमशक्यवारणमेवेतिचेन्नाप्रतियोगि
विशेषणतापन्नतदनापन्नयोरवच्छेदकतावैलक्षण्येनप्रयोजकेवावच्छेदकतापर्याप्तेःपर्याप्तिविवक्षाया
श्चेराप्रतीकारासंभवात्। सामानाधिकरण्येनेतस्यसार्थक्यंतदपिप्रतियोगिविशेषणतापन्नस्ययादृशंविल
क्षणमवच्छेदकत्वंतत्पर्याप्तिनधिकरणत्वलाभायेवव्यधिकरणधर्मावच्छिन्नप्रतियोगितकाभावस्यैवतत्प्रति

योगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्यघटादिमतिरत्तोबाधकाभावात्। अस्तुवाविलक्षणावच्छे
दकतालेनप्रसेकपर्याप्तयोरप्यवच्छेदकतयोस्तत्तत्प्रतियोगितावच्छेदकत्वेनानुगतयोःसमानाधिकरणव्यधि
करणधर्मद्वयपर्याप्तिनैरंतर्यादृशानुगतरूपावच्छिन्नपर्याप्त्यधिकरणधर्मावच्छिन्नस्यैवाभावविरोधितेत्यधिकर
णधर्मावच्छिन्नाभावस्यप्रतियोगिमतिसत्वोपपत्तिः।एवंचह्रदत्ववह्नित्वोभयावच्छिन्नवन्त्यभावमादायपर्याप्तिनि
वेशव्यावृत्तिप्रदर्शनेसमानाधिकरणधर्मस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव प्रतियोगितानवच्छे
दकत्वपक्षीयव्याप्यवृत्तितद्घटितलक्षणमिप्रायेणेतिवदंति।अव्यभिचारिसंबंधरूपताअवयवशक्त्याव्यभि
चारिसंबंधपदप्रतिपाद्यतातथाचपूर्ववन्नेतदस्वारसिकतेतिभावः। ननुसाध्यतावच्छेदकावच्छिन्नसा
ध्याभाववद्वृत्तित्वरूपस्यव्यभिचारपदार्थस्यतल्लक्षणेनिवेशेकथमेवमियतआहहेतावितियथाहेत्वंशेसा
ध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वंव्यभिचारःतथासाध्यतावच्छेदकान्वयिनोहेतुसमानाधिकरणाभा
वप्रतियोगितायाःसामानाधिकरण्यनावच्छेदकतयापितथात्वादित्यर्थः।वह्निर्धूमस्यव्यभिचारीत्यत्राभाव

वहृत्तित्वंव्यभिचारपदार्थः।तदेकदेशत्वाभावेषष्ठ्यर्थप्रतियोगितायाः निरूपकत्वसंबंधेनान्वयः।प्रतियोगितायांचा
धेयतासंबंधेनधूमस्यावच्छिन्नत्वसंबंधेनधूमविशेषणतापन्नधूमत्वस्यान्वयइतिधूमत्वावच्छिन्नधूमाभाववृत्तित्व
लाभःसाध्यतावच्छेदकावच्छिन्नसाध्यांतर्भावेननव्यभिचारपदार्थताशक्त्यानंत्यप्रसंगात्।साध्यवाचकपदवैय्यर्थ्यापा
तात्र्चएवंसमानाधिकरणाभावप्रतियोगितायांसामानाधिकरण्येनावच्छेदकत्वंव्यभिचारपदार्थः।सामानाधिकरण्यव
युत्पत्तिवैचित्र्यात्प्रथमांतपदोपस्थाप्यस्यापिवन्हेर्निरूपकत्वसंबंधेनान्वयः वन्ह्यांतर्भावेनैववा शक्तिः धूमपदल
क्षणयाधूमत्वपरं आधेयत्वंषष्ठ्यर्थः अन्वयश्चावच्छेदकत्वनिरूपकत्वमित्यन्वयार्थः।तथाचधूमत्वनिष्ठस्व
समानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूपकावन्हिरित्यन्वयबोधः।यद्यपिलाघवरूपविनिग
मकमत्वादभाववद्वृत्तित्वएवव्यभिचारपदशक्तिकल्पनमुचितंतथापिज्ञेयत्वंवाच्यत्वस्यव्यभिचारीति
प्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापिव्यभिचारपदार्थत्वमावश्यकंतन्त्रवाच्यत्वाभावाप्र
सिध्यातदभाववद्वृत्तित्वाभावबोधासंभवात्।उक्तरूपस्यव्यभिचारपदार्थत्वेव्यभिचारस्याभावोव्यभि

चारमित्यव्ययीभावाश्रयणात्। ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमव्यभिचारपदार्थः इ च०त०
नूप्रत्ययार्थो निरूपकत्वंवाच्यत्वपदंवाच्यत्वपरंषष्ठ्यर्थश्चाधेयत्वंतथाचवाच्यत्वत्वनिष्ठस्वसमानाधिकरणाभा
वप्रतियोगितानवच्छेदकतानिरूपकज्ञेयत्वमित्यन्वयबोधः अथैवमप्यव्यभिचारिसंबंधपदेनोक्तव्याप्तेःकथंला
भः नचाव्यभिचारिपदंतादृशप्रतियोगितानवच्छेदकत्वाश्रयपरंसंबंधश्चतदाश्रयसामानाधिकरण्यमितितल्ला
भइतिवाच्यं। वह्नित्वंधर्मव्यभिचारीतिप्रयोगाभावात्। उक्तधर्मबोधकाव्यभिचारपदसमभिव्याहृतन्त्रसयस्यान्त्र
यत्वाबोधकत्वात्। अव्यभिचारिपदार्थान्वयितावच्छेदकंयद्रूपंतदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानव
च्छेदकत्वबोधकतायाव्युत्पत्तिसिध्यतात्। साध्यतावच्छेदकस्याव्यभिचारिपदार्थत्वेहेतुसमानाधिकरणेत्यादिव्या
प्तिबोधस्याशक्यत्वाच्चेतिचेन्न अव्यभिचारिसंबंधइत्यस्य अव्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यमित्य
र्थः। एवंचसाध्यतावच्छेदकतिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसा
मानाधिकरण्यमितिपर्यवसितंउक्तलक्षणस्याप्यत्रेवार्थेतात्पर्यंनतुयथाश्रुतविशेषणविशेष्यभावेतदापन्न

स्याव्यभिचारिसंबंधपदेनबोधयितुमशक्यतयापारिभाषिकतायादुर्वारत्वात्। नचयद्रूपावच्छिन्नस्यैव यस्य
व्याप्तित्वंतदन्यूनपेणतस्याव्यभिचारिसंबंधपदार्थत्वेपिनक्षतिरितिवाच्यं। एवंसतिसाध्याभाववद्वृत्तित्वमात्रस्यव्यभिचारपदा
र्थत्वेपिव्यतिरेकिसाध्यकात्कव्याप्तेरव्यभिचारिसंबंधरूपतोपपत्तेरुक्तधर्मस्यव्यभिचारपदार्थतव्यवस्थापनानुपा
युक्तत्वात्उक्तलक्षणेपिसाध्यसामानाधिकरण्यमंतर्भाव्याव्यभिचारिसंबंधरूपतायाःव्यवस्थापयितुंशक्यत्वात्
साध्यसामानाधिकरण्यानंतर्भावेपिप्रतियोगिसमानाधिकरणस्वसमानाधिकरणयावदभावकत्वरूपपर्यव निरुक्त
सितपूर्वलक्षणार्थस्याव्यभिचारिसंबंधरूपतासंभवात्" अवच्छेदकत्वमिति। अनवच्छेदकमित्यत्रयदवच्छेदकप
दंतत्तात्पर्यविषयावच्छेदकत्वमित्यर्थः। तत्पर्यायस्य धिकरणत्वंपर्याप्तिसंबंधेनावच्छेदकतावत्वंतथाचपर्याप्तिसं
बंधेनावच्छेदकतावच्छिन्नस्यभेदोऽनवच्छेदकपदेनविवक्षितइतिभावः। विशिष्टवैशिष्ट्यभावस्यप्रतियोगितावच्छे
दकत्वेपिवन्हित्वस्यसत्त्वेपि। महानसीयत्वादिविशिष्टवन्ह्यभावस्यप्रतियोगितायांमहानसीयत्वसहितस्यव
न्हित्वस्यावच्छेदकत्वे आश्रयत्वसंबंधेनावच्छेदकतावदन्यत्वस्यवन्हित्वेदुर्लभत्वादितिभावः। प्रतियोगिविशेष

णतापन्नधर्मांतरसहितवन्हित्वावच्छिन्नाभावमादायदोषंदर्शयितुंप्रतियोगिविशेषणतापन्नधर्मस्येवप्रतियो
गितावच्छेदकत्वंप्रतीयतइतिनियमानभ्युपगंतुर्व्यधिकरणधर्मावच्छिन्नाभाववादिनः प्रतियोग्यवृत्तिधर्मस
हितप्रतियोगि वृत्तिधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावोस्तीतिच्यु सादनायतादृशभावमादायापिदू
षणंदर्शयति।ह्रदत्वेतिउभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभयघटकप्रत्येकस्यावच्छेदकतायाअव्याह
तत्वादितिभावः।नन्वतिरितिअ वच्छेद्याश्रयविशेषणाभावायनेषुतदनापन्नेषुनानाधर्मेषुपर्याप्तंयदवच्छे
दकत्वंपर्याप्तिसंबंधेनतदवच्छिन्न भेदस्यतत्पर्याप्तनवच्छेदकप्रत्येकधर्मावृत्तिधर्मावच्छेदनसत्वाद्ह्रन्हि
त्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्यघटत्वाद्यवच्छिन्नघटपटाभयत्वाद्यवच्छिन्नभेदवन्निष्प्रत्यूहत्वादितिभा
वः।नचवन्हिनिष्ठह्रदत्ववन्हित्वाभयावच्छिन्नप्रतियोगितायाःसामानाधिकरण्येनयदवच्छेदकत्वंतद्ह्रन्हित्वमा
त्रपर्याप्तंह्रदत्वस्यव्यधिकरणतयैवावच्छेदकत्वादितिकथंवन्हित्वस्यतादृशावच्छेदकतावच्छिन्नान्यतनिर्वाह
इतिवाच्यं।यतःसामानाधिकरण्येनानवच्छेदकमित्यस्यतत्तत्प्रतियोगितासमानाधिकरणवृत्तियत्तत्प्रतियोगि

तावच्छेदकत्वं तदवच्छिन्नभेदकूटत्वमर्थः इत्थंच ह्रदत्ववन्निष्ठोभयावच्छिन्नप्रतियोगितायाः समानाधिकरण
स्यैकसंबंधावच्छेदकत्वंउभयपर्याप्तंतदवच्छिन्नभेदोवन्हित्वेव्याहतएवेति॥ननुसंयोगादिसाध्यकसाध्य
व्यापिवारणायतदभावव्यावर्तकव्याप्यवृत्तित्वादिविशेषणापादानेतत्साध्यकसत्वादिरूपव्यभिचारिहेतु
वृत्तिव्याप्तिप्रसंगः अभावांतरस्यैवलक्षणघटकत्वादिशंकांव्यभिचारिहेतुकस्थलसंयोगाद्यभावस्यल
क्षणघटकत्वप्रदर्शनेनपरिहरतिसत्वेतीतिव्याप्यवृत्तिरित्यपिलक्षणंप्रतियोगिव्यधिकरणश्चेत्यपिबोध्यं।
अथंभावःव्याप्यवृत्तित्वमननावच्छिन्नवृत्तिकान्यत्वंनवास्वसमानाधिकरणाभावप्रतियोगित्वसामान्याभा
वः प्रतियोगिव्यधिकरणत्वंचनप्रतियोग्यधिकरणावृत्तित्वंकिंत्वनवच्छिन्नवृत्तिकत्वंस्वाधिकरणायत्किंचिद्व्यक्ति
निष्ठाभावाप्रतियोगित्वंवाव्याप्यवृत्तित्वंप्रतियोग्यनधिकरणावृत्तित्वंचप्रतियोगिवैयधिकरण्यंसंयोगाभाव
साधारणंहेत्वधिकरणेतथात्वस्यविवक्षितत्वात्साध्येतुस्थलेनतादृशाभावस्यलक्षणघटकतातेनगुणादर्हत्व
नधिकरणत्वात्। सत्वादिहेतुकस्थलेतुस्वहेत्वधिकरणतयाव्याप्यवृत्तिःप्रतियोगिव्यधिकरणश्चसाध्याभावो

लक्षणघटकत्वेति। लक्ष्यमाणमिति सिद्धांतलक्षणदूषादिः। तदवच्छेदकत्वप्रतियोगितावच्छेदकत्वेऽपि लक्षणत
लूक्षणेऽपि तात्पर्यविवक्षणीयं अन्यथा लघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तिरिति भा
वः तथाच संयोगादिरूपसाध्याभावस्यव्याप्यवृत्तित्वादिरूपविशेषणेनव्यावर्तने पिनक्षतिः व्याप्यवृत्यभावांत
प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्यसंयोगत्वादेः सत्वेनतदवच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्यप्रसक्त
रितियथाश्रुताशयोवगम्यतेसचनसंगच्छतेसत्तावातज्जातेरित्यादौसत्तात्वस्यहेतुसमानाधिकरणाभावप्रति
योगितावच्छेदकविशिष्टसत्तावाधनतिरिक्तवृत्तितयासत्तात्वसाधारणतयाव्याप्तेर्वारणायस्वविशिष्टसंबं
धनिष्ठाभावप्रतियोगितावच्छेदक[illegible]नत्वरूपतदनतिरिक्तवृत्तित्वस्येवविवक्षणीयतयात
दटकाभावेव्याप्यवृत्तित्वनिवेशप्रयोजनविरहेणसंयोगादिसाध्यकसाधनेतोहेतुसमानाधिकरणाभावप्रतियो
गितावच्छेदकसंयोगत्वादेर्निरुक्तानतिरिक्तवृत्तित्वस्यसंयोगत्वादिसाधारण्यविरहेणाव्याप्यत्वकाशेनहेतु
समानाधिकरणाभावेव्याप्यवृत्तित्वनिवेशनवैयर्थ्यात्तन्नत्वस्वविशिष्टसंबंधिनिष्ठाभावेव्याप्यवृत्तित्वविशेष

णादानसंयोगेनद्रव्यस्याव्याप्यवृत्तितापक्षेसंयोगेनसाध्यतायांहेतुसमानाधिकरणसाध्यतावच्छेदकसंबंधावच्छि
न्नाभावप्रतियोगितावच्छेदकंयद्विशिष्टसंबंधिनिष्ठाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छे
दकंतादृशधर्मप्रसिद्धिः तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नाभावेसंयोगेनाभावानांके
वलान्वयितादितिस्वविशिष्टसंबंधिनिष्ठाभावव्याप्यवृत्तित्वविशेषणस्यावश्यकतेतिवाच्यं। संयोगाद्यभावव्या
वर्तकस्यावच्छिन्नवृत्तिकान्यतरूपव्याप्यवृत्तित्वस्यनिवेशनसंयोगेनसाध्यतायांहेतुसमानाधिकरणसाध्यता
वच्छेदकसंबंधावच्छिन्नाभावोगुणादीनामेवव्याप्यवृत्तिर्नतुद्रव्यस्येतितादृशाभावप्रतियोगितावच्छेदकंयद्वि
शिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकंतादृशधर्मप्रसिद्धितादवस्थ्यात्। प्रतियोगितयासाध्यता
वच्छेदकसंबंधावच्छिन्नत्वंपरिसङ्ख्याकसेबंधावच्छिन्नत्वस्यविशेषणतयाविशेषावच्छिन्नत्वस्यवाविशेषणत्वपक्षस्ये
वावलंबनीयतयाव्याप्यवृत्तित्वविशेषणवैय्यर्थ्यस्यदुरुद्धरत्वात्। तस्माद्दृश्यमानगंधवतिग्रंथस्याभावेव्याप्यवृ
त्तित्वादिविशेषणंनदेयमेवतद्दानेपिसंयोगत्वादेर्द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभाषि

कावच्छेदकत्वविरहेणाव्याप्यप्रसक्तेरित्याशयः तन्त्रचपारिभाषिकावच्छेदकत्वशरीरनिविष्टत्वविशिष्टसंबंधिनिष्ठा प्र० प्र०
भावव्याप्यवृत्तित्वविशेषणमावश्यकं अन्यथा तुल्यप्रयुक्तयासत्तादिहेतुकेपिकर्मसंयोगत्वादौ पारिभाषिकावच्छे
दकत्वानिर्वाहादितिहेतुमन्निष्ठाभावेपितद्विशेषणमावश्यकं अन्यथाव्याप्तेरित्याशंक्य सत्तादिहेतुकस्थलेगुणत्वा
द्यवच्छिन्नाभावस्यनवीनैरभ्युपगमात्तन्मतेगुणत्वस्यसंयोगत्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितानवच्छेद
कत्वं) नसंभवतीतिगुणवृत्तित्वानुधावनंसंयोगिगुणत्व
भाव वेसतिसत्वादियादौगुणवृत्तित्वंनविशिष्टहेतुसमानाधिकरणप्रतियोगितावच्छेदकमतःसंयोगादिसाध्य
कव्यभिचारिमान्त्रयादृशप्रतियोगितावच्छेदकमुपादायसंयोगत्वस्यपारिभाषिकावच्छेदकत्वंसंभवतितादृश
धर्ममाहद्रव्यमात्रसमवेतत्वेति॥७॥प्रगल्भलक्षणद्वयमेकदावगृहयितुमुपन्यस्यतिसाध्यतावच्छेदक
+४प्रतियोगितायाः पारिभाषिकावच्छेदकत्वंसंयोगत्वादौप्रदर्श्यवारयतिभवतिचेतिगुणत्वाद्यवच्छिन्नाभावानाव्या
प्यवृत्तित्वान्निधानंचसंयोगत्वविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वसूचनायजन्यद्रव्यपुत्पत्तिकालावच्छेदेन
गुणत्वाद्यवच्छिन्नाभाव+४

विशिष्टसादिविशिष्टाभावोविशेषणविशेष्यसंबंधाभावरूपःउभयाभावस्तुपरंपरासंबंधेनद्वित्वाभावइतिमते
नेदंलक्षणंअन्यथाव्यधिकरणधर्मावच्छिन्नाभावंविनापिलक्षणसमन्वयसंभवेप्रतियोग्यसत्तिश्चतियंथानुशि
तिप्रसंगादितिध्येयंसाध्याभावोवापूर्वोक्तद्वितीयरीत्यासाध्यतावच्छेदकसंबंधावच्छिन्नश्चग्राह्यः अवच्छेदक
त्वमिहानतिरिक्तवृत्तित्वंनतुस्वरूपसंबंधविशेषःयथोक्तधर्मयोस्तादृशवच्छेद्यावच्छेदकभावमानाभावात्।
स्वपदंहेतुतावच्छेदकावच्छिन्नपरंतथाचसाध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्तिय
र्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वंतद्धर्मवत्त्वंव्याप्तिरितिसमुदितार्थः। सद्धेतोसाध्यासमानाधिक
रणस्यसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्यहेतुसमानाधिकरणत्वनियमात्।तादृशसाध्याभावत्वंसाध्य
सामानाधिकरण्यानतिरिक्तवृत्तीतिलक्षणसमन्वयः गुणान्यत्वविशिष्टत्वावान्जातेरित्यादावतिव्याप्तिवा
रणायसाध्यतावच्छेदकविशिष्टेतिसाध्याधिकरणत्वंसाध्यतावच्छेदकसंबंधेनबोध्यंतेनसंयोगादिनाधूमाद्
रभावस्यधूमादिमतिस्वावयवेवृत्तावयिनातिव्याप्तिः द्रव्यंविशिष्टसत्त्वादित्यादावव्याप्तिर्वारणायहेतुतावच्छे

३व्यभिचारिणितादृशसाध्याभावस्यापिहेतुसमानाधिकरणत्यातिरिक्तवृत्त्येवतदितिनलक्षणसमन्वयः ३

दकविशिष्टोपादानंतद्विशिष्टाधिकरणत्वंहेतुतावच्छेदकसंबंधेनग्राह्यंतेनधूमादिसमवायिनिष्ठवह्नित्वाद्यव
च्छिन्नवन्ह्याद्यभावस्यवन्ह्यादिसमानाधिकरण्यविरहेपिनक्षतिः सामानाधिकरण्यघटकवृत्तिद्वयंदेशिकविशेष
णतयाबोध्यंतेनद्रव्यंसत्वादित्यादौदेशिकविशेषणतयाहेतुसमानाधिकरणस्यद्रव्यत्वाद्यवच्छिन्नद्रव्यत्वाद्य
भावस्यकालिकादिसंबंधेनसाध्यवन्महाकालादिवृत्तित्वेपिनक्षतिः नवासत्तावान्द्रव्यत्वादित्यादौकालिकविशे
षणतयाहेतुसमानाधिकरणस्यसत्तासामान्याभावस्यदेशिकविशेषणतयासाध्यवद्वृत्तित्वाभावेपव्याप्तिः य
द्यपिहेतुसमानाधिकरणसाध्याभावत्वघटकमभावत्वरूपंविशेष्यंव्यतिरेकिसाध्यकसाध्यसमानाधिकरण
भावसाधारणमितिविशिष्यसाध्यसामानाधिकरण्यस्यावृत्तित्वरूपंतदनतिरिक्तवृत्तित्वंदुर्घटंतथापियावं
तःस्वसमानाधिकरणसाध्याभावाविशिष्यसाध्यसमानाधिकरणाइयस्यविवक्षणीयत्वान्नदोषः यत्समानाधि
करणेतियद्रूपविशिष्यसमानाधिकरणेत्यर्थः तेनद्रव्यंगुणकर्मान्यत्वेसतिसत्वादित्यादौसत्तासमानाधिकरण
द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावप्रमायाःसाध्यवत्ताज्ञानप्रतिबंधकत्वेपिनक्षतिः यधर्मावच्छिन्नसामानाधिक

रण्यशरीरचहेतुतावच्छेदकसंबंधेनयधर्मावच्छिन्नाधिकरणत्वंनिवेशनीयंतत्प्रयोजनंचस्फुटमेवअधिकरण
वृत्तित्वंचनिरवच्छिन्नंग्राह्यंतेनकपिसंयोग्येतद्वृक्षत्वादियादोहेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नक
पिसंयोगाभावादिविषयकप्रमायाःअव्याप्यवृत्तित्वज्ञानविरहकालीनायाःसाध्यवत्ताज्ञानप्रतिबंधकत्वे
पिनक्षतिःप्रमाचांप्रमासामान्येतेनव्यभिचारिलिंगातिव्याप्तिःसमानाधिकरणधर्मावच्छिन्नाभावत्वेनव्य
धिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापिविरोधित्वात्सधेतावपिलक्षणगमनासंभवइयतोज्ञा
नसामान्यमुपेक्ष्यप्रमासामान्यनिवेशनंप्रमापदंचयावद्भूमभिन्नपरंअतउक्तभ्रमासंकज्ञानस्याभावत्वा
शेप्रमात्वेपिनक्षतिःसाध्यवत्ताज्ञानपदंतसामान्यपरंअतोव्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञान
स्यतधर्मवत्वेनसाध्यवत्ताज्ञानविरोधित्वेपिनक्षतिःएवंचसाध्यपदंसाध्यतावच्छेदकविशिष्टपरंज्ञानंचस्वस
मानधर्मितावच्छेदकत्वेनस्वविषयीभूताभावप्रतियोगितावच्छेदकसंबंधसंसर्गकत्वेनचविशेषणीयंअ
तोधूमवत्ताद्यवच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्यसाध्यवत्ताज्ञानसामान्यं

तर्गतद्रव्यत्वादिनाधूमादिप्रकारकंमिन्नधर्मावच्छिन्नविशेष्यकधूमत्वावच्छिन्नप्रकारकंसमवायादिसंबंधेनधूम
त्वावच्छिन्नप्रकारकंवज्ञानंप्रसप्रतिबंधकत्वात्।कामिनीजिज्ञासादेरेवचतादृशज्ञानसामान्यविरोधित्वात्अ
तिव्याप्तेर्नावकाश;"साध्याभावयत्वैय्यर्थ्यादिति।अत्रचसाध्यतावच्छेदकविशिष्टसामानाधिकरण्यावच्छेदके
त्वंस्वव्यापकतादृशसामानाधिकरण्यकत्वंतथाचसाध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यंयत्समाना
धिकरणसाध्याभावत्वव्यापकतावच्छेदकंतत्वंव्याप्तिरियतादृशगर्भकतेप्रथमलक्षणेनसाध्याभावैवैय्यर्थ्ययत्समा
नाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्समानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समाना
धिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्व
स्यातिरिक्तयात्तदूटितलक्षणेयत्समानाधिकरण्यव्यापकतावच्छेदकत्वस्यानिवेशात्तदघटितलक्षणसंभवेपि
प्रकृतलक्षणेवैय्यर्थ्यानवकाशात्तत्वंयत्समानाधिकरणसाध्याभावप्रमात्वव्यापकःसाध्यकज्ञानप्रतिबं
धकत्वाभावस्तत्वमियतादृशगर्भकतेद्वितीयलक्षणेपिनतद्वैय्यर्थ्ययत्समानाधिकरणप्रमात्वव्यापकतावच्

साध्याभाव

काभावाद्यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावांतरस्यैवनिवेशादित्यवधेयं। साध्याभाव
पदंसार्थकीकृतस्यैवलक्षणांतरंप्रकारांतरेणदूषयितुमुपन्यस्यतिसाध्याभाववत्
वृत्तित्वविशिष्टनिरूपितविषयितासामान्येप्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वाभावस्तत्वमित्यर्थः।वह्नि
मानधूमादित्यादौहेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयितायाधिकरणधर्मावच्छिन्नाभाव
वृत्तित्वविषयितैवसाचनवद्यानुमितिप्रतिबंधकतावच्छेदिकातच्छालिङ्गानस्यानुमितिप्रतिबंधकत्वात्।व्यभिचा
रिणिसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टविषयितापितादृशीनद्रव्यत्वज्ञानस्यचव्यभिचार निरूपित
ज्ञानविषयानुमितिप्रतिबंधकत्वात्तादृशविषयितायाअनुमितिप्रतिबंधकतावच्छेदकत्वान्नातिव्याप्तिःय
निष्ठतानुपादानेधूमादौवह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिज्ञानमनिष्ठवह्नित्वेनवह्न्याभाववद्वृत्ति
त्वविशिष्टनिरूपितविषयितायाअप्यनुमितिप्रतिबंधकतावच्छेदकत्वाद्वह्निमान्धूमादित्यादावव्याप्तिरत
स्तदुपादानंतथाचेन्नमविषयवह्न्यभाववद्वृत्तित्वस्यहेतुनिष्ठत्वाभावान्नदोषःयनिष्ठपदार्थनिरूपितवि

षयितासामान्येयन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यइतिवाय दुच्यतेतदाव्यधिकरणधर्मावच्छिन्नसा
ध्याभाववद्वृत्तित्वमेवयत्रसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वंनभातंतादृशज्ञानीयहेतुनि
ष्ठतथाविधसाध्याभाववद्वृत्तित्वविषयितायाअव्यनुमितिप्रतिबंधकतावच्छेदकत्वात्। असंभवोव्याप्तिर्वर्तते
साध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वंविषयितावि शेषणंतादृशभ्रमविषयितायन साध्याभाववद्वृत्ति
त्वविशिष्टनिरूपितातादृविषयितानिरूपकस्यव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यविशेषणीभू
तंयत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वंतद्विशिष्टाभावात्नचतद्विशिष्टनिरूपितत्वंय
द्धितवच्छिन्ननिरूपकताकत्वंतदासमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यतद्भ्रमविषयवृत्ता
वसत्वेपितन्निष्ठविषयितानिरूपकत्वेव्यधिकरणीभूयावच्छेदकत्वात् भ्रमविषयितायास्तद्विशिष्टनिरू
पितत्वमक्षतमेवयदिचवस्तुगत्यायत्रतद्विशिष्टंतन्निरूपितत्वमेवविशिष्टनिरूपितत्वंतदाव्यधिकरणाध
र्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वमेवोक्तभ्रमविषयितायाअक्षतमेवतिकथंतद्व्यावृत्ति

क

रितिवाच्यं। तदवच्छिन्नतदाश्रयनिष्ठनिरूपकताविषयितायाएवतथात्वात्। तथाहिविशेषणीभूतधर्मांतरविशि
ष्टेनव्यावर्त्यमानस्यविशेष्यस्यभानेविशेषणांशेप्रकारीभवंत्यांव्यक्तौविशेष्यसंबंधितावच्छेदकतयाभानात्
साध्याभाववद्वृत्तित्वतत्प्रतियोगिकविशेषणविशिष्टविषयेणनिरूपकीभूयविषयितायाव्यावर्तनेव्यावर्तकविषयस्याश्र
यतयाव्यावर्तकंयत्साध्याभाववद्वृत्तितात्वंतस्यापिनिरूपकतावच्छेदकीभूयविषयितायाव्यावर्तकत्वात्। उक्त
भ्रमविषयितायारुक्तेःतव्यावर्तकविषयव्यावर्तकस्यतन्निष्ठसाध्याभाववद्वृत्तिता[illegible]त्वस्यतादृशविष
यितरनिरूपकतानवच्छेदकत्वात्तादृशविषयितायालक्षणघटकत्वात्। एवंचभ्रमविषयितायाव्यावर्तकत
यैवसाध्याभाववत्पदसार्थक्यंतादृशविषयितायाउक्तक्रमेणहेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरू
पितत्वेपिहेतुनिष्ठबोध्यतावविशिष्टनिरूपितत्वानपायात्। साध्याभाववदनुपादायाधिकरणवृत्तितात्व
विशिष्टनिरूपितविषयितानिवेशेवृत्तौसमानाधिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयि
तायारलेपिवृत्तिविशेषणतन्निरूपकेऽधिकरणेसमानाधिकरणधर्मावच्छिन्नाभावभ्रमविषयितावा

रणसंभवात्॥साध्याभावांशनिवेशस्यापिसार्थक्यात्। नचतावत्पर्यंतनिवेशेपिवन्हित्वावच्छिन्नवन्ध्याभावत्वेनाव्य दिश्ग०
धिकरणधर्मावच्छिन्नप्रतियोगिताकवन्ध्याभावभवगाह्यतादृशाभाववद्वृत्तितावगाहियद्दानंतदीयतादृशसा
ध्याभाववद्वृत्तित्वविषयितापिसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितैवव्यधिकरणधर्मावच्छिन्नप्रतियोगिताको
यःसाध्याभावस्तद्वृत्तित्वस्यैवनत्नविशेषणतयाभानाविशिष्टस्यचतादृशज्ञाननिष्ठविषयितानिरूपक
साध्याभाववद्वृत्तित्वेसत्वादिति तदोषतादवस्थ्यमितिचाच्यं॥अभावांशेसाध्यतावच्छेदकावच्छिन्नप्रतियोगि
ताकत्वसंबंधेनसाध्यप्रकारकयमिचाज्ञानमेवानुमितिविरोधीयन्नचव्यधिकरणधर्मावच्छिन्नप्रतियोगि
ताकाभावेसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यंप्रकारस्तादृशज्ञानविषयघटकस्यसा
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यविशिष्टस्यव्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिध्या
तादृशज्ञानविषयितायाविशिष्टनिरूपितत्वासंभवात्। साध्याभाववद्वृत्तित्वरूपविषयस्यप्रतिबंधकतावच्छेदककोट्यप्रविष्टत्वादतिव्याप्तिरतोविषयितापर्यंतनिवेशनंहेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टप्र

तिबंधकतावच्छेदकविषयतापर्याप्यभावविवक्षणेसाध्यप्रतियोगिकाभावमात्रनिवेशेव्यभिचारिण्यतिव्या
प्तिः प्रतियोगितायांसाध्यतावच्छेदकावच्छिन्नतावग्गाहिनएवज्ञानस्यानुमितिप्रतिबंधकत्वात्तदघटितविष
येप्रतिबंधकतावच्छेदकविषयितायाअपर्याप्तिःसाध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्चनसंभवतीति
तदुपेक्षितंव्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितायांप्रतिबंधकतावच्छेदकताभावादतिव्याप्तिरतः
सामान्येइसक्तंप्रकृतानुमितिपदंप्रकृतानुमितिसामान्यपरं अन्यथाव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृ
त्तित्वाभावविषयकसंशयालंबनात्मकप्रकृतानुमितिप्रतिबंधकतावच्छेदकतस्यहेतुनिष्ठतादृशसाध्याभाव
वद्वृत्तित्वविषयितायामपिसत्वात्संशयेतावपिलक्षणगमनासंभवात्एवंप्रकृतेत्यनुपादानेकामिनीजिज्ञासा
दौप्रसिध्यायाऽनुमितिसामान्यप्रतिबंधकतातदवच्छेदकताभावोधर्म्याभाववद्वृत्तित्वविषयितायामक्षतए
वतद्विषयकज्ञानस्यापिअन्यलिंगकान्यसाध्यकान्यसंसर्गकानुमित्यप्रतिबंधकत्वादतःप्रकृतेतितत्साध्यक
तध्येतुकतत्संसर्गपरंसंशेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायाअनुमितिप्रति
क

वंधकस्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसंभवःस्यादतोऽत्रनिष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्यस्यानु
मितिप्रतिबंधकत्वमुपेक्ष्यनिरुक्तविषयितासामान्येऽनुमितिप्रतिबंधकतावच्छेदकताभावपर्यंतानुधावनं
अवच्छेदकत्वंचस्वरूपसंबंधविशेषःनचधूमाभाववद्वृत्तित्वेनघटादिविषयकज्ञानस्याप्यनुमितिप्रतिबंध
कतयाधूमाभाववद्वृत्तित्वविशिष्टविषयिताशालिज्ञानत्वेनप्रतिबंधकताकल्पनस्यासंभवात्तादृशविषयि
तायांप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकतासत्वेनातिव्याप्तिरितिवाच्यं।धूमाभाववद्वृत्तित्वप्र
कारितानिरूपितविषयिताशालिज्ञानत्वेनभ्रमसाधारणप्रतिबंधकताकल्पनसंभवात्। तादृशविषयिता
त्वेनवास्तवधूमाभाववद्वृत्तित्वविशिष्टनिरूपितविषयितायाः प्रतिबंधकतावच्छेदकत्वस्याक्षतत्वात्। न
चैवंसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्व्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषेणाधिकरण
वृत्तित्वावगाहिनःसमानाधिकरणधर्मावच्छिन्नाभावांशेभ्रमत्वेनज्ञानस्यविषयितायाः व्यधिकरणधर्मा
वच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वात्समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयिता

निरूपिताधिकरणविषयिता निरूपिताधेयत्वविषयितात्वेनच प्रतिबंधकतावच्छेदकत्वादव्याप्तिरितिचान्यं हेतु
समानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयितायां प्रतिबंधकतावच्छेदकताभावस्यविव
क्षणीयत्वात्। उक्तनभेचसमानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभावे
नतस्याएव प्रतिबंधकतावच्छेदकत्वेनाव्याप्यनवकाशत्वात्। अथयत्रज्ञाने हेतुसमानाधिकरणतयाभासमा
नेव्यधिकरणधर्मावच्छिन्नाभावव्यधिकरणधर्मावच्छिन्नप्रतियोगितात्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगि
तात्वोभयसंबंधेनसाध्यस्यैकाप्रकारतातादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावीयविषयितायांसा
ध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वसंबंधेनसाध्यविशिष्टाभावनिरूपितत्वस्यविषयीभवदभावेसा
ध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वासत्वेनासंभवेपिव्यधिकरणधर्मावच्छिन्नप्रतियोगितात्वसंबंधेन
साध्यविशिष्टाभावनिरूपितत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वसंबंधविषयितानिरूपितविष
यितात्वेनानुमितिप्रतिबंधकतावच्छेदकत्वस्यवाक्षतत्वात् अव्याप्तिर्दुर्वारेतिचेन्नतादृशभ्रमस्याप्रामा

णिकलात्प्रामाणिकेचसंसर्गीयविषयितानूयानिरूपकतयालक्षणघटकाभावोविषयितायाविशेषणीयतया
सामंजस्यात्।अथसाध्यरूपविशेषणविशिष्टस्याभावस्यविषयितानिरूपकतयालक्षणघटकत्वेसाध्यभावयोःसं
बंधस्यसंबंधविध्यालक्षणघटकत्वमावश्यकंतत्रसंबंधःसाध्यतावच्छेदकावच्छिन्नप्रतियोगितात्वरूपोऽधि
करणधर्मावच्छिन्नप्रतियोगितात्वरूपश्चाननुगतइतिप्रथमस्यनिवेशेकेवलान्वयिनिसाध्यविशेषिताभावाप्र
सिद्धिःव्यतिरेकिसाध्यकस्थलेतुचतादृशदृष्टांतसमानाधिकरणाभावाप्रसिद्धिरितिसंभवः।चरमस्यनिवेशेच
सर्वत्रव्यभिचारिण्यतिव्याप्तिः प्रतियोगितावच्छेदकधर्माणांचोपलक्षणीभूतनकेनचिद्रूपेणानुगमेपिनिवे
शेनसंभवतिप्रतियोगितावच्छेदकोपलक्षणस्यसंबंधघटकतयाभानात्।नचावच्छेदकावच्छिन्नत्वाविशेषि
तप्रतियोगितायाएवसंबंधितयानिवेशेप्यननुगमनिबंधनादोषइतिवाच्यं।अवच्छेदकावच्छिन्नत्वाविशे
षितप्रतियोगित्वविषयकाभावज्ञानस्यप्रतियोगिमत्ताज्ञानाविरोधितयातद्दानाविरोधिनःप्रतियोगिवि
शेषितभावज्ञानस्यचानुभवविरुद्धतयावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगि[illegible]

नायाः संसर्गतयाभानान्नावातिप्रसंगः नच स्वावच्छिन्नप्रतियोगितात्वसंबंधेन साध्यतावच्छेदकविशेषितएवाभा
वो निवेश्यः नतुसाध्यविशेषितः वन्हित्वादिनाधटादभावएववन्ह्यादिसाध्यकस्थलेलक्षणघटकेइतिवाच्यं।
न्नमेयत्वावच्छिन्नसाध्यकस्थलेतादृशाभावाप्रसिद्धेः एवं स्वावच्छिन्नप्रतियोगितात्वसंबंधेनवन्हित्वादि वि
शेषितवन्हित्वादिनाघटादभावे भासमानेयन्नसंबंधघटकप्रतियोगितायांबाधितस्यवन्ह्यादिनिष्ठ
त्वस्यभानेतादृशज्ञानीयाभावविषयितायाउक्तसंबंधेन साध्यतावच्छेदकविशिष्टाभावनिरूपिततयाऽनु
मितिविरोधितयाचानुपपत्तेर्दुर्वारत्वात्स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशसर्वत्रसंभवता
वप्रसिद्धिः एवंप्रतियोगिविशेष्यतापन्नेएवाभावेप्रतियोगिपार्थक्येणसमानाधिकरणधर्मस्यस्वातंत्र्ये
णव्यधिकरणधर्मस्यस्वावच्छिन्नप्रतियोगितात्वसंबंधेनप्रकारत्वंप्रामाणिकंनतुप्रतियोगिविशेष्यता
नापन्नेवन्हिर्नास्तित्वन्हित्वेनघटोनास्तीत्यवप्रतीतेः नतुवन्हित्वेननास्तीतितथाचविशिष्यप्रतियोग्यवि
शेषितस्यउक्तसंबंधेनसाध्यतावच्छेदकविशेषितस्याभावस्यविषयित्वनिरूपकतयानिवेशोनसंभवसे

वेतिचेन्नैवं प्रतियोग्यादिविशेषितोभावीयतेनविशिष्टनिरूपितविषयितानलक्षणेनिवेश्यतेअपितुस्वनिरू
पकहेतुसमानाधिकरणाभावनिष्ठोयःसंबंधःतत्प्रयोगिसाध्यनिष्ठतत्संबंधावच्छिन्ननिरूपकतावच्छेदकता
कत्वेनयत्रहेतुसमानाधिकरणघटत्वावच्छिन्नवन्ध्याभाववन्हित्वावच्छिन्नप्रतियोगितावत्संबंधेनवन्ध्यादेः
साध्यस्यप्रकारतातादृशज्ञानविषयितानिरूपकाभावनिष्ठाननिरुक्तनिरूपकतावच्छेदकतावच्छेदकसं
बंधइतितद्विषयिताव्युदासःयत्रवन्हित्वावच्छिन्नघटाभावेतनिष्ठवन्हित्वावच्छिन्नप्रतियोगितावत्संबंधव
न्हेःसंबंधतयाभासतेतत्रतत्संबंधप्रतियोगीनवन्हिरपितुघटएवेतिसाध्येवास्तवतादृशप्रतियोगित्वनि
वेशात्तादृशज्ञानीयाभावविषयितान्युदासःसाध्यनिवेशाद्यत्रवन्हित्वेनघटएववन्हित्वावच्छिन्नप्रतियो
गितावत्संबंधेनतत्संबंधानुयोगिनिवन्हित्वावच्छिन्नप्रतियोगितावत्घटाभावप्रकारतादृशज्ञानी
याभावविषयितान्यासत्तसंबंधप्रतियोग्यवच्छिन्ननिरूपकतावत्वेप्यनुमितिविरोधित्वेपिचनक्षतिःयत्रघ
टत्वावच्छिन्नवन्ध्याभावेघटत्वावच्छिन्नप्रतियोगितावत्वमेववन्हित्वावच्छिन्नप्रतियोगितावत्वेनवन्हेःसंस

र्गतयाभासतेतादृशज्ञानस्यप्रामाणिकत्वेसाध्यप्रतियोगिकोहेतुसमानाधिकरणाभावानुयोगिकोयधर्मा
वच्छिन्नप्रतियोगिताकत्वविशिष्टःसंबंधस्तधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टसंबंधावच्छिन्नैनिरू
पकतावच्छेदकत्वंविवक्षणीयमितिदिक्।[illegible]नन्वव्यभिचारज्ञानस्यानुमितिकारणव्याप्तिज्ञानंप्रतिव
ति प्रतिबंधकत्वमितिव्यभिचारिण्यव्याप्तिरितिवाच्यंतज्ज्ञानकज्ञानप्रतिबंधकतावच्छेदकत्वाभावस्येवविवक्षित
त्वात्।अनुमित्यविरोधित्वज्ञानस्याअनुमितिप्रतिबंधकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैवाअनुमितिहेतु
त्वादितिएतन्मतेनिरुक्तविषयितानिष्ठतादृशधर्मावच्छेदकत्वाभावघटितस्यैवानुमितिकारणीभूतज्ञानविषयत्वा
दितिभावः।अनुमित्यविरोधितयाअनुमितिजनकज्ञानाप्रतिबंधकतयासाध्याभाववद्वृत्तित्वज्ञानस्यानुमि
तिजनकत्वाभावादितिभावः।अतिप्रसंगादितिहेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववव
द्वृत्तित्वविषयितासामान्येऽनुमितिजनकज्ञानप्रतिबंधकतावच्छेदकत्वाभावस्यास्वीकारादितिभावः।नच
हेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितानुमितिप्रतिबंधकतावच्छेदिकयेतादृशज्ञानीयहेतुनिष्ठसाध्या

भाववद्वृत्तित्वविषयितायाअपितादृशविषयितासामान्यांतर्गततयातत्रचप्रकृतव्याप्तिज्ञानप्रतिबंधकता प्र०मि०
वच्छेदकत्वस्यापिसत्वेनातिव्याप्त्यनवकाशइतिवाच्यं।एवंसतिसाध्येतावत्पक्षनिष्ठव्यधिकरणधर्मावच्छिन्ना
भाववद्वृत्तित्वेविषयितेऽनुमितिप्रतिबंधकतावच्छेदकत्वभ्रमनिरस्तादृशसाध्याभाववद्वृत्तित्वविषयितायां
अनुमितिप्रतिबंधकतावच्छेदकत्वसत्वेनलक्षणगमनासंभवात्।इतरविशेषणत्वेनतादृशविषयिताया
एवलक्षणेनिवेश्यतयाविषयितविशेषणत्वेनसाध्याभाववद्वृत्तित्वविषयितायाःप्रतिबंधकतावच्छेदक
त्वेनातिव्याप्तिवारणसंभवादितिध्येयं॥७॥मिश्ररीत्यासाजात्यघटनेनसाध्याभाववदवृत्तित्वरूपांव्याप्तिं
परिष्कृत्योपपादयतिकेचित्विति।धूमवान्वह्नेरित्यादौव्यधिकरणधर्मावच्छिन्नाभावसजातीयस्यघटत्वा
दिनातेनाधिकरणवृत्तित्वाभावस्यहेतौसत्वादतिव्याप्तिरतोयावंतइतितथाचयावदेतर्गतसमानाधिक
रणधर्मावच्छिन्नाभावसजातीयस्यतदधिकरणवृत्तित्वाभावस्यहेतावसत्वान्नातिव्याप्तिः।तत्रैवसमानाधि
करणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्यव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिवा

रणाय प्रत्येकं तत्तत्सजातीयाइति तथाच वक्ष्यमाणरूपेण व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभाव
स्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वभावान्नदोषः यावत्साध्याभावत्वेन साध्याभावा
नां निरूपकतया साजात्येऽन्वयेव्यतिरेकिसाध्यकेवह्निमान् धूमादित्यादौ यावत्साध्याभावनिरूपितत्वस्य
क्वचिदपि साजात्यं सत्वाद्यावत्साध्याभावसाजात्याप्रसिध्या व्याप्तिरतस्तत्तद्व्यक्तित्वेनतेषां साजात्येऽन्वयनि
र्वाहलाभायतदितितन्त्रसजातीयत्वेनोपस्थितानां समानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभा
वसजातीयानामेकस्मिन्नधिकरणवृत्तित्वाभावएकत्रदृश्यमितिरीत्याऽन्वयेपुनर्व्यतिरेकिसाध्यकव्याप्तिः
एकत्राभयसाजात्याभावात्। अतएवैकैकाभावएकैकाभावसजातीयाभेदान्वयउपगंतव्यएतदर्थतास्यय
ग्राहकंप्रत्येकमितिप्रथमाबहुवचनांतंतत्तदधिकरणवृत्तित्वाभावइत्यस्यविशेषणंयावत्साध्याभावत्वेन
साध्याभावानामधिकरणान्वयेवह्निमान् धूमादित्यादौतत्तद्धर्मावृत्तित्वावच्छिन्नप्रतियोगिताकसाध्याभा
वघटितसमुदायाधिकरणतायाः क्वचिदप्यसत्वेनाव्याप्तिःस्यादतस्तत्तद्व्यक्तित्वेनसाध्याभावानामधिकर

णेऽन्वयलाभायचरमंतत्तदितिनत्वमिति।अव्यभिचरितत्वमित्यर्थः।ननुतत्तत्सजातीयत्वंतत्तद्वृत्तिधर्मव
त्वंतथाचसमानाधिकरणधर्मावच्छिन्नाभावप्रसंगतादिधर्मवत्वंव्यधिकरणधर्मावच्छिन्नाभावपिवर्त
तइतितस्यापितत्सजातीयत्वाव्यभिचारिण्यतिव्याप्तिरतआह।साजात्यंचेतिसमानासमानाधिकरणेति।
समानाधिकरणधर्मावच्छिन्नप्रतियोगितात्वव्यधिकरणधर्मावच्छिन्नप्रतियोगितात्वान्यतरनिरूपणार्थः
तृतीयार्थश्चात्रेदंतत्स्यत्वसाजात्येतत्त्वयः।विवक्षणीयमितिशेषःतथाचतत्तत्सजातीयाद्रव्यस्थतत्तद्
भाववृत्तितानिरूपणान्यतरनिरूपणेत्यर्थः।यद्यपिवह्नित्वावच्छिन्नाभावनिष्ठसमानाधिकरणधर्मावच्छिन्नप्र
तियोगितात्वंवह्नित्वावच्छिन्नप्रतियोगितात्वनिरूपितत्वंतदधिकरणवृत्तित्वाभावसंभावितमेवतथा
पिस्वासमानाधिकरणधर्मावच्छिन्नायायाप्रतियोगितातदनिरूपकत्वंस्वसमानाधिकरणधर्मावच्छिन्न
प्रतियोगितात्वंस्वसमानाधिकरणधर्मावच्छिन्नायायाप्रतियोगितातदनिरूपकत्वमेवव्यधिकरणधर्मा
वच्छिन्नप्रतियोगितात्वमिहविवक्षितंतत्रसाध्याभावेद्रव्यवृत्तित्वाभावोभयसाधारणमेवसमनियतत्वाभावे

क्यमतेच स्वाधिकरणवृत्तिधर्मावच्छिन्नायाप्रतियोगितातन्निरूपकत्वरूपाव्यधिकरणधर्मावच्छिन्नप्रतियोगि
ताकत्वस्यथाश्रुतार्थएवादरणीयः तन्मतेव्यधिकरणधर्मावच्छिन्नसाध्याभावतद्वृत्तित्वाभावयोरैक्या
त्तादृशसाध्यभावस्ययादृशप्रतियोगिता निरूपकत्वंतादृशप्रतियोगिता निरूपकत्वस्यतथाविधतद्वृत्तित्वाभा
वेपिसत्वात्।एतेनसमनियताभावानामैक्यमतेव्यधिकरणधर्मावच्छिन्नाभावस्यसंभवायादिसंबंधावच्छिन्न
गगनत्वावच्छिन्नगगनाद्यभावाभिन्नतयातस्यसमानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरू
पकतयाव्यधिकरणधर्मावच्छिन्नाभावस्यनिरुक्तरूपवत्वानुपपत्तास्वसमानाधिकरणधर्मावच्छिन्नसमानाधि
करणसंबंधावच्छिन्नप्रतियोगितायाअनिरूपकत्वपर्यंतनिवेशप्रयासानापादयःसमनियताभावैक्यमतेग
गनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापिसाऽत्रासविवक्षणंसंभवतीतिध्येयं। ननुयावत्साध्याभावांतर्ग
तानांतत्तत्साध्यव्यक्त्यभावादीनामधिकरणेहेतोर्वृत्त्यावह्निमान् धूमादित्यादावव्याप्तिरतआह।साध्याभाव
श्चेतिद्वितीयपरीत्यर्थः।तियत्समानाधिकरणेतिद्वितीयलक्षणरीत्यर्थः।साध्यतावच्छेदकावच्छिन्नव्या

वाच्यत्वादिनाघटाद्यभावमादाय

पकतावच्छेदकरूपावच्छिन्नाभावस्यवसाध्याभावपदेनविवक्षितइतिभावः।साध्यतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकप्रतियोगिताकाभावविवक्षणेतथाविधवह्निघटोभयाभावमादायदोषतादवस्थ्यमतः प्रथमरीसे
तिनोक्तंसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणेवाच्यत्वादिसाध्यकस्थलेलक्षणसमन्वयसं
भवेपिस्वरूपसंबंधेन[illegible]प्रमेयमात्रसाध्यकस्थलेतथाविधाभावाप्रसिद्ध्याव्याप्तिरता
व्यापकतावच्छेदकपर्यंतानुधावनंतथाचज्ञेयत्वादिनावाच्यत्वाभावस्तथेतिनदोषःसाध्यतावच्छेदकस
मनियतप्रतियोगिताकाभावनिवेशेचवह्न्यादिसाध्यकतार्णनाराभयाभावादिकमादायदोषस्यव्यास
ज्यवृत्तिधर्मावच्छिन्नत्वंप्रतियोगितायांनिवेश्यवारणेपिसत्तादिसाध्यकस्थलेविशिष्टसत्ताभावमादा
यदोषइतितादृशाभावोननिवेशितःव्यापकतावच्छेदकावच्छिन्नप्रतियोगितान्यूनवृत्तिधर्मावच्छिन्नाति
रिक्तवृत्तिधर्मावच्छिन्नावायायाप्रतियोगितायाग्रहत्यतेनविशेषणीयातेनवह्न्यादिसाध्यकस्थलेवह्नित्वादि
नामहानसीयवह्निघटान्यतराभावमादायनदोषः।न्यूनवृत्तित्वंअतिरिक्तवृत्तित्वंचविरुध्यावृत्तेर्निवेश्यं

नातोव्यधिकरणधर्मावच्छिन्नाभावासंग्रहःव्यापकतान्वसाध्यतावच्छेदकसंबंधावच्छिन्नाग्राह्यातेनसंयोगादि
नावन्द्यादिसाध्येसमवायादिनावन्द्याद्यभावमादायासंभववारणायसाध्यतावच्छेदकसंबंधावच्छिन्नत्वन
प्रतियोगितायाविशेषणीयतयासमवायादिनाद्रव्यत्वादिसाध्यकैविषयतासंबंधेनसाध्यव्यापकस्यज्ञा
नादेःसमवायादिनाभावमादायदोषस्यनावकाशःतादात्म्यसंबंधेन प्रमेयसाधकस्थलेसमवायित्वरूपव्य
धिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदएवलक्षणघटकःसमनियताभावैक्यमतेतादृश
भेदस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगित्वकसंसर्गाभावाभिन्नतयाव्यधिकरणधर्मावच्छिन्नप्रतियोगिता
कत्वेनतत्साजात्यस्यप्रसिद्धिसंभवात्।यत्तुसंयोगेनप्रमेयत्ववान्नेतिप्रतीतिःसाक्षिकःसंयोगावच्छिन्नप्र
मेयत्वनिष्ठप्रतियोगितावच्छेदकताकभेदोलक्षणघटकःअसंताभावस्यैक्येनसंबंधेनतद्वृत्तित्वाधि
र्मःतत्संबंधेनतद्वच्छिन्नप्रतियोगिताकभेदस्यापिउक्तयुक्तिबलात्सिद्धिरितितन्नवन्हिमान्धूमात्गुण प्रतीति
वान्द्रव्यत्वादित्यादौविषयितासंबंधेनवन्हित्वगुणत्वादिमतःसाध्यतावच्छेदकसंबंधावच्छिन्नाभावस्य

वारणायव्यापकतावच्छेदकतापटकसंबंधावच्छिन्नत्वेनप्रतियोगितायाअवश्यंनिवेशनीयतयातादृशगभाव
स्यप्रामाणिकत्वेपिलक्षणघटकतासंभवात्ननुकपिसंयोग्येतद्दृक्षत्वादिसादोकपिसंयोगत्वावच्छिन्नाभाव
स्यापिलक्षणघटकतयातदधिकरणहेतार्दृत्तेरव्याप्तिःनचसाध्यतावच्छेदकावच्छिन्नव्यापकताशरीरप्रति
योगिवैयधिकरण्यनिवेशस्यनिष्फलतयाकपिसंयोगत्वादेःसाध्यव्यापकतावच्छेदकत्वेनतादृशगभावानांल
क्षणघटकतेतिवाच्यं।संयोगनवत्त्वादिसाध्यकस्थलवह्नित्वादीनांसंयोगरूपसाध्यतावच्छेदकसंबंधघटि
तव्यापकतावच्छेदकत्वसंपत्तयेव्यापकताशरीरप्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात्।अन्यथासा
ध्यवद्घटत्तिकालावच्छेदनवह्नित्वद्रव्यत्वाद्यवच्छिन्नस्यसंयोगसंबंधेनाभावसत्वात्।साध्यतावच्छेदकसंबंध
घटितव्यापकतावच्छेदकस्यैवाप्रसिद्धिप्रसंगात्।तथाचतत्तदधिकरणपदेनतत्तद्भावीयव्याप्यवृत्तितानि
रूपकाधिकरणमेवविवक्षणीयंव्याप्यवृत्तितानिरूपकत्वंचनिरवच्छिन्नाधेयतानिरूपकत्वं।एवंचसंयोगा
द्यभावस्यतथाविधाधिकरणंगुणादिरवृत्तिनदोषः इत्थंचकपिसंयोगाभाववान्कपिसंयोगाधिकरणताभा

ववानवायेयत्वादिसादौकपिसंयोगतदधिकरणत्वादिरूपाणांयावत्साध्याभावांतःपातिनामभावानांतथा
विधाधिकरणप्रसिद्धाव्यापिरतःसाध्याभावंव्याप्यवृत्तित्वेनविशिनष्टिव्याप्यवृत्तिस्त्वेतितथाचतादृशाभाव
स्यतथाविधयावदनंतर्गतितयातथाविधाधिकरणप्रसिद्धावपिनक्षतिःव्याप्यवृत्तितंचनिरवछिन्नवृत्तिक
त्वंनत्ववछिन्नवृत्तिकात्यंतंतथासतिसंयोगनधूमसाध्यकवह्निचारिणिसंयोगेनधूमत्वाद्यवछिन्नधूमाद्य
भावस्यमहानसादावछिन्नवृत्तिकतयायोगोलकान्यत्वाद्यभावसाध्यतावच्छेदकसंबंधघटितव्यापक
तावच्छेदकरूपावछिन्नप्रतियोगितात्वविरहेणव्यधिकरणधर्मावछिन्नप्रतियोगिनाकाभावस्यैवलक्ष
णघटकतयाऽतिव्याप्तिः एवंचवह्न्यभावसंयोगाद्यभावस्यापिकुत्रचिन्निरवछिन्नवृत्तिकत्वेनलक्षणघटक
यातदीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादायदोषवारणायाधिकरणपदस्यव्याप्यवृत्ति
तानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयं। ननु कालिकसंबंधावछिन्नप्रतियोगिताकाकारणभावाभा
वेसाध्य आत्मत्वादिहेतावव्याप्तिः व्याप्यवृत्तेःसाध्याभावस्याकारणभावरूपस्यव्याप्यवृत्तितानिरूपकाधि

करणमादौ हेतोर्वक्तेरतस्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैय्यधिकरण्यनिरूपकाधिकरणमेवतच्चद
धिकरणपदेनविवक्षणीयंप्रतियोगितावच्छेदकावच्छिन्नवनिवेशगत एतद्रूपान्यत्वविशिष्टगुणत्ववान्। गु
णत्वादिसादौसमवायरूपसाध्यतावच्छेदकसंबंधघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वा
द्यवच्छिन्नाभावस्यप्रतियोगिवैय्यधिकरण्यनिरूपकतायाहेतुमत्त्वेपिनातिव्याप्तिः तथाचकालिकसंबं
धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकामत्वादावव्याप्तिःतन्नव्याप्यवृत्तियावत्साध्या
भावांतःपातिन आकाशत्वाभावादेः प्रतियोगितावच्छेदकावच्छिन्नवैय्यधिकरण्यनिरूपकाधिकरणप्रसि
द्धेः कालस्याकाशवच्छेदनतादृशसाध्यरूपतदभावीयप्रतियोगिसत्वात्। सर्वत्रैवतादृशाभावस्यप्रतियोगि
समानाधिकरणत्वात्। अतोव्याप्यवृत्तित्वमुपेक्ष्यतादृशाभावप्रतियोगितावच्छेदकावच्छिन्नवैय्यधिकरण्यमे
वनिवेशयति। प्रतियोगितावच्छेदकावच्छिन्नेति अत्रचसमनियताभावेक्यमनेसर्वेषामेवव्यधिकरण
धर्मावच्छिन्नाभावप्रतियोगितयातत्प्रतियोग्यनधिकरणप्रसिध्यातदसंग्रहः विशिष्टसाध्यव्यापकता

वच्छेदकावच्छिन्नयत्किंचित्प्रतियोगितात्र्श्रयेवैय्यधिकरण्यनिवेशेपिचवाच्यत्वादिनाघटाद्यभावस्यघटादि
व्यधिकरणत्वेनलक्षणघटकतानिर्वाहेपिप्रतियोगिभेदेनप्रतियोगितभेदमतेजन्यज्ञानविषयत्वादिसाध्य
कस्थलेयत्किंचित्कालावच्छेदेनपरमाण्वादौप्रसिद्धस्यसाध्यतावच्छेदकावच्छिन्नाभावस्ययत्किंचित्प्रतियोग्य
नधिकरणवृत्तेः प्रतियोगिवैय्यधिकरण्यनिरूपकाधिकरणप्रसिद्ध्याव्याप्तिः तन्नयत्किंचित्प्रतियोगितांन
र्भावेणतादृशनधिकरणत्वप्रसिद्धिसंपादनेयत्किंचित्प्रतियोगितात्र्श्रयप्रतियोगिवैय्यधिकरण्यनिरू
पकाधिकरणहेतावृत्तिरव्याप्तितादवस्थ्यं एवंवन्हिमान्धूमादिसादोद्रव्यत्वाद्यवच्छिन्नस्यसंयोगेनयो
भावस्तस्यद्रव्येप्युत्पत्तिकालावच्छेदेनवर्तमानस्यगुणादौप्रतियोगिव्यधिकरणस्यप्रतियोगिवैय्यधिकर
ण्यनिरूपकाधिकरणेगुणादौहेतुतावच्छेदकसंबंधेनवृत्तेरप्रसिद्ध्यापरिहारश्चयहेतुतावच्छेदकसंबंधे
नैकस्यचिदधिकरणप्रतियोगिवैय्यधिकरण्यमभावविशेषणंदेयं एवंचेतद्रूपान्यत्वविशिष्टसत्तावान्
जातेरिसादोसमवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तावाद्यवच्छिन्नोभावस्यसत्ताधिकरणसत्ता

विरूपप्रतियोगिसमानाधिकरणत्वाव्यधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघटकतया तियासिद्धि
तः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानं। अथकेवलान्वयिसाध्यकस्थलेलक्षणघटकानांवाच्यत्वा
द्यवच्छिन्नघटाद्यभावानांसर्वेषामेवप्रतियोगितावच्छेदकवाच्यत्वावच्छिन्नाधिकरणप्रसिद्धिः॥न
चैवंकिंचित्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणवृत्तित्वमेवनिवेशनीयंतथाचसमनियतत्वाभावा
नामेकैकापरिगणनव्यतिरिक्तावच्छेदकधर्मस्याप्युक्ताभावप्रतियोगितावच्छेदकतयातदवच्छिन्नाधि
करणत्वस्यप्रसिद्धातेवालक्षणघटकतेतिवाच्यं।तथासतिसंयोगाभावसाध्यकस्थलेसंयोगस्य
काभावस्यचकिंचित्प्रतियोगितावच्छेदकसमवेतसामान्याभावावच्छिन्नाधिकरणवृत्तित्वात्तस्या
वर्तनासंभवात्। विशिष्टसाध्यव्यापकतावच्छेदकत्वेनप्रतियोगितावच्छेदकविशेषणेउक्तस्थलेतादृ
शप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रसिद्धेर्दुर्वारत्वात्।प्रतियोगितावच्छेदकावच्छिन्नप्रति
योग्यनधिकरणवृत्तित्वनिवेशेचव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यप्रतियोगितावे

छेदकावच्छिन्नप्रतियोग्यप्रसिध्यातादृशप्रतियोगिवैयधिकरण्यंदुर्घटमितिअवच्छिन्नत्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणायेयेतत्तदन्यत्वंव्यधिकरणंतार्थः। ननुप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वंव्यधिकरणधर्मावच्छिन्नाभावस्यविशिष्टप्रतियोग्यप्रसिध्यासंग्रहात्। नचैवंधूमवान्नह्रित्यादौसाध्यतावच्छेदकीभूतसंयोगसंबंधघटितव्यापकतावच्छेदकधूमत्वावच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकानांधूमाद्यभावानामुत्पत्तिकालावच्छेदनधूमादिमतिवृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैवप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतयातिव्याप्तिरितिवाच्यं। साध्यतावच्छेदकसंबंधेनव्यापकतामनिवेश्ययत्नसंबंधेनव्यापकतातत्संबंधावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावंनिवेश्यविषयतासंबंधेनसाध्यव्यापकस्यज्ञानस्यसमवायसंबंधावच्छिन्नाभावमादायोक्तदोषस्यवारणीयतयाऽयोगोलकभेदादेरभावमादायातिव्याप्तिवारणसंभवात्। यादृशप्रतियोगितावच्छेदको योधर्मस्तद्विशिष्टतादृशप्रतियोगिताश्रयसामानाधिकरण्यंविवक्षणीयंतेनसमनियतताभावैक्यमेतावा

च्यत्वादिनाघराद्यभावस्यापिघटत्वादिनावाच्यत्वाभावाभिन्नतयावाच्यत्वादिप्रतियोगिकत्वेनप्रतियोगितावच्छेदकवाच्यत्वविशिष्टवाच्यत्वादिरूपप्रतियोगिसामानाधिकरण्येपिनक्षतिः। नचैवंसतिवाच्यत्वादिसाध्यकसर्वेषामेवाभावानांपूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनासमानाधिकरणतयाप्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरितिवाच्यं। स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगितानिरूपितत्वेनव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताविशेषणीयादृश्यत्वेनैवप्रतियोगितावच्छेदकसादस्तात्पर्यात्। वाच्यत्वावच्छिन्नघटादिनिष्ठप्रतियोगितायाः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्ध्यानिरुक्तप्रतियोगितानिरूपितत्वेननत्न्यनिरूपकाभावमादायलक्षणसमन्वयसंभवात्। नचैवंतथापिएतदभावभिन्नंमेयत्वादिसादौसाध्यव्यापकतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैतदभावमात्रवृत्तेरभावमात्राधिकरणतयाधिकरणस्वरूपत्वादतदभावभेदादिरूपप्रतियोगिसमानाधिकरणतयानिरुक्तप्रतियोगितानिरूपितव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावोव्यधिकरणधर्मावच्छिन्नाभावएवेसति

व्याप्तिरितिवाच्यं। स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेनवर्तनीयो भावस्तदीयप्रतियोगि
तानिरूपितत्वेनव्यापकतावच्छेदकावच्छिन्नप्रतियोगितायाविशेषणीयतया एतदभावाधिकरणेएतदभावभि
न्नेएतदभावत्वेनएतदभावरूपएतदभावभेदाभावस्यवृत्तावपितादृशाधिकरणेएतदभावभेदोनास्तीतिप्र
तीत्याएतदभावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेनतस्यावृत्तित्वादेतदभावभेदत्वावच्छिन्नप्रतियोगि
तायांनिरुक्तप्रतियोगिताभेदस्याक्षतत्वादित्याहुस्तन्निरस्तं।व्यापकताघटकसंबंधावच्छिन्नाभावनिवेशे
व्यापकताशरीरप्रतियोगिवैय्यधिकरण्यस्याभावाविशेषणत्वेपिसंयोगादिनाधूमादिसाध्यकवह्न्यभिचारि
ण्ययोगोलकान्यत्वाभावमादायअतिव्याप्तिवारणसंभवात्। तन्नतन्निवेशप्रयोजनाभावेनाव्याप्यवृत्तिसा
ध्याभावमादायाव्याप्यनवकाशात्। अभावव्याप्यवृत्तित्वंविशेषणव्यावृत्यसंगतिः। अस्तुवासाध्यव्यापक दि
तावच्छेदकस्यापिसाध्यवन्निष्ठाभावीयव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकतयातदभावव्याव
र्तनायव्यापकताशरीरप्रतियोगिवैय्यधिकरण्यप्रवेशस्तथाप्येतादृशप्रतियोग्यसामानाधिकरण्यविव

क्षणतस्याव्याप्तिवारणप्रयोजनकत्वाभिधानासंगतिः अभावतदनिवेशेव्याप्यवृत्तिसाध्यकपियावत्साध्य
वद्विषयकजन्यज्ञानव्यक्तिविशेषस्यप्रतियोगिवैय्यधिकरण्यघटितसाध्यव्यापकताश्रयत्वात्। कालविशेषा
वच्छेदनहेतुमतितदभावदृत्तेरसंभवस्यैवप्रसंगात्। अत्रवदंतिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधि
करणवृत्तित्वमेवतदर्थः। नचव्यधिकरण धर्मावच्छिन्नाभावस्यप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसि
धेः केवलान्वयिसाध्यकप्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरव्याप्तिरि
तिवाच्यं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वंहिस्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्र
तियोगिवृत्तिप्रतियोगितावच्छेदकतानियामकसंबंधावच्छिन्नत्वंज्ञेयत्वत्वादिनावाच्यत्वाद्यभावस्यतादृशभेदसमाना
धिकरणतयाप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैय्यधिकरण्यंसकलघटभेदव्यधिकरणधर्मावच्छिन्नस्वप्र
तियोगिवृत्तिप्रतियोगितावच्छेदकतानियामकसंबंधावच्छिन्नत्वंज्ञेयत्वत्वादिनावाच्यत्ववद्भेदस्यैवतथात्वात्। कपिसंयोगाभाव
वान्मेयत्वादिसाद्यैकपिसंयोगादिरूपसाध्याभावस्यापिज्ञेयत्वत्वादिनाकपिसंयोगाभावादिभद्भेदसामा

नाधिकरण्यसत्वात्। तस्यचस्वप्रतियोगितावच्छेदकावच्छिन्नवैय्यधिकरण्यनिरूपकाधिकरणप्रसिध्याऽव्या
प्तिरतःप्रतियोगितावच्छेदकावच्छिन्नत्वंभेदप्रतियोगितावच्छेदकतायांविशेषणंतत्रैवकपिसंयोगात्मकाभा
वीयप्रतियोगितावच्छेदकीभूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्थापिनिरुक्तप्र
तियोगितावच्छेदकताकत्वात्। तेसामानाधिकरण्यमादायकपिसंयोगाद्यात्मकाभावानांप्रतियोगितावच्छे
दकावच्छिन्नप्रतियोगिवैय्यधिकरण्यवारणायसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेनप्रतियोगि
तावच्छेदकंविशेषणीयंसमवेतसामान्याभावत्वादेःकपिसंयोगाभावादिव्यापकतानवच्छेदकतयानदोषः
नचात्रसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेनप्रतियोगितावच्छेदकेविशेषितेतत्तत्साध्यव्यक्त्यभा
वादीनामीदृशप्रतियोगितावच्छेदकावच्छिन्न[illegible]प्रतियोगिवैय्यधिकरण्यंनघ
टतेसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतस्वप्रतियोगितावच्छेदकाप्रसिद्धेःतथाचसाध्याभाव
श्चेत्यादिनासाध्याभावपदेनसाध्यतावच्छेदकावच्छिन्नव्यापकतानवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव

विवक्षणसंगतिरितिवाच्यं। साध्याभावश्चयादिग्रंथस्यव्याप्यवृत्तितानिवेशकल्पेऽभावे साध्यतावच्छेदकावच्छि
न्नेत्यादिविशेषणदानपरत्वात्। द्वितीयकल्पेन प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्यतादृ
शव्यापकतावच्छेदकत्वेनविशेषणमतादृशरूपावच्छिन्नप्रतियोगिताकत्वाभावोत्रलक्षणघटकइत्यर्थकलात्।
एतत्कल्पेचाभावांशेतादृशप्रतियोगिताकत्वविशेषणविरहेपिक्षतिविरहात्ततत्रैवकपिसंयोगाभावत्वादिना
घटादिभेदसामानाधिकरण्यमादायतद्दोषवारणायस्वप्रतियोगिवृत्तित्वंभेदप्रतियोगितावच्छेदकतायां
विशेषणंसंयोगसामान्याभावादेरपिकपिसंयोगाद्यात्मकाभावप्रतियोगितयाकपिसंयोगाद्यात्मकाभाव
स्यप्रतियोगितावच्छेदककपिसंयोगाभावत्वादिनासंयोगसामान्याभाववद्भेदसामानाधिकरण्यमादायतद्दो
षतादवस्थ्यवारणाययादृशप्रतियोगितावच्छेदकोयोधर्मस्तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेवभे
दप्रतियोगितावच्छेदकतायांनिवेशनीयंकपिसंयोगाभावत्वंचकपिसंयोगाभावनिष्ठप्रतियोगितायामेवा
वच्छेदकंसंयोगसामान्याभावश्चनतादृशप्रतियोगिताश्रयइतिनतादृशभेदमादायदोषः। भेदप्रतियोगिता

वच्छेदकतायांस्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वमपिनिवेशनीयंतेनकपिसंयोगध्वात्मकाभावस्यक
पिसंयोगाभावत्वावच्छिन्नकपिसंयोगाभावादिनिष्ठविषयितासंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभे
दसामानाधिकरण्येपिननदोषतादवस्थ्यंएवंप्रतियोगितावच्छेदकावच्छिन्नैक्यधिकरणेनिरूपकत्वंस्वनि
ष्ठंयत्स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यंत
न्निरूपकत्वंअतोव्यधिकरणधर्मावच्छिन्नाभावस्यप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपिनता
दृशाधिकरणप्रसिद्धिःकपिसंयोगीएतत्वादियादोहत्वधिकरणेपिद्रव्यत्वादिनाकपिसंयोगादिमतःकपि
संयोगत्वादिनाद्रव्यत्वादिमतोभेदसत्वान्नतस्यापिनादृशाधिकरणत्वापत्तिरतोऽवच्छिन्नांतनिष्ठांतयानु
पादानंपूर्वक्षणादिरत्तित्वविशिष्टस्वाभावत्वादिप्रतियोगितावच्छेदकरूपेणकपिसंयोगादिमद्भेदमादाय
तद्दोषतादवस्थ्यमतःतत्प्रतियोगित्वांशेयनिष्ठप्रतियोगितावच्छेदकतायांतदवच्छेदकावच्छिन्नत्वंविवक्ष
णीयंएवंविशिष्टसाध्यव्यापकतावच्छेदकत्वेनापिप्रतियोगितावच्छेदकंविशेषणीयंतेनसंयोगाद्रव्यत्वा

रूप

दित्वादौसंयोगाभावस्यद्रव्यवृत्तित्वात्तत्प्रतियोगितावच्छेदकद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्न द्र० मि
द्रव्यवृत्तित्वादिविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकतानिरूपितभेदवत्त्वस्यद्रव्येसत्त्वात्तत्रनैवेत्यधिकर
णनिरूपकत्वापत्तिः। एवंसंबंधविशेषनिवेशनमपिपूर्ववद्बोध्यंतथाचस्वाश्रयनिष्ठभेदप्रतियोगितावच्छे
दकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नायावत्यः प्रतियोगितातदवच्छेदकाव
च्छिन्नतदाश्रयनिष्ठप्रतियोगितावच्छेदकतानिरूपितभेदवदधिकरणवृत्तित्वतद्व्यापकप्रतियोगितानिरूपितप्रतियोगि
तानिरूपकाभावसजातीयाभाववत्त्वमितिनिष्कर्षइतिसंक्षेपः। अभावेयथाश्रुतसाध्यप्रतियोगिकत्वंपरित्य
ज्यस्वप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेषणस्यव्याप्यवृत्तितादिवि
शेषणस्यचव्यावृत्तिसाद्दानेनेति। तत्तत्साध्यवत्त्वकारभाववत्तिहेतोर्वृत्तावपिनाव्याप्तिरितियोजनाएतद्रूप
वानेतद्रूपवादित्वादौप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगित्वाधिकरणसाध्याभाववन्निःसाध्यमेवतत्र
हेतोरवृत्तेर्लक्षणगमनसंभवान्नासंभवः। अथसाध्यवतितत्रएतद्रूपतद्रूपोभयत्वावच्छिन्नाभावसत्त्वेन

तत्रापि लक्षणगमनासंभवादसंभवः नचनासौप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः प्रतियोगितावच्छेदकीभूताभयत्वेनतूपेणाभयवद्वृदस्याभयवत्ताप्रसिद्धत्वेनाप्रसिद्धेरितिवाच्यं। उभयत्वेनान्यतरवद्वृदस्यतादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकस्याभयत्वेनान्यतराभाववत्तिसत्वात्। तस्यापितादृशभेदमादायतत्वादितिचेन्नव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगितास्वव्यापकसाध्यतावच्छेदकप्रतियोगितास्यवाभावस्यनिवेशेतादृशाभयाभाववारणंसंभवतीतिप्रायेणाव्याप्तिलेखनात्। अव्याप्यवृत्तिरितियद्यप्यतद्ग्रंथस्यस्वयमुक्तस्याभावेव्याप्यवृत्तित्वादिनिवेशनस्यप्रयोजनप्रदर्शनपरत्वेसाध्यपदंकपिसंयोगाभावादिपरमेववाच्यंनतुकपिसंयोगादिपरंकपिसंयोगादिसाध्यकस्थलेकपिसंयोगाद्यभावस्यलक्षणघटकतेपिस्वाधिकरणपदस्यव्याप्यवृत्तित्वादिनिरूपकाधिकरणपरतयाभावेव्याप्यवृत्तित्वादिनिवेशस्यावश्यकत्वात्साधो। तदीयव्याप्यवृत्तितानिरूपकाधिकरणगुणादेर्हेतोरवृत्तेरव्याप्यत्वकाशगत्। कपिसंयोगाभावादेर्गुणादौ निरवच्छिन्नवृत्तिकत्वादिरू

पव्याप्यवृत्तित्वादिसत्वेनतादृशविशेषणेन व्यावर्तनासंभवाच्च। तथाचकपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यासकाभावस्यलक्षणघटकत्वेपितदीयव्याप्यवृत्तितानिरूपकाधिकरणप्रसिद्धिरेवाव्याप्ति प्रयोजिकानतुतादृशगभावीयाव्याप्यवृत्तितानिरूपकाधिकरणहेतोर्वृत्तिरितिवृत्तावपिहेतोरितिनसंगछते। तथाप्यभावेव्याप्यवृत्तित्वादिविशेषणानुपादानेयावदंतर्गतकपिसंयोगादीनांव्याप्यवृत्तितानिरूपकाधिकरणप्रसिद्धिः स्यादितितादृशाधिकरणपर्यंतंनविवक्षणीयंतथाचसतिअव्याप्यवृत्तिसाध्यकस्थले हेतोःसाध्याभाववद्वृत्तित्वनिबंधनाऽव्याप्तिःसाचव्याप्यवृत्तिताद्युपादानान्नसंभवतीयमभिप्रायः अथवा कपिसंयोगादिसाध्यकस्थलेहेतोःसाध्याभावीयाऽव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वंतत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वनिवेशौपयिकं अतस्तदधीनायाःकपिसंयोगाभावादिसाध्यकस्थलेकपिसंयोगाद्यासकाभावीयतादृशाधिकरणप्रसिद्धिनिबंधनाव्याप्तिस्तत्संपादकमपीतिनतादृशग्रंथासंगतिः।एतेनव्याप्यवृत्तितानिरूपकाधिकरणनिवेशेव्याप्यवृत्तिसाध्यकस्थलेलक्षणविशेषवृत्ति पि

१० संयोगाभावसाध्यकस्थलेतादृशाधिकरणाप्रसिद्धिभयेन

त्वविशिष्टसाध्याभावस्यप्रतियोगिवैय्यधिकरण्यघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकस्या
व्याप्यवृत्तेरधिकरणेहेतोर्दुर्ज्ञानत्वागमनासंभवादसंभवएवसंभवतीत्यव्याप्तिरितिचेन्नैवं युज्यतइत्यपि
निरस्तंतत्तत्साध्याभाववद्वृत्तित्वस्यहेतुवृत्तितानवच्छेदकविशेषधर्मव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादायव्य
भिचारित्वव्याप्तिस्तत्तत्साध्याभाववद्वृत्तित्वावच्छिन्नाभावंनिवेश्यचेदुच्यतेतदाव्यधिकरणधर्मावच्छिन्नसा
ध्याभावसजातीयस्यतादृशस्यतद्वृत्तित्वेनघटाद्यभावस्यप्रसिद्धिःगुरुधर्मस्यप्रतियोगितावच्छेदकत्वां
गीकारएवसंभवति।अन्यथातादृशाभाववद्वृत्तित्वस्यवृत्तित्वतत्पत्यधर्मसमनियततयाप्रतियोगि
तानवच्छेदकत्वांगीकारएवसंभवति।अन्यथातादृशाभाव[illegible]त्वेनतदवच्छिन्नाभावाप्रसिद्धेः अन्यूनानतिरिक्त
वृत्तित्वरूपावच्छिन्नवृत्तिनिवेशेहृदवृत्तित्वद्हृदान्यनिर्धूमवृत्तित्वाभयाभावादनिर्धूमवृत्तित्वादिसमनियतप्रति
योगिताकतयातद्वृत्तिधूमादिसाध्यकवन्ह्यादिहेतावतिव्याप्तिस्तत्तत्साध्याभाववद्वृत्तित्वविशिष्टव्यापक
तावच्छेदकरूपावच्छिन्नाभावादिनिवेशेचनिर्धूमवृत्तित्वादिनाहृदवृत्तित्वघटान्यतराभावमादायतद्हो

पतादवस्थ्यमित्यन्यादृशाभावंतत्तदधिकरणवृत्तित्वाभावपदनविवक्षितंतद्वृत्तित्वव्यापकांतमनवच्छिन्नांतंप्रति योगितात्विशेषणंप्रथमविशेषणप्रयोजनमाह। तत्तत्साध्याभाववद्व्यक्तिविशेषीयव्यक्तौहेतुरपिनवर्ततेतना दृशह्रदादिव्यक्तीत्यर्थः। व्यभिचारनिरूपकहत्वधिकरणमात्रवृत्तिर्यायागोलकादिव्यक्तिविशेषावृत्तित्वादिरूप साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्तद्व्यक्तिविशेषवृत्तित्वाभावस्यहेतावसंभवात् किंविद्विशिष्टस्यतादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसंगंदर्शयतिपार्थिवत्वादिविशेषितस्येति।अग्रिम णसाध्याभाववद्वृत्तित्वस्यसनेनान्वितंवन्ह्यादौपार्थिवत्वादिविशेषणाभावात्। तद्विशिष्टनिर्धूमवृत्तित्वाभा वमादायेत्यर्थः। द्वितीयविशेषणप्रयोजनंदर्शयतिह्रदावच्छिन्नस्येति। घटनिर्धूमवृत्तित्वाभयवाद्यवच्छिन्नस्ये त्यर्थः। नातिप्रसंगइतिह्रदादिवृत्तित्वपार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगितायाः वन्ह्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितयातत्तत्साध्याभाववद्वृत्तित्ववाव्यापकत्वात्। ह्रदावच्छिन्नाभावप्रतियो गितायाः ह्रदादिवृत्तेः। व्यासज्यवृत्तित्वाविरहेणनिर्धूमवृत्तितादिनिष्ठभेदप्रतियोगितानवच्छेदकरूप

निर्धूमवत्तित्ववादिव्यापकत्वसत्वेपिव्यासज्यवृत्तिधर्मावच्छिन्नतादृशाभावानांलक्षणघटकत्वादितिभा
वः।व्यासज्यवृत्तिधर्मस्यतत्तत्साध्याभाववद्वृत्तित्वनिरूपितभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वविरहात्त
त्साध्याभाववद्वृत्तित्वव्यापकधर्मावच्छिन्नाभावनिवेशेपिहृदावच्छिन्नाभावमादायातिप्रसंगस्यवारण
संभवेपिप्रतियोगितायांव्यापकत्वविशेषणप्रवेशेनिर्धूमवत्तित्ववादिनाह्रदादिवृत्तित्वघटात्यंताभाव
मादायातिप्रसंगानवकाशतेवारयितुमितितत्तद्विशेषणप्रवेशनस्यावश्यकत्वव्यासज्यवृत्तिधर्मावच्छि
न्नाभाववारणायतादृशधर्मानवच्छिन्नत्वमेवतत्तत्साध्याभाववद्वृत्तित्वव्यापकधर्मावच्छिन्नत्वापेक्षयाला
घवान्निवेशयितुमुक्तमितितदेवनिवेशितंव्यासज्यवृत्तित्वंचस्वसमानाधिकरणभेदप्रतियोगितावच्छेद
कतंसाध्याभाववद्वृत्तित्वमितिसाध्याभाववत्संबंधवत्मित्यर्थः।तेनतादात्म्यसंबंधेनवृत्तिरप्रसिद्धावपिन
तत्संबंधावच्छिन्नहेतुकस्थलेऽव्याप्तिःसंबंधप्रतियोगित्वरूपसंबंधित्वैकदेशसंबंधहेतुतावच्छेदकसंबंधने
तित्तृतीयार्थभेदान्वयःवृत्तावपीतिसंबंधत्वपीत्यर्थः।नदोषइतिहेतुतावच्छेदकसंबंधानिवेशेवह्निमान्

धूमादित्यत्रवन्ह्यभाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगितायावन्त्यभाववत्समवेतत्वाद्यवृत्तितयासामान्य
तोवन्ह्यभाववद्वृत्तित्वं प्रसज्यापकत्वेनतादृशाभावस्यलक्षणघटकत्वानुपपत्तेर्वह्न्यभाववद्वृत्तित्वव्याप
कप्रतियोगितायास्यतद्वृत्तित्वसामान्याभावस्यवन्ह्यभाववत्समवेतत्ववति धूमेसत्वाद्व्याप्तिः हेतुतावच्छे
दकसंबंधनिवेशेचनिर्वन्हिसंयुक्तत्वावच्छिन्नाभावस्यापितादृशसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वस
व्यापकप्रतियोगितायाःलक्षणघटकतयातमादायलक्षणसमन्वयइतिभावः। इत्थंचहेतुतावच्छेदक
संबंधेनसाध्याभाववद्वृत्तित्वविवक्षणेचसतीतिशेषःतदविवक्षेचवक्ष्यमाणप्रसिद्धिविरहादुपक्षंभसं ऐ
गतिः हेतुतावच्छेदकसंबंधेनकस्यचिदधिकरणइतिअनुयोगितासंबंधेनहेतुतावच्छेदकसंबंधवद्वृत्तित्व
र्थः। अथवाहेतुतावच्छेदकसंबंधेनधर्मवद्वृत्तित्वंसार्थःविशिष्यहेतुतावच्छेदकपुरस्कारेणहेतुमत्तानिवेश
नसंभवेपिबहुपदार्थघटितहेतुतावच्छेदकस्थलेधर्मत्वेननिवेशापेक्षयातेनरूपेणनिवेशेगौरवमि
तिसामान्यतोनिवेशलाभायकस्यचिदियभिहितं अथद्रव्यंगुणकर्मान्यत्वेसतिसत्वादित्यादौसमानाधि

करणधर्मावच्छिन्नप्रतियोगितायाःसाध्याभावस्यसत्ताद्यनुपहेतुसामानाधिकरण्यसंभवेपिहेतुतावच्छे
दकविशिष्टहेतुसमानाधिकरणनिरूक्तसाध्याभावानाव्यधिकरणधर्मावच्छिन्नप्रतियोगितात्वनियमात्तादृ
शहेतुसमानाधिकरणत्वेनाभावविशेषणकेवलव्यधिकरणधर्मावच्छिन्नप्रतियोगितात्वरूपेणवसाजात्य
विवक्षणंसंभवतीतिननिवेशनमेवोचितमितिचेन्नतथासतितादृशयावत्साध्याभावसजातीयवत्तस्यैवल
क्षणत्वेसंभवतिव्याप्तिवारिणिसमानाधिकरणधर्मावच्छिन्नाभावस्यापिविशिष्टहेतुसमानाधिकरणत्वेनल
क्षणघटकतयातदृष्टिकयावदभावसजातीयाप्रसिध्येवातिव्याप्तिविरहात्तस्यैतादृशयावदभावसजा
तीयव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाःकिंचिदभावमादायैवलक्षणसमन्वयसंभवादितिसाध्याभाव
वद्वृत्तित्वाभावविशेषणवैयर्थ्यापत्तेः। हेतुतावच्छेदकसंबंधेनेतिसमवायादिसंबंधेनेत्यर्थः।साध्याभाववद्
वृत्तित्वस्यसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यनक्षतिरितितादृशसाध्याभावस्यसमवायसं
बंधानुयोग्यवृत्तितयाव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यनक्षतिरितितादृशसाध्याभावस्ये

वलक्षणघटकतात्तद्वृत्तित्वतादृशसंबंधेनवृत्तेःप्रसिद्धेरितिभावः। अत्रचद्रव्यंगुरुकर्मत्वेसतिसत्वादिसादो
अव्याप्तिर्विशेष्यविशेषणसंबंधस्यपरंपरयाहेतुतत्वमभ्युपेत्यवारणीयेत्यप्युपेक्ष्यहेतुतावच्छेदकसंबंधेनकिंचि
दधिकरणवृत्तित्वमभावेविवक्षितंयदिचसत्तादेरवविशिष्टसत्तात्वादिनाव्यर्थत्वेहेतुतावच्छेदकसंबंधावच्छिन्न
त्वविशिष्टहेतुतावच्छेदकावच्छेद्यवाभावंवानिवेश्यनिर्वाद्यतेतदाजातिमानसत्वादिसादा + विशिष्टनिरूपितहे
तुतावच्छेदकसंबंधावच्छिन्नाधिकरणतासामान्यतत्तत्साध्याभावसजातीयतत्तदधिकरणानुयोगिकत्वाभावंतत्त
त्साध्याभाववद्वृत्तितासामान्यतत्तत्साध्याभावसजातीयहेतुतावच्छेदक + वुपदर्शिताप्रसिद्धिनिबंधनाव्याप्तेरु
क्तविवक्षामंतरेणैवनिवारणंसंभवतीत्यवधेयम्।अत्रसाध्याभाववद्वृत्तित्वाभावरूपव्याप्यजातिमानसत्वा
द्रव्यंविशिष्टसत्वादिसादावव्याप्तिमाशंक्यसकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपांव्याप्तिंसाजात्या
दिघटनयापरिष्कृतवंतस्तत्परिष्कृतंचयथाश्रुतंवक्ष्यमाणदोषमुद्धर्तुमभावप्रतियोगित्वस्थलस्वावच्छिन्न
व्यापकतावच्छेदकतत्प्रतियोगितावच्छेदकत्वरूपपारिभाषिकतत्प्रतियोगितावच्छेदकाश्रयहेतुतावच्छेद

कवलंनिवेश्यंतादृशलक्षणमाह।यदुतितादृशव्याप्यवृत्त्यः साध्याभावाः साध्यतावच्छेदकावच्छिन्नव्याप
कतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाःप्रत्येकंतेषांसजातीयस्यव्यापकीभूतस्यव्याप्यवृत्तेरभावस्य
एकैकतदभावसजातीयस्यतत्तदभाव व्यापकीभूतस्यव्याप्यवृत्तेरभावस्यप्रतियोगितावच्छेदकनयद्रूपा
वच्छिन्नंप्रतिव्यापकत्वमवच्छिद्यतेतत्प्रतियोगितावच्छेदकंयधेतुतावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकंतद्रू
पवत्वंनत्वंतेनरूपेणव्याप्यत्ववन्हिमान्धूमादिसादौवन्हित्वावच्छिन्नवह्न्यभावसजातीयस्तव्यापकीभूतोधूमत्वा
वच्छिन्नधूमाभावःवन्हित्वावच्छिन्नघटाभावसजातीयस्तव्यापकीभूतःधूमत्वाद्यवच्छिन्नघटाद्यभावस्तत्प्रतियो
गितावच्छेदकंधूमत्वादिकंधूमत्वावच्छिन्नव्यापकतावच्छेदकमितिलक्षणसमन्वयः।व्यभिचारिणिधूमत्वावच्छि
न्नघटाद्यभावस्तव्यापकतावच्छेदकधूमत्वावच्छिन्नघटाद्यभावतादृशवन्हित्वादेर्वन्हित्वाद्यवच्छिन्नव्यापकता
वच्छेदकत्वेपितादृशयावत्साध्याभावांतर्गतधूमत्वावच्छिन्नधूमाभावसजातीयतव्यापकाभावप्रतियोगिता
वच्छेदकस्यकस्यापिवन्हित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिःप्रथमाभावव्याप्यवृत्तित्वविशेष

१ वन्हित्वाद्यवच्छिन्नवह्न्याद्यभावसजातीयतत्तदभावव्यापकवन्हित्वाद्यवच्छिन्नघटाद्यभाववन्हित्वाद्यवच्छिन्नवह्न्याद्यभावप्र १
तियोगितावच्छेदक

णत्वकपिसंयोगिएतद्वृक्षत्वादित्यादौकपिसंयोगत्वावच्छिन्नकपिसंयोगाद्यभावस्यकेवलान्वयिनःसजातीयस्य
व्यापकीभूतस्यव्याप्यत्वाभावस्याप्रसिद्धावपिनक्षतिः व्याप्यवृत्तित्वविशिष्टतदभावंप्रतिएतद्वृक्षत्वाद्यभावस्य
व्यापकत्वात्।साध्यतावच्छेदकसंबंधेनसाध्यव्यापकतायाविवक्षणीयतयासंयोगेनद्रव्यस्याव्याप्यवृत्तितामते
संयोगेननत्साध्यकतादृशसंबंधेनव्यापकताप्रसिध्यर्थंव्यापकताघटकाभावेप्रतियोगिवैयधिकरण्यस्याव
श्यंनिवेशनीयतयासाध्यवन्निष्ठप्रतियोगिसमानाधिकरणंप्रतियोगितावच्छेदकस्यापिसंयोगत्वादेःसाध्य
व्यापकतावच्छेदकत्वमक्षतमितिध्येयं।नानाव्यक्तिसाध्यकतत्तत्साव्यक्त्यभावस्यनानाधिकरणकेकव्यक्तिसाध्य
कयत्किंचिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्यव्यापकीभूताभावानद्दनुतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकरूपावच्छिन्नप्रतियोगिताकइतितादृशसाध्याभावव्यावर्तनायसाध्यतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशनेव्यापकताचसाध्यतावच्छेदकसंबंधचरिताग्राह्यातेनस
मवायेनद्रव्यत्वादिसाध्यकगुणादिहेतोविषयतयासाध्यव्यापकज्ञानादेःसाध्यतावच्छेदकसंबंधावच्छि

न्नाभावंप्रतिहेतुतावच्छेदकसंबंधावच्छिन्नहेत्वभावस्याव्यापकत्वेपिनक्षतिःसाध्याभावस्यसाध्यतावच्छेद
कसंबंधावच्छिन्नप्रतियोगितयाग्राह्यःतेनसंयोगादिनावह्न्यादिसाध्यकधूमादिहेतोःसमवायादिसंबंधा
वच्छिन्नवह्न्यभावंप्रतिसंयोगादिनाधूमादेरभावस्याव्यापकत्वेपिनक्षतिः यत्रिचारिणिसमानाधिकरणधर्मा
वच्छिन्नाभावव्यापकव्यधिकरणहेतुतावच्छेदकावच्छिन्नप्रतियोगिताकाभावमादायातिप्रसंगवारणायसजाती
यत्वोपादानंव्यतिरेकिसाध्यकस्थलेयावत्साध्याभावसजातीयप्रसिध्यापत्तेकतत्सजातीयत्वनिवेशनंसाजा
त्यघटकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वादिकमनुगतनिरुक्तभेदकूटरूपमेवग्राह्यं अन्य
थायत्रभिन्नाभिन्नसंबंधेनसाध्यहेतुभावस्तत्रसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभा
वस्ययादृशप्रतियोगितानिरूपकत्वंतस्यैवतद्रूपत्वयासजातीयत्वेनसजातीयंभावनिरूपितहेतुतावच्छेदक
संबंधावच्छिन्नप्रतियोगित्वाप्रसिध्येःसजातीयस्यापिसाध्यतावच्छेदकसंबंधावच्छिन्नाभावस्यनिवेशेहेतु
व्यापकतायाअपितत्संबंधघटितायाःविवक्षणेउक्ताप्रसिध्यनिबंधनदोषासंभवेपिव्यापकीभूतस्यस्याद्

गदा० च० ६८

वैय्यर्थ्यस्यदुर्वारत्वात्तत्तत्साध्यसामानाधिकरण्यंव्यभिचारिणिसाध्यतावच्छेदकावच्छिन्नसाध्या द्वि० मि
भावसजातीयहेतुतावच्छेदकावच्छिन्नहेत्वाद्यभावमादायातिप्रसंगवारणायव्यापकीभूतस्यैतंव्यभिचा
रिणोभावस्यव्यभिचारनिरूपकाधिकरणेसाध्याभावाव्यापकत्वान्नदोषःव्यापकत्वंचनतत्समानाधिकरण
भावाप्रतियोगित्वंसर्वस्यैवद्वित्वावच्छिन्नाभावप्रतियोगितयासंभवात्नचतदधिकरणेवृत्तित्वंहेतुतावच्छे
दकसंबंधेनावश्यंवाच्यंतथाचवन्ह्याद्यभाववतिधूमाद्यभावस्यधूमाद्यात्मकद्वित्वावच्छिन्नाभावस्यसं
योगादिरूपहेतुतावच्छेदकसंबंधेनावृत्त्यानतमादायदोषावसरइतिवाच्यंएवमपियत्तत्स्वरूपसंबंधेनहे
तुतातत्तादृशाभावप्रतियोगितयाहेत्वभावस्यव्यापकत्वानुपपत्तेर्दुर्वारत्वात्।नापितादृशाभावप्रतियो
गितानवच्छेदकधर्मवत्वंअभावत्वाद्यात्मकतादृशरूपमादायाभावमात्रस्यैवव्यापकतयाव्यापकत्वस्या
व्यावर्तकतापत्तेःएवंवन्ह्याद्यभाववतिधूमावयवादौसमवायादिनावर्तमानधूमादिरूपमभावमादाय
तदभावव्यापकताभंगप्रसंगाहेतुतावच्छेदकसंबंधेनसामानाधिकरण्यस्यनिवेशनीयतयासत्तावान्ना

तेरित्यादौसत्साध्यभाववतिसामान्यादौहेतुतावच्छेदकसंबंधेनवृत्तेरप्रसिध्याअव्याप्तिश्चेतितदूनिरूपत्योन्याभा
वप्रतियोगितानवच्छेदकत्वमेवसाध्याभावव्यापकत्वंनिर्धूमोवह्निशून्यत्वादित्यादौहेत्वभावस्यवन्ह्यादेःप्रये
कंधूमादिमन्निष्ठभेदप्रतियोगितावच्छेदकत्वेपिअखंडस्यनिर्वह्नित्वप्रकारकप्रमाविषयत्वाद्यभावस्यता
दृशव्यापकतासंभवात्।तत्प्रतियोगितावच्छेदकावच्छिन्नस्यहेतुव्यापकतयेवलक्षणसमन्वयःतदूनिरूपत्वं
दैशिकविशेषणतयाग्राह्यंअतोवन्ह्याद्यभाववतिधूमाद्यभाववद्ददस्यकालिकसंबंधेनवृत्तावपिनक्षतिः।
अभावाभावस्यप्रतियोगिरूपत्वेप्यभाववद्ददोअतिरिक्तएवअतोधूमाद्यभाववत्संयोगोलकादौदैशिवि
शेषणतयावन्ह्याद्यभाववद्ददस्यवृत्तिरव्याहतैवतिनवन्ह्याद्यभावस्यधूमाद्यभावव्यापकतापत्तिःअथवा
यदीयदैशिकविशेषणतासंबंधसामान्येनतत्तत्साध्याभाववत्यत्किंचिद्व्यक्त्यनुयोगिकताभावःतदन्यत्वमेव
तदभावव्यापकत्वेअभावस्यतिभावभिन्नस्यत्वर्थकंतेनधूमवान्जलत्वाभावादिसादौजलत्वादिनिरूपित
दैशिकविशेषणतायाःअप्रसिध्यातन्निरुक्तभेदकूटात्मकव्यापकतासत्वेपिनातिव्याप्तिःअभावरूपसंबं

तोहेतुमत्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायेवलक्षणसमन्वयः धूम
वान्वन्हेरिसादौवर्त्तमानकालावच्छेदनवर्तमानस्यवन्त्याद्यभावस्यव्यापकतासत्वादतिव्याप्तिरतोव्याप्यवृत्तेरि
नियत्यपितादृशाभावाअपिहृदादौव्याप्यवृत्तयस्तथापिव्याप्यवृत्तित्वविशिष्टस्यव्यापकत्वंविवक्षणीयंअन
वच्छिन्नविशेषणतासंबंधेनव्यापकतानिवेशलाभायेवतदुक्तंअवच्छिन्नवृत्तिकात्यन्तरूपंव्याप्यवृत्तित्वंतुन
शक्यतेनिवेशयितुंसंयोगेनसंधेतोहेतुतावच्छेदकसंबंधावच्छिन्नहेत्वभावस्यातथात्वात्तत्प्रतियोगितावच्छेद
कत्वनप्रतियोगितासंबंधावच्छिन्नाग्राह्याअत्यधिकरणसंबंधावच्छिन्नप्रतियोगितावच्छे
दकत्वभावस्यसाध्याभावव्यापकस्यसमनियतत्वेनतत्समानाधिकरणधर्मावच्छिन्नाभावरूपतयासमानाधिकरणधर्मावच्छिन्नसाध्याभावासजातीयत्वेनतन्मादायातिव्याप्तिरहेपिआत्मत्वादिसाध्यकविषयतयाहेतोर्ज्ञानादौसाध्याभावव्यापकसमवायसंबंधावच्छिन्नज्ञानाद्यभावमादायातिव्याप्तिः अभावहेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वविशेषणंप्रवेश्यवचनातिप्रसंगवारणसंभवः समनियतभावे

क्यमतेसमवायसंबंधावच्छिन्नज्ञानाद्यभावस्यस्वसमवायिविषयकत्वसंबंधेनज्ञानादिविशिष्टज्ञानादेर्वि
षयतासंबंधावच्छिन्नाभावसमनियतत्वेनतादृशसंबंधावच्छिन्नप्रतियोगितात्वात्धूमाभावव्यापकमहा
नसीयवह्न्यभावप्रतियोगितावन्हित्वादिनावन्हित्वाद्यवच्छिन्नव्यापकत्वादतिप्रसंगइतिप्रतियोगितानुपलक्ष्यप्रतियोगितावच्छेदकस्यतदवच्छेदकत्वपर्यंतानुधावनंद्रव्यंविशिष्टसत्तादित्यादौसाध्याभावव्या
पकाभावप्रतियोगितावच्छेदक( )विशिष्टसत्तात्वादेर्हेतुतावच्छेदकापलक्षितहेतुव्यापकत्वा
संभवात्यंप्रतीत्यनुरक्तायद्रूपावच्छिन्नंप्रतीत्यक्तंव्यापकंचहेतुतावच्छेदकसंबंधावच्छिन्नाग्न्याद्यनुमि
हाकालभिन्नकालत्वादित्यादौसाध्याभावव्यापकाभावप्रतियोगितावच्छेदकस्यसाध्यतावच्छेदकादेःकालि
कादिसंबंधनहेतुव्यापकतायामवच्छेदकत्वेपिनातिप्रसंगःव्यापकतावच्छेदकतावच्छेदकसंबंधभेदनिवेश
नादिकंस्वयमूह्यंनचधूमवान्वन्हिमत्वप्रकारकप्रमाविषयत्वात्इत्यादावतिव्याप्तिःधूमाद्यभावव्यापक
स्यधूमाद्यभावस्यप्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावत्वादेर्हेतुतावच्छेदकस्वरू

पसंबंधघटितहेतुव्यापकतायामवच्छेदकत्वादितिवाच्यं।भावरूपप्रतियोगितावच्छेदकस्यव्यापकतावच्छेद
कतायाविवक्षणीयत्वात्। यथाश्रुतसिश्रलक्षणंदूषयतिसाधनस्येतितादृशेतियेसाध्याभावाःप्रसिद्धाः
तत्तत्सजातीयतत्तव्यापकसर्थः।तदवच्छेदकत्वंतादृशप्रतियोगितावच्छेदकत्वंआद्यंद्रव्यंसत्वादियादा।इति।
द्वितीयेज्ञेयंप्रमेयादियादा।इति।ननुप्रमेयत्वादेःकेवलान्वयितावच्छेदकत्वेपिवाच्यत्ववादरिक्तसाध्याभा
वव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमक्षतमेवसाशंकांनिरस्यतिप्रमेयत्वव्यधि
करणेतिप्रमेयत्वस्यकेवलान्वयित्वादितिभावः।धूमायभावंप्रतिविषयितासंबंधेनवन्हित्वावच्छिन्नस्यो
भावस्तस्यव्यापकत्वात्तदायसमवायेनात्मत्वसाध्येसमवायेनद्रव्यत्वेहेतौआत्मत्वाभावंप्रति विषयिता
संबंधेनद्रव्यत्ववज्ज्ञानस्यथःसमवायसंबंधावच्छिन्नप्रतियोगिताकाभावस्तस्यव्यापकत्वात्तदायाति
प्रसंगवारणायप्रतियोगितावच्छेदकतायांहेतुतावच्छेदकतायाघटकसंबंधावच्छिन्न[illegible]तस्यावश्यंनिवेशनी
यतयाव्यधिकरणसमवायादिसंबंधेनप्रमेयत्वस्याभावप्रतियोगितायामसमानाधिकरणतयावच्छेदक

यत्वादि विशेषणावच्छिन्नस्याभावांतरस्यप्रकांतत्वात्तादृशपदेतत्परत्वभ्रमस्यइतिनिरासायाऽभावाद्
येतन्मात्रमनभिधायसाध्याभावाइत्युक्तंयावत्साध्याभावनिरूपितानकाचिदपिप्रतियोगितेतिप्रत्येकपदं
अत्रचव्यभिचारिणंप्रत्यपियत्किंचित्संबंधेनसाध्यतावच्छेदकावच्छिन्नस्यव्यापकतयातिप्रसंगस्यवारणाय
यप्रतियोगितावच्छेदकसंबंधेनैवव्यापकतानिवेशनीयाइथंचसमवायसंबंधावच्छिन्नवन्ध्यभावप्रति
योगितावच्छेदकसमवायादिसंबंधेनवह्नित्वाद्यवच्छिन्नस्यधूमाद्यव्यापकत्वादसंभवइतिप्रतियोगिता
वच्छेदकसंबंधेनैवसाध्यव्यापकताविवक्षणीयातथाचकेवलान्वयिसाध्यकस्थलेव्यधिकरणसंबंधाव
च्छिन्नसाध्याभावमादायनिर्वाहोनभवतीतिव्यधिकरणधर्मावच्छिन्नाभावस्यापयोगितावोध्याधूमवान्व
ह्रेरिसादौधूमाद्यभावप्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावस्यवन्ध्यादिव्यापकत्व
पिनातिव्याप्तिसाध्यतावच्छेदकावच्छिन्ननिरूपितस्वावच्छेदकसंबंधघटितव्यापकतावच्छेदकावच्छिन्नाः या
वत्प्रतियोगिनाःप्रत्येकंतदवच्छेदकरूपेणतदवच्छेदकसंबंधेनयद्रूपावच्छिन्नंप्रतिव्यापकत्वमित्येता

दृशमर्थस्यैवविवक्षणीयत्वात्।साध्यव्यापकतावच्छेदकंयद्यद्रूपंतेनव्यापकत्वविक्षणव्यधिकरणधर्मावच्छिन्ना
भावोपयोगितानघटतइतिसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वेनव्यापकतावच्छेदकनि
वेशःयथासनिवेशनवैय्यर्थ्यंप्रतियोगितायाःस्वरूपसंबंधरूपत्वेवन्हित्वावच्छिन्नप्रतियोगितायाःपावत्सा
ध्यवृत्तिभेदनभिन्नायाःधूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेनसंभवतीतिव्यापकतावच्छेदकावच्छिन्नप्र
तियोगितायांव्यापकतावच्छेदकत्वंनिवेशितं॥२॥कूटपटितलक्षणव्यभिचारिणिसाध्याभाववद्वृत्तित्व
स्वव्यापकप्रतियोगिताकोननिधूमवृत्तित्वाद्यवच्छिन्नाभावःअपितुजगद्वृत्तित्वसामान्याभावएवसच्च
धिकरणधर्मावच्छिन्नप्रतियोगिताकएववृत्तिमद्वृत्तिरितिव्याप्तिवारणायकूटपदमुपात्तंतादृशव्याप्ति
निःसमानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसाधारणरूपेणसाध्याभावस्यव्याप्यतावच्छेदकको
टौप्रवेशनएवप्रसज्यतेननुविशिष्याभावनिवेशेतथासतिनिर्धूमवृत्तित्वाद्यवच्छिन्नाभावस्यापिलक्ष
णघटकतानिर्वाहादितिकूटपदमनुपादायविशिष्यसाध्याभावंनिवेश्यैवलक्षणप्रणयनमुचितंतद्रूपा

दानेबहूनांदोषाणांवक्ष्यमाणत्वादितिकूटघटितलक्षणवादिनमाक्षेप्तुंकूटाघटितंतल्लक्षणंदर्शयति।परेति कूटा०
सादिनासाध्याभाववद्वृत्तित्वस्यव्यधिकरणधर्मावच्छिन्नाभावमादायव्यभिचारिमात्रेऽतिव्याप्तिरतायावंतद्
तितथाचसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताका
भावस्ययावत्तादृशाभावांतर्गतस्यव्यभिचारिण्यसत्वान्नातिव्याप्तिःवृत्तिमद्वृत्तित्वानुपादानेसमानाधिकर काश०
णधर्मावच्छिन्नप्रतियोगितास्यव्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्यासंयुक्तोदोग्नसि
ध्यत्हेतावसत्वात्संयोगादिसंबंधेनहेतावव्याप्तिःयादृशसंबंधप्रतियोगित्वंवस्तुमात्रवृत्तादात्म्यवि ष
यितादिरूपतादृशसंबंधेनहेतावेवपर्यवसन्नत्वात्तादृशसंबंधेनजगत्संबंधत्वंसाध्यसमानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धिरितितदुपादानंननुवृत्तिमद्वृत्तित्वोपादानेपिजगत्संयुक्तत्वावच्छिन्नाभावस्यजासादिरूपवृत्तिमतिवर्तमानस्यवारणसंभवात्।वह्निमान्धूमादित्यादावव्याप्तिर्दुर्वारैव
निर्धूमसंयुक्तत्वाद्यभावस्यनिर्धूमवृत्तित्वाव्यापकप्रतियोगितयावृत्तिमन्मात्रस्यैवनिर्धूमकाल

दिरवृत्तित्वेनचनिर्धूमवृत्तित्वसामान्याभावस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्येवहेतुमद्वृत्तित्वेनधूम
वान्वह्नेरिसादावतिव्याप्तेर्वारणायहेतुतावच्छेदकसंबंधेनसाध्याभाववद्वृत्तित्वस्यनिवेशनीयतयायत्रसंयो
गादिनाहेतुत्वंतत्रजगत्संयुक्तत्वावच्छिन्नाभावस्यापिहेतुतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्व
व्यापकप्रतियोगिताकत्वेनलक्षणघटकत्वात्तत्रातिव्याप्तिरतएवयथाश्रुतार्थकत्वेकालिकसंबंधेनगगनादेरवृत्ति
त्वमतेतेनसंबंधेनयत्रहेतुतात्तेनैवपरमव्याप्तिवारकतातेनसंबंधेनजगद्वृत्तित्वाभावस्यावृत्तिमत्वेप्रसिध
त्वादिसतआह। येनसंबंधेनेति। नक्षतिरितिनाव्याप्तिरित्यर्थः। ननुनासंभवः तादात्म्यकालिकादिसंबंधेन इति
हेतोर्लक्षणसमन्वयसंभवादिति। ननुनानाव्यक्तिसाध्यकेतत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्यहेतावसत्वा
दव्याप्तिःकूटघटितलक्षणइवंसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे तात्पर्यतात्पर्यदहनोभय
त्रापि
त्वावच्छिन्नाभावमादायवह्न्यादिसाध्यकेगुणादिवृत्तित्वविशिष्टसत्ताद्यभाववद्वृत्तित्वाभावमादायचसत्तादि
साध्यकेऽव्याप्तिर्दुर्वारैवएवमव्याप्यवृत्तिकसंयोगादिसाध्यकेहेत्वधिकरणस्यैवजगत्त्वकसंयोगत्वा

यवच्छिन्नाभाववत्तयातद्वृत्तित्वव्यापकप्रतियोगिताकस्यव्यधिकरणधर्मावच्छिन्नाभावस्येववृत्तिमद्वृत्तित्व
नाव्याप्तिविरहेपितादृशकपिसंयोगाभादिसाध्यकद्रव्यत्वादिहेतोकपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभा
वासत्वादव्याप्तिरियतआह। साध्याभावश्चेतिपूर्ववदितिमिश्रलक्षणेयथासाध्यतावच्छेदकावच्छिन्नव्यापक
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकोव्याप्यवृत्तिरभावोनिवेश्यतेतथात्रापिनिवेशनीयइत्यर्थः।तत्तद्वृत्तित्व
कथिताभयत्वावच्छिन्नप्रतियोगिताकाभावानांप्रथ मविशेषणेनकपिसंयोगादिरूपाणांचद्वितीयविशेषण
नव्यावृत्तिः।ननुसाध्याभाववद्वृत्तित्वप्रतियोगिकाभावमात्रनिवेशेप्रकृतहेतुसाधारणस्यव्यधिकरणधर्मा
वच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्यसमानाधिकरणधर्मावच्छिन्नाभावोपिवृत्तिमद्वृत्तिःसंभवतीतियावत्ता
दृशभावांतर्गततद्वत्वस्यहेतावसंभवादसंभवःएवंसमानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्यप्रकृतहे
तुवृत्तित्वावच्छेदकीभूतकिंचिद्धर्मावच्छिन्नस्याभावोपियावत्तादृशभावांतर्गतइतितद्वत्वविरहादपिव्यतिरेकि
साध्यकहेतुवृत्तितावच्छेदकीभूतेनाव्यभिचारित्वानुपपत्तिःतत्तत्साध्याभाववद्वृत्तित्वावच्छिन्नप्रतियोः

गिताकाभावश्चविवक्षितुमशक्यः केवलान्वयिनिसाध्याभाववद्वृत्तित्वेनघटाद्यभावस्यतादृशगुरुधर्म
स्यप्रतियोगितावच्छेदकत्वमतेप्रसिद्धावपितस्यातथात्वमतेव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्व
त्वस्यस्वघटकैकैवलवद्वृत्तित्वत्वसमनियततयाप्रतियोगितानवच्छेदकत्वेनतदवच्छिन्नाभावाप्रसिद्धेर्दुर्वार
त्वात्।तत्तदभाववद्वृत्तित्वघटकधर्मावच्छिन्नाभावनिवेशेवह्नित्वावच्छिन्नवत्यभाववत्यक्तेस्तदभाववावच्छि
न्नाभावस्यापितादृशतथात्वस्यचधूमादावसत्वादव्याप्तिः साध्याभाववद्वृत्तित्वरहितादृशधर्मावच्छिन्नाभाव
निवेशेनसिद्धदवृत्तित्वत्वावच्छिन्नसाध्यकतादात्म्येनघटत्वव्यापकादिहेतोतादृशसाध्याभाववान्नयोप
ट्यभावादिस्तद्वृत्तितानिष्ठतादृशसाध्याभाववत्वरूपतथाविधधर्मावच्छिन्नाभावस्यघटादिमान्नवेत्तेर्दु
र्वारत्वसंवादव्याप्तिर्दुर्वारैवसाध्याभावादिव्यावृत्तघटकतानिवेशेचप्रयासगौरवमितितत्तत्साध्याभाववद्वृ
त्तित्वत्वसमनियतप्रतियोगिताकाभावंविवक्षतितदुदितिस्वंप्रतियोगितायाम्नसाध्याभावस्यसाध्याभाव
त्वेनसामान्यतोनिवेशेव्यभिचारिणिनिर्धूमवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगितायाव्यधिकरणधर्मा

वच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारणसाध्याभाववद्वृत्तित्वव्यापकत्वेनतादृशाभावस्यलक्ष
णघटकतयावृत्तित्वसामान्याभावस्यतथाविधप्रतियोगिताकस्यचसाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्ये
ववृत्तिमद्वृत्तितयात्तिव्याप्तिरितितत्तद्व्यक्तित्वेनाभावस्यव्याप्यतावच्छेदककोटिनिवेशलाभायतत्तदितियद्यपि
यत्किंचित्साध्याभाववद्वृत्तित्वतत्समनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्वंव्यभिचारिसाधारणंयावं
तःसाध्याभावाःप्रत्येकंतत्तदधिकरणवृत्तित्वतत्समनियतैकप्रतियोगितायाःनानाविपक्षसाध्यैकप्रसिद्धिः
तत्तद्विपक्षवृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वव्याप्यैकप्रतियोगितासिद्धेःतथापियावतामभा
वानांप्रत्येकाधिकरणवृत्तित्वतत्समानेप्ययस्यप्रत्येकंप्रतियोगितात्वयेनतदभाववद्वृत्तित्वतत्समनियत.
प्रतियोगिताकोयोभावस्तदभाववद्वृत्तित्वतत्समनियतप्रतियोगिताकश्चयोभावस्तद्वत्वमित्येवंरीत्यानि
वेशगौरवानुपपत्तिःएतल्लक्षणसाध्याभावसमुदायेनसमुदायत्वेनप्रविष्टःअपितुप्रातिस्विकरूपेणेति
कूटघटिनादिशेषःअथान्नस्वपदंतत्तदभावीयप्रतियोगितात्वरूपेणनप्रतियोगितापरंसाध्याभाववद्वृ

त्तित्वातिरिक्तेपितदभावीयप्रतियोगितांतरसत्वादितितत्तत्प्रतियोगिताव्यक्तिपरंतदन्यंतथात्वयत्किंचित्प्रतियो
गितानिरूपकांशेषाभावस्यातिव्यापकतयायावत्तादृशप्रतियोगिताः प्रत्येकंतत्तन्निरूपकाभाववत्वंनिवेश
नीयंतथात्वसमानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रतियोगितानिरूपकवृत्तिमद्भूत्यभावाप्रसि
ध्यांव्यापिरितिवृत्तिमद्भूत्यभावीयत्वेनन्यावत्प्रतियोगितानिवेशनीयातथात्वेतन्निरूपकाभाववृत्तिमद्वृत्तित्व
विशेषणंव्यर्थंयावत्विशेषणमपितथेतिचेन्नोपादीयतएवतत्तद्विशेषणंवृत्तिमद्भूत्यभावीययावत्प्रतियो
गितानिवेशलाभायैवप्रतियोगितविशेष्यीभूताभावेवृत्तिमद्वृत्तित्वयावत्वाभिधानात्।अत्रचगुरुधर्मस्या
भावप्रतियोगितानवच्छेदकत्वेस्वव्यापकतद्भाववद्वृत्तित्वत्वनिरूपभेदप्रतियोगितावच्छेदकत्वस्याव्यावर्तक
व्यापकतांतरूपविशेषणघटितत्वेनाभावप्रतियोगितानवच्छेदकतयातद्वच्छिन्नान्योन्याभावरूपव्यापकत्व
पुरस्कारेणनप्रतियोगितानिवेशःसंभवतीतितादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणवत्तन्निवे
शः नचस्वव्यापकतत्तद्भाववद्वृत्तित्वकत्वतद्भाववद्वृत्तित्वनिरूपान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छि

नैकभेदोभयरूपेणप्रतियोगितानिवेशसंभवात् अवच्छेदकभेदकूटनिवेशनमफलमितिवाच्यं। घटभेदादिसाध्य
कस्थलेतदभावव्यक्तित्वेनघटत्वादिघटितस्यतदभाववद्वृत्तित्वनिक्षान्योन्याभावप्रतियोगितावच्छेदकस्यस्वरू
पतोघटत्वादिघटितघटवृत्तित्वनिक्षान्योन्याभावप्रतियोगितावच्छेदकत्वमुपेक्ष्यगुरुशरीरतयाप्रतियोगिता
नवच्छेदकत्वेनतदवच्छिन्नैक्यभेदनिवेशसंभवात्। अत्रकल्पेव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्व
त्वसमानियतप्रतियोगिताकस्यपर्वतवृत्तित्वपर्वतान्यवृत्तित्वाभयत्वावच्छिन्नाभावस्यपर्वतान्यवृत्तिवृत्तिमद्
त्वेधूमादावभावात्। एकमात्रवृत्तिहेतावपितादृशप्रतियोगिताकस्येतत्क्षणावच्छिन्नवृत्तित्वेतदन्यक्षणाव
च्छिन्नवृत्तित्वाभयत्वावच्छिन्नाभावस्यतत्क्षणावच्छिन्नावृत्तेरवृत्तिमतिवर्तमानस्याभावादसंभवःतादृशाभा
वव्यावर्तनायव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशगौरवंपर्वतवृत्तित्ववादिनाजगद्वृत्ति
त्वसामान्याभावस्यव्यावृत्तसंभवश्चेत्सतःकल्पांतरमनुसरतितत्तत्साध्याभावतिअतिरिक्तांतानिवेशे
व्यधिकरणधर्मावच्छिन्नाभावमात्रस्यसंग्रहाव्यभिचारिमात्रेऽतिव्याप्तिरितितन्निवेशनंयद्यपियथाश्रुते

नानेनमहानसवृत्तित्वादिनाव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभाववारणंनसंभवतिमहानसादिनि
रूपितत्वविशिष्टवृत्तित्वस्यसाध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वरूपसाध्याभाववद्वृत्तित्वतान्यत्वविरहात्
तथापिसाध्याभाववद्वृत्तित्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यतवशून्यत्वस्यानवच्छिन्नांतनविवक्ष
णान्नदोषःमहानसवृत्तित्वादिनिरूपितावच्छेद्यतवस्यसाध्याभाववद्वृत्तित्वरूपविशिष्टपदार्थेनिरूपितत्वात्
नचेवमपिसाध्याभाववन्महानसवृत्तित्वाद्यवच्छिन्नाभाववारणमशक्यंतादृशधर्मनिरूपितावच्छेद्यतायां
तद्घटकसाध्याभाववद्वृत्तित्वेनिरूपितत्वस्याधिकंविशादिन्यायेनाग्राहत्वादितिवाच्यं।गुरुधर्मस्याभाव
प्रतियोगितानवच्छेदकतयामहानसादिवृत्तित्वसमनियतोपदर्शितगुरुधर्मस्याभावप्रतियोगितानवच्छे
दकत्वात्।अथगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वंसाध्याभावपदस्यसाध्यतावच्छेदकावच्छिन्नव्यापक
तावच्छेदकरूपावच्छिन्नाभावपरतयाधूमवान्ह्रदित्यादावतिव्याप्तिःधूमत्वावच्छिन्नव्यापकतावच्छेदकरूपा
वच्छिन्नाभाववद्वृत्तित्वस्यसमनियतधूमत्वावच्छिन्नाभाववद्वृत्तित्वापेक्षयागुरुत्वेनाभावप्रतियोगितव

छेदकतन्निरूपणतदवच्छिन्नाभावाप्रसिद्धेः धूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वावच्छिन्नप्रतियोगितायाश्च धूमत्वाव कूटः
च्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वस्वरूपविशिष्टपदार्थानवच्छिन्नतयातन्निरूपकाभावस्य निरुक्ता
भाव विशेषणानाक्रांतत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघट
कत्वात् यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः
अपितु तत्तद्भावत्वेनैव एतदेवस्वरसतयितुं तत्तत्पदमुपात्तं एवं च तत्तद्व्यक्तित्वेन धूमाभावघटिततत्तद्भाववद्वृत्ति
त्वाभावावच्छिन्नाभावस्य लक्षणघटकतयान धूमादिसाध्यकेऽतिव्याप्तिरित्यपास्तं। तथापि घटाभिन्नमेयत्वादिसा
धारणेऽतिव्याप्तिः तन्नतद्व्यक्तित्वेन रूपेण घटभेदाभावघटिततद्व्यक्तिमद्वृत्तित्वापेक्षयालघोस्तत्समनियतस्यकिं
चिद्विशेषणानवच्छिन्नघटत्वघटितस्यघटवृत्तित्वस्यैवाभावप्रतियोगितावच्छेदकतयातद्व्यक्तिमद्वृत्तित्वा
वच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वावच्छिन्नप्रतियोगितायाः साध्याभाववद्वृत्तित्वस्वरूपविशिष्टपदार्थानव
च्छिन्नतयातन्निरूपकाभावस्यलक्षणघटत्वासंभवात्। व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभाव

एतद्व्यक्तिभिन्नंवा

स्येवतथात्वात्।यदिचाभावधर्मोविशेषणविधयानिवेश्यतेअपितुअभावप्रभृतिरेवअभावेतुसाध्यता
वच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितात्वमुपलक्षणतयानिवेश्यतेएतल्लाभायेवत
त्तत्पदोपादानमपिनतुतत्तव्यक्तित्वनाभावनिवेशलाभार्थंउपलक्षणीभूतप्रतियोगितविशेषणेवाभावां
तरव्यावृत्तिसंभवेतत्तव्यक्तित्वस्योपलक्षणतयानिवेशप्रयोजनविरहात्एवंचघटत्वत्तित्वत्वावच्छिन्नाभा
वोपिउक्तस्थलेलक्षणघटकोघटभेदाभावस्यघटत्वस्यतत्प्रतियोगितावच्छेदकघटकत्वात्।प्रतियोगिता
विशेषोपलक्षितोभाववृत्तित्वपर्याप्तनिरूपकतात्वपर्यंतानिवेशात्धूमादिसाध्यकस्थलेविधू
मवृत्तित्वत्वावच्छिन्नाभावस्यप्रतियोगितावच्छेदकशरीरभावविशेषणस्याधिकस्यनिवेशेपिनक्षतिःनचा
भावंप्रतियोगिकोटेरुपलक्षणतयाभानस्यानुभवविरुधत्वादिशिष्टनिरूपितत्वाभावस्यैवरूपस्यनिरूपि
तत्वसंबंधावच्छिन्नविशिष्टाभावरूपस्यवाविशिष्टनिरूपितत्वस्यप्रतियोगिकोटौप्रतियोगिताविशेषस्य
कथमुपलक्षणविधयानिवेशइतिवाच्यं।प्रतियोगितासंसर्गकज्ञानएवतादृशभानस्यतथात्वात्।जा

यवच्छिन्नप्रतियोगिताकाभावइत्याकारकस्यस्वरूपतोघटत्वावच्छिन्नप्रतियोगिताकाभावभानस्यसर्वसंमतत्वात् कूटा०
प्रकृतेचसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकोयोऽभावस्तद्वृत्तित्वनिरू
पितत्वप्रतियोगिकाभाववतःसमानाधिकरणधर्मावच्छेद्यत्वस्ययाऽभावस्तद्वृत्प्रतियोगिताकाःयावंतोऽभा
वास्तद्व्यान्हेतुरिसाकारकव्याप्तिग्रहेप्रतियोगितायाःविशेषणत्वेनानुपपत्यभावात् अतएवव्यापकतावच्छे
दकतादेःउपलक्षणविधयाभानोपपत्तिःनचतादृशनिरूपितत्वप्रतियोगिकस्यतत्वावच्छिन्नप्रतियोगि
ताकस्यवाऽभावस्यनिवेशेनिर्धूमवृत्तित्वतावच्छिन्नाभावप्रतियोगितानिष्कावच्छेद्यतायामपिकिंचिद्वि
शिष्टतादृशनिरूपितत्वावच्छिन्नाभावसत्वात्।तादृशाभावासंग्रहइतिवाच्यंतत्तदभाववद्वृत्तित्वनिरू
पितत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावस्यैवनिवेशनीयतादिसंक्षेपतस्तुपटत्वभेदादिसाध्य
कक्ष्यमिचारिण्यतिव्याप्तिवारणमशक्यंनिर्वक्तुंघटत्वादिवृत्तित्वस्यैवतन्नघटत्वादिवृत्तित्वाभावप्रति
योगितावच्छेदकतयाघटत्वादिरूपसाध्याभावस्यप्रतियोगितावच्छेदकशरीरेनिवेशेनव्यधिकरणध

देवंचसतिद्वाकिंचिन्नाभावनिवेशोव्यर्थोवैशिष्ट्यानवगाहनात्
दोषादानमपिसाधुसगच्छतइ

र्मावच्छिन्नाभावस्यैवलक्षणघटकत्वात्। नचजातेः समवायेनैवस्वरूपतोवच्छेदकत्वंनतुसंबंधांतरेण अतएवगोत्वा
दिनिष्ठव्यापोपदप्रवृत्तिनिमित्तत्वगवेतरासमवेतत्वादेरवच्छेदकत्वंस्वीकुर्वंतिनतादात्म्यसंबंधेनलघोरपिगो
त्वादिजातेरितिनिर्विशेषणघटत्वादिघटिततद्वृत्तित्वस्याभावप्रतियोगितावच्छेदकत्वंनसंभवतीतिवाच्यं॥
तादृश[illegible]नियमेमानाभावात्। यदिचाभावांशस्योपलक्षणत्वंस्वीक्रियततदाप्रहानसद्वृत्तित्वावच्छिन्ना
भाववारणमशक्यमवयदिचसाध्याभावातिरिक्तविशेषणमविशेषिताधिकरणवृत्तित्वाद्यवच्छेद्यताभिन्न
समानाधिकरणधर्मावच्छेद्यताभावंनिवेश्याविशेषितघटत्वादिवृत्तित्वाभावःसंगृह्यतेतदातादृशभाव
मादायजातिसाधारणसाधनतावच्यापिर्वज्रलेपायतेएवंसाध्याभावबद्वृत्तित्वतच्छरीरभावादविशेषणत
याप्रवेशावृत्तिमद्वृत्तिपदमनर्थकमापद्येतव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यचःसमानाधि
करणधर्मावच्छिन्नाभावःतत्प्रतियोगितायालाघवेनोक्तत्वेनावच्छिन्नतयातद्वच्छेद्यतायाअभावघ ६
टितविशिष्टपदार्थानिरूपितत्वात्। अन्नवदंतिगुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतेनेदमभिहितं

व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वावच्छिन्नाभाववारणायच साध्याभाववद्वृत्तित्वपर्याप्ता कूरा०
वच्छेदकतासन्निसमानाधिकरणधर्मनि ( ) षावच्छेदकत्वा निरूपकत्वमेव प्रतियोगितायां विशेषणं
देयं। नचैवं घटत्वादिनासाध्याभाववद्वृत्तित्वाभावसंग्रहफलकंसमानाधिकरणपदोपादानंविफलंतादृशाभाव
स्यासंग्रहपिकेवलान्वयिसाध्यकसाध्याभाववद्वृत्तित्वंतेनघटाभाव मादायलक्ष+निषेधद्वयनिवेशनंच+णस
मत्वयसंभवा दितिवाच्यं। विषयिता दिसंबंधेनयत्रहेतुतातन्नहेतुतावच्छेदकसंबंधेनसाध्याभाववत्तिवृत्तेःसा
ध्याभावेदृषयतानिरूपायाविषया दिरूपत्वेनसाध्याभाववद्दृषयतात्वादिरूपसाध्याभाववद्वृत्तित्वस्यकेवलो
त्वयितयातदवच्छिन्नाभावाप्रसिधेस्तादृशाभावघटितलक्षणानुपपत्तेः नचसाध्याभाववद्दृषयतात्वादिकं
येनसंबंधेनावृत्तितेनतदवच्छिन्नाभाव मादायलक्षणसमन्वयः संभवतीतिवाच्यं कालिकसंबंधेनसाध्या
भाववद्वृत्तित्वावच्छिन्नस्ययोभावस्तस्य ध्वंसाद्यधिकरणहेतुव्यापकतयास्वरूपसंबंधावच्छिन्नप्रतियोगि
तावच्छेदकताकाभावस्यावश्यंनिवेशनीयतयाव्यधिकरणसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य

(द्रव्यंसमवायेनघटादिमादौ) अवच्छिनत्ती

लक्षणघटकत्वासंभवात् विषयितायाज्ञायादिरूपत्वेपि विषयत्वविशिष्टस्यनसमवायादिनावृत्तिः तादृशस्यत
स्मिन्नवृत्तेः ज्ञात्वादोचसमवायाभावात् किंतुस्वरूपसंबंधेनैवएवंचसमवायादिसंबंधावच्छिन्नप्रतियोगिता
कएवविषयतात्वावच्छिन्नाभावोलक्षणघटकोभविष्यतीत्यपिनकालज्ञानादिरूपहेतोकालिकविषयितादि
संबंधावच्छिन्नप्रतियोगितासाध्याभाववद्वृत्तित्वावच्छिन्नाभावस्यासत्वेन स्वरूपसंबंधावच्छिन्नप्रतियो
गिताकाभावस्यैवविवक्षणीयत्वात् नचैवंसाध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नाभा न
वस्यापितत्राप्रसिद्धिः घटत्वादेःसाध्याभाववद्विषयतानिरूपप्रतियोगितावैय्यधिकरण्यासंभवादितिवाच्यं।
घटत्वादिनापटत्वाद्यभावस्यैवतथात्वात्। अथैवमपिसामानाधिकरण्यमुपेक्ष्यसाध्याभाववद्वृत्तित्वनिरूपित
नधर्मविशेषणतात्वेघटत्वादेर्घटादिस्वरूपसाध्याभाववद्विषयतानिरूपितत्वेनगगनादेरपिस्वनिरूपितविषय
तासत्वेनसाध्याभाववद्विषयतानिरूपितयासाध्याभाववद्वृत्तित्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नाभा
वाप्रसिद्धाउक्तस्थलेऽव्याप्तिर्दुर्वारेवयेनरूपेणयत्साध्याभाववद्वृत्तित्ववृत्तित्तद्रूपविशिष्टतदनवच्छिन्नप्रति

योगिताकाभाववविवक्षणेगगनत्वविशिष्टगगनाद्यवच्छिन्नाभावस्यलक्षणघटकतानिर्वाहेपिहेतुनिरूप्यधिकरण कूरा०
धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वव्यक्तःकिंचिदविशेषिततत्तव्यक्तित्वावच्छिन्नप्रतियोगिताकाभावस्यतथाविध
स्यहेतावसत्वात्संभवइतिचेन्न।येनसंबंधेनयद्वर्तंतेतेनसंबंधेनतन्निष्ठावच्छेदकताकान्यत्वस्यविवक्षणीयत
यासंयोगादिसंबंधेनघटत्वावच्छिन्नप्रतियोगिताकाभावमादायेरोक्तस्थलेलक्षणसमन्वयसंभवात्।उक्ता
र्थलाभायेवचसाध्याभाववद्वृत्तित्वोपादानंनतुतदपिलक्षणघटकंप्रयोजनाभावात्सर्वत्रदर्शितामा
वमादायलक्षणसमन्वयसंभवेनसमवायादिसंबंधेनघटत्वावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्यलक्ष
णघटकत्वेपिक्षतिविरहात्एतेनधूमत्वाद्यवच्छिन्नधूमत्वाद्यभावस्यधूमत्वप्रकारकमप्रविषयत्वाद्यभावस्यचसा
ध्याभाववद्वृत्तित्ववत्तिधर्मावच्छिन्नप्रतियोगिताकस्यवारणायसाध्याभाववद्वृत्तित्वप्रतियोगिकत्वविशेषणम
प्यनादेयं अतएवसमानाधिकरणत्वस्यस्वप्रतियोगितावच्छेदकविशेषणत्वकल्पापेक्षयालाघवमेवएतत्कल्पा
नुसरणबीजभूतंनिश्रसहमितियदिचगुरुधर्मानाभावप्रतियोगितावच्छेदकस्तदामहानसवृत्तित्वावच्छि

नाभाववारणायसाध्याभाववद्वृत्तित्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्व
ताघटकतमवविवक्षणीयंतदर्थं श्चस्वविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तितात्वरूपविशिष्टनिरूपितविषयिता
कत्वस्वाविषयकत्वंचेतरविशेषणतानापन्नस्वविषयिताश्रयत्वमतोविशेषणविधयासाध्याभाववद्वृत्तित्वघट
कसाध्याभावतादृस्तदघटकत्वनिर्वाहइतिपूर्वोक्तदोषानवकाशः चरमापिविषयिताइतरविशेषणतानापन्न
निरूपितेवग्राह्यातेनरत्नित्वतादिविशेषणकज्ञानेसाध्याभाववद्वृत्तित्वतादृविशेषणतयाविषयत्वेपिवृत्ति
त्वतोदर्नसाध्याभाववद्वृत्तित्वताघटकत्वंचशुद्धवृत्तित्वतावच्छिन्नवृत्तेरभावोपिलक्षणघटकइतिवृत्ति
मद्वृत्तिपदसार्थक्यंनचसाध्याभाववद्वृत्तित्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताकाभावोनिवेश्यतां
घटकांतार्थश्चस्वविषयकप्रतीयवृत्तिसाध्याभाववद्वृत्तित्वरूपविशिष्टनिरूपितविषयिताकत्वंतेनसा
ध्याभाववद्वृत्तितावत्केवलवृत्तितावयोरवघटकतानिर्वाहः नतुस्वविषयकप्रतीयविषयतादृशविशि
ष्टकत्वंतत्तद्भाववद्वृत्तित्वतावविषयकप्रतीतौकेवलाधेयतात्वस्यविषयतयातद्भाववन्निरूपितत्वविशि

ष्टाधेयतात्वेतदविषयकप्रतीत्यविषयत्वस्यदुर्घटतयातदभाववद्वृत्तित्वतादस्तद्घटकत्वानिर्वाहात्केवलाधेयता तस्यैवतद्घटकतयावृत्तिमद्वृत्तितेनघटाद्यभावमादायातिव्याप्तेरितिवाच्यं।तथासत्यक्तरीत्याविषयितासंबंधेनयत्रहेतुतातत्रतादृशाभावाप्रसिद्धेःघटत्वभिन्नंप्रमेयत्वादियादृशनिविशेषणघटत्वादिवृत्तितातस्यपथासामानाधिकरण्यधर्मावच्छिन्नाभाववद्वृत्तितावघटकतंतथावाच्यंज्ञेयत्वादियादावपितादृशस्यस्वाविषयकप्रतीत्यवृत्तित्वयधिकरण्यधर्मावच्छिन्नसाध्याभाववद्विशेषितघटत्वादिघटिततदभाववद्वृत्तित्वस्वरूपविशिष्टनिरूपितविषयताकतयातदभाववद्वृत्तित्वघटकतयावृत्तिमद्वृत्तितदवच्छिन्नाभावस्यहेतावसत्वेनाव्याप्तेःतदभाववद्वृत्तित्वताघटकधर्मानवच्छिन्नाभावनिवेशेनैववारणसंभवाच्चतादृशधर्मेनिरुक्तसाध्याभाववद्वृत्तित्वतघटकतसत्वेपिस्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्धर्म्यंतरवृत्तित्वविषयताकत्वेनसाध्याभाववद्वृत्तित्वताघटकतस्यापिसत्वेनतदवच्छिन्नाभावस्यनिरुक्ताभावानामकत्वात्।नचस्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यकत्वरूपतत्तदभाववद्वृत्तित्वतघटकतानि

वेशे निर्विशेषणकघटत्वादिवृत्तित्वस्य साध्याभाववद्वृत्तित्वस्य घटकतया प्रसक्त्यातद्घटकधर्मावच्छिन्नाभाव
निवेशेऽपि संभवतीति वाच्यं। तथासति व्यापकताघटितसामान्यपदार्थनिवेशने तद्घटकधर्मानवच्छिन्ना
भावनिवेशापेक्षया ऽतिगौरवात्। समानाधिकरणपदसार्थक्यंतूक्तरीत्यैवेतिध्येयं। केचित्तु व्यधिकरणधर्म
वच्छिन्न(श्न [illegible]वेशे)साध्याभाववद्वृत्तित्वतेनपर्वतवृत्तित्वघटान्यतराभाववारणायातन्मतेपिस्वव्याप
कतत्तत्साध्याभाववद्वृत्तित्वकत्वंप्रतियोगिताविशेषणमावश्यकंतथाचसाध्याभाववद्वृत्तित्वतेनघटाभा
वस्यलक्षणघटकतानसंभवतीतिनिषेधद्वयनिवेशनसमानाधिकरणपदोपादानयोःसार्थकतेत्याहुः
प्रतियोगितायांसाध्याभाववद्वृत्तितात्व्याप्यत्वनिवेशनप्रयोजनमाह। आलोकाद्यवृत्तित्वेनतिवह्निसा
मान्याभाववद्वृत्तित्वस्ययोऽभावस्तस्यधूमादावसत्वेपीयत्वयःवह्निसामान्याभावःवह्नित्वावच्छिन्नवह्न्यभा
वःसाध्याभाववद्वृत्तित्वव्यापकतानिवेशनप्रयोजनमाह। यश्चेति। इंधनत्वावच्छिन्नेतिसाध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैवलक्षणघटकतयाघटत्वाद्यवच्छिन्नाभावो

पेक्षणंमहानसरत्तित्वादरभावइत्यत्र महानसरत्तित्वादिनेतिबोध्यंतादृशभावाधिकरणमहानसरत्ति
त्वावच्छिन्नतादृशवत्तित्वनिष्ठप्रतियोगिताकत्वंषष्ठ्यंतार्थइतितुन सत्गुरुधर्मस्याभावप्रतियोगितावं
छेदकत्वेपितादृशभावविशेषितमहानसरत्तित्वावच्छिन्नाभावमादायदोषप्रसक्तेः तद्विशेषितमहा
नसरत्तित्वावच्छिन्नाभावपर्यंतानुसरणसंदर्भविरोधात्। अधिकरणत्वांतस्यापलक्षणतयाशब्दांशस्य
विशेषणतयाभानस्यायुक्तिविरुद्धतयातथाविवक्षितुमशक्यत्वात्। अधिकरणविशेषानुपरक्तवृत्तेरभा
वमादायापिदोषंदर्शयति। स्वनिष्ठेति। धूमादिनिष्ठसाध्याभाववद्वृत्तित्वंयत्तत्तद्व्यक्तित्वावच्छिन्नाभावस्ये
त्यर्थः। हृतंतरवृत्तेः। आलोकादिवृत्तेः। एतेनवृत्तिमद्वृत्तित्वमस्तीतिसूचितं स्वस्मिन् धूमादौअत्रचलक्ष
णसत्ताभाववान् द्रव्यत्वादियादोसत्तावत्समवेतत्वाभावस्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव
समवेतवृत्तित्वेपिद्रव्यावृत्तित्वावच्छिन्नाद्यभावस्यापिसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकतयासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापिनद्दसमवेतत्वाभावस्य

समवेतगुणत्वादिवृत्तितयाद्रव्यत्वादेस्तद्वत्वाभावान्नातिव्याप्तिः।एवमवृत्तिसाध्यकस्थलेपिसाध्यतावच्छेदका
वच्छिन्नव्यापकत्वाप्रसिध्यान्नातिव्याप्तिः कूटघटितलक्षणंचैतन्नतन्नातिव्याप्तिवारणायसाध्यसमानाधिकर
णत्वेसतीतिविशेषणंदेयंतनलुक्षणंचावृत्तिहेतुकेतिव्याप्तिवारणायवृत्तिमत्वमात्रमुपादेयंकूटघटितलक्ष
णवदन्नापिमहाकालान्याघटादिशब्दोअतिव्याप्तिर्दुष्याकिंतुतदन्यदोषाणामेवान्नानवकाशइत्यवधेयं॥
२॥इतिकूटाघटितलक्षणविचारः॥२॥ ॥अन्यवृत्तिघटत्वादिनानिर्धर्मवृत्तित्वाभावमादायव्यभिचा
रिण्यतिव्याप्तिवारणायावत्वोपादानंएवंचकेवलान्वयितःसाध्यस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक
स्यैवाभावस्यप्रसिध्यातत्समुदायाधिकरणजगदवृत्तित्वस्यावृत्तौप्रसिधःसमानाधिकरणधर्मावच्छिन्नाभावोपि
यावदंतर्गतइतिनदूषविरहात्तादृशसाध्यकेविषयितान्यतिरिक्तसंबंधेनहेतावव्याप्तिःसाधनसमानाधिकर
णत्वेनसाध्याभावविशेषणतापक्षेचव्यतिरेकिसाध्यस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य
साध्यतौलक्षणघटकतयाजगतएवतत्कूटाधिकरणतयाव्यतिरेकिसाध्यकेपिविषयिता तिरिक्तसंबंधेनहेता

वच्याप्तिसाधनसमानाधिकरणत्वेनसाध्याभावविशेषणत्वे रितिरत्तिमद्वृत्तित्वमभावविशेषणंतादृशवृत्ति
त्वेतिसाध्याभावसमुदायाधिकरणवृत्तित्वेसत्यर्थः प्रयोजनंचेतिपूर्वदलप्रयोजनंआलोकाद्यवृत्तित्वेनरूपणनि
र्वन्हिवृत्तित्वाभावमादायवन्हिमानधूमादित्यत्राव्याप्तिवारणरूपंपूर्वलक्षणोक्तमेव चरमदलप्रयोजनंतु
साधनसमानाधिकरणत्वस्यसाध्याभावविशेषणत्वेकेवलान्वयिसाध्यकेज्ञेयत्वादिहेतोपटादिवृत्तित्वाभा
वमादायाव्याप्तिवारणमेवनतुवन्हिमानधूमादित्यादौमहानसवृत्तित्वाभावव्यावर्तनंतत्रमहानसादेर्वन्हि
त्वावच्छिन्नवह्न्यभावानधिकरणत्वेनसाध्याभावकूटानधिकरणत्वात्तस्यचप्रागनुक्तत्वादुक्तप्रायमिति।
समुदायपदप्रयोजनमाह।साध्याभावाधिकरणेत्यधिकरणधर्मावच्छिन्नाभावस्येतिनिर्धूमवृत्तित्व
त्वावच्छिन्ननिर्धूमवृत्तित्वाभावस्यप्रतियोगितायाव्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमहानस
देरवृत्तित्वादवृत्तितयासाध्याभावाधिकरणवृत्तित्वव्यापकतयाजगद्वृत्तित्वासामान्याभावस्यैवतव्याप
कप्रतियोगितयातस्यचसमानाधिकरणधर्मावच्छिन्नप्रतियोगितायास्तत्रैववप्रसिद्धत्वादितिभावः

व्यभिचारिण्यतिव्याप्तिरितितादृशस्यजगद्वृत्तित्वाभावस्यसर्वत्रैवसत्वादितिभावः।अत्रचस्वव्यापकसाध्या
भावसमुदायाधिकरणवृत्तित्वकत्वेसतिसाध्याभावसमुदायाधिकरणवृत्तित्वव्यापकत्वंप्रतियोगितावि
शेषणंतन्नचशेषदलेसमुदायानिवेशेपिनिर्धूमवृत्तित्वावच्छिन्नाभावस्यलक्षणाघटकत्वेपिनातिव्या
प्तिःसंभवतिव्यतिरेकिसाध्यकतादृशप्रतियोगितायाअप्रसिद्धेःजगद्वृत्तित्वसामान्याभावीयप्रतियोगि
तायाःसाध्याभावाधिकरणवृत्तित्वव्यापकत्वेपिस्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वकत्व
रूपपूर्वदलविरहात् धूमाद्यभावसमुदायाधिकरणवृत्तित्वशून्यमहानसादिवृत्तितादृशप्रतियोगि
तासत्वादितिपूर्वपक्षयित्वाशेषदलेसमुदायपदाप्रवेशेपूर्वदलमेवनोपादेयंतदनुपादानेपिवह्निमान्धूम
दित्यादौआलोकाद्यवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वस्यालोकादिनिष्ठपर्वतादिवृत्तित्वसाधारणसा
ध्याभावाधिकरणवृत्तित्वव्यापकतयातादृशभावमादायदोषाप्रसक्तेःतदुपादानेव्यतिरेकिसाध्य
कमानएवोक्तरीयातादृशप्रतियोगितवाप्रसिध्याव्याप्तिप्रसंगाच्चतथाचधूमवान्वह्नेरित्यादौघटत्वेनज

गहृत्तित्वाभावमादायातिव्याप्तिरिसाध्येनदीधितिकृतेदमभिहितं अतिव्याप्तिवारणायशेषदलेसमुदा
यप्रवेशनेचनिर्वन्हिरवृत्तित्वव्यापकप्रतियोगिताकस्यालोकावृत्तित्वावच्छिन्नाभावस्यवन्हिमान्धूमादि
त्तत्रशेषदलाक्रांततयापूर्वदलोपादानमावश्यकंतत्रसमुदायाप्रवेशेव्यधिकरणधर्मावच्छिन्नसाध्याभा
वाधिकरणवृत्तित्वव्याप्यप्रतियोगिताकस्यालोकावृत्तिवृत्तित्वाभावस्यधूमेऽसत्वादव्याप्तिरितितत्रापि
तत्प्रवेशनमितिकेचित्तभाद्यंति। परेतुप्रतियोगित्वव्यापकताविशेष्यतापन्नेभवसाध्याभावसमुदाया
धिकरणवृत्तित्वंव्यापकत्वविशेषणविधयानिवेश्यतेनतुतदृलस्योत्तरीसाद्विधानिवेशः एवंचपूर्वपक्ष
एवायंनावतरति। नचगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमतप्रतियोगित्वव्यापकत्वविशेषितसा
ध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वंनाभावप्र
तियोगितावच्छेदकमितिप्रतियोगितेतादृशगवच्छेदकत्वत्वावच्छिन्नाभावरूपव्यापकतानिवेशसंभवात्॥
तद्दलस्यद्विधानिवेशनमावश्यकमितिवाच्यं। व्यापकत्वंतस्योपलक्षणतयासाध्याभावसमुदायाधिकर

एवत्तित्वत्वरूपव्यापांशेनिवेशसंभवात्व्यापकतावच्छेदकावच्छिन्नाभाववानित्यादिज्ञानेव्यापकत्वावच्छेदक
त्वांतस्यवोक्तावच्छेदकत्वावच्छिन्नप्रतियोगिताकाभावबुध्योव्यापकताया उपलक्षणतयाभानेविरोधात्।
वस्तुतस्तुगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वंसाध्याभावसमुदायाधिकरणवृत्तित्वाधिकरण
निष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वत्वमपिनाभावप्रतियोगितावच्छेदकंवन्हित्वावच्छिन्नवन्ध्यभाववद्
वृत्तित्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वादिरूपसमनियतधर्मापेक्षयाव्यधिकरण
धर्मावच्छिन्नसाध्याभावेनाधिकेनघटितस्यगुरुत्वादितादृशधर्मावच्छिन्नाभावोनिवेशयितुमशक्यःकिं
तुतादृशात्यन्ताभावप्रतियोगितावच्छेदकंयद्यत्तत्तद्बुद्धिकूटत्वमेवनिवेशनीयंएवंचप्रतियोगितात्यापक
त्वघटितात्तुधर्मस्यप्रतियोगितानवच्छेदकत्वमप्यकिंचित्करमेवेत्याहुः तेनेतिसमवायेनवन्हेःसाध्यत्वप
र्वतस्यसंबंधद्वयावच्छिन्नवन्ह्यभावद्वयानधिकरणत्वेपिधूमेनातिव्याप्तिःसंयोगेनवन्हेस्तथात्ववन्ह्यवयव
स्यचतादृशाभावद्वयानधिकरणत्वेपिवन्ह्यवयवत्वेनातिव्याप्तिःसमवायेनवन्हेःसाध्यत्वेसंयोगेनतस्यत

थात्वेचपर्वतस्यवन्ह्यवयवस्यचतादृशाभावदूषानधिकरणत्वेपिवन्ह्यवयव(illegible)पर्वतसंयोगेनातिव्याप्तिरि कूट०
तियोजनासंबंधस्यावच्छिन्नवन्ह्यभावदूषंसंयोगसंबंधावच्छिन्नवन्ह्यभावसमवायसंबंधावच्छिन्नवन्ह्यभावदूषं
साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकवानिवेशनेतादृशाभावदूषानधिकरणस्यपर्वतादेःसाध्याभा
वकूटानधिकरणतयातत्कूटाधिकरणवृत्तित्वाभावायावंतस्तद्दूषंधूमादावव्याहतमेवेत्यतिव्याप्तिःस्यादेव
तिभावः। नचसाध्यतावच्छेदकसंबंधावच्छिन्नाभावनिवेशेपिसमवायेनवह्नौसाध्येसंयोगनहेतौधूमनातिव्या
प्तिर्वारयितुंशक्यतेसमवायसंबंधावच्छिन्नवन्ह्यभावकूटाधिकरणसंयुक्तत्वस्यव्यधिकरणधर्मावच्छिन्नाभा
वस्यैवसंयुक्तवृत्तित्वात्।वन्ह्यवयवमात्रसंयुक्तंप्रतिधेःसंयुक्तमात्रस्यैवतादृशाभावकूटाधिकरणगगनसं
युक्तत्वादितिकथमत्रव्यावृत्तिप्रदर्शनंसमवायेनधूमहेतुकस्थलेपरंतातुनयुज्यतेसमवायेनधूमवतः
साध्याभावकूटवत्वानिराकरणादितिवाच्यं।संयुक्तमात्रस्यैवगगनादिसंयुक्तत्वेपिधूम्यद्रव्यस्यवन्ह्यव
यवएवाधिकरणत्वप्रसवःप्रामाणिकःनत्वत्र तत्संयोगेनगगनादिवृत्तित्वाप्रसिध्यासंयोगेनवन्ह्य राम

नादृष्टसंयोगस्यवृत्तिनियामकतया १

वयवान्यरत्तित्वाभावस्यैवसंयोगेनैरत्तिमद्वृत्तेःस्वलभतयारत्तिपदस्ययथाश्रुतपरतामतेतादृशव्यावृत्तिदान
संगतेः वृत्तिनियामकतादात्म्यसंबंधेनव्याप्तिस्वीकारेरत्तिपदस्यसंबंधार्थकत्वमावश्यकमितिमिप्रायेणैतदुपे
क्ष्यद्वितीयस्थलानुरणंसाधनसमानाधिकरणत्वस्यसाध्याभावविशेषणत्वपक्षेसमवायादिसंबंधावछिन्नव
न्यभावस्यवन्यवयवत्वरूपसाधनसामानाधिकरण्याभावेननतन्नातिव्याप्तिसंभवः एवंसत्ताभाववान्द्रव्यत्वा
दित्यादावतिव्याप्तिवारणायसाध्यसामानाधिकरण्यसतीतिविशेषणस्यावश्यकतयासंयोगादिनावन्हि
मत्सवर्त्तमानवन्यवयवत्वादौतेनाप्यतिव्याप्तिर्वारयितुंशक्यतइतः पर्वतवन्यवयवसंयोगहेतुकानु
मरणंसंयोगेनद्रव्यस्याव्याप्यरत्तितामतेपर्वतस्यसंबंधद्वयावछिन्नवन्यभावद्वयाधिकरणत्वेपिनतस्य
व्याप्यरत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्वंविवक्षणीयंवावश्यंतादृशसाध्याभावकूटवत्वंअन्यथा
व्याप्यरत्तिसंयोगादिसाध्यकेवह्निचारिणिजगतएवसाध्याभावकूटाधिकरणत्वेनातिव्याप्तिरितिदर्शि
तहेतोःपर्वतरत्तित्वेपितादृशाभावकूटाधिकरणरत्तित्वाभावोऽक्षतएवेतिव्याप्तिप्रसंगःपूर्ववदत्रसा

ध्याभावपदेनसाध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावविवक्षणेनानाविपक्षेकेतथाविधतत्तद्धिप कूट०
क्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणप्रसिध्याव्याप्तिसाध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभा
वनिवेशेगौरवमितिसाध्यतावच्छेदकसमव्याप्यप्रतियोगिताकाभावएवविवक्षितुमुचितःतार्ग्गतार्ग्गदहनरतिहि
तावच्छिन्नप्रतियोगिताकानांतथाविधसाध्यसामान्याभावानामधिकरणध्वंसादेरप्रसिद्धावपिवह्नित्वावच्छिन्नवन्यभा वा
वघटिततादृशाभावकूटवयदन्तेरव्याप्यनवकाशात्।दृशाशयेनतथाविधभावाभावंनिवेशयतिनाथेतिसंप्रतियो
गितासमनियताभावेक्यमतेसाध्याभावप्रतियोगितायाःसाध्याभावसमनियताभावप्रतियोगिपदार्थांतरवृत्ति
त्वेपिसाध्यतावच्छेदकेनाधिकरणनवाधर्म्मेणावच्छिन्नायाःसाध्यमात्रवृत्तिप्रतियोगितायाःसाध्यतावच्छेदक
समनैय्यायिकक्षतभवअथघटत्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताघटत्वावच्छिन्नवन्त्वादिनिष्ठप्रतियोगित्वा
नभिधीयते। किंतुघटत्वादिभिन्नयावदूस्तत्ववृत्तिरकेवलीक्रियते।ननुवाच्यत्वादिमानवृत्तिस्तथासतिघटत्वेनप्र
मेयत्वंनास्तीतिप्रतीतिर्विषयप्रतियोगितांतरकल्पनेगौरवादितितादृशप्रतियोगितायानवाच्यत्वादि

वच्छेदकतापर्याप्तिविवक्षणस्यावश्यकत्वादितिचेन्न व्यापकतावच्छेदकपर्याप्तत्वंव्यापकतानवच्छेदक कूट०
वृत्तितंत्रंधनत्वाद्यवच्छिन्नवन्ध्यभावप्रतियोगितावच्छेदकतायामक्षतमितितादृशभावमादायलक्षणसम
न्वयसंभवइतिअतएवयश्चंधनत्वावच्छिन्नवन्ध्याभावाधिकरणीभूतमहानसवृत्तित्वादेरभावइतिदीधितिग्रं
थःसंगच्छते।अन्यथाइंधनत्वादिनाघटाद्यभावोपक्षायांनिर्बीजत्वमापद्येतपवंचसार्वभौमाणामेतल्लक्षण
भिप्रायकतयासमवायितयावाच्यताभावोघटएवप्रसिध्यइतिमूलग्रंथोपवर्णनमपिसंगच्छते।अथपर्याप्ति
संबंधेनाभयत्वादिकंयत्रसाध्यतावच्छेदकंतत्रप्रतियोगितायाअव्याप्यवृत्तित्वेनतस्याप्यधिकरणप्र
त्येकवृत्तेपर्याप्तिसंबंधेनाभयत्वादेरयंताभावस्यतदवच्छिन्नभेदस्यचसत्वात्तस्यप्रतियोगिताव्यापकत्वंन
संभवति।नचाव्याप्यवृत्तिसंयोगादेर्यत्रसाध्यतावच्छेदकतानतत्रप्रतियोगिताव्यापकत्वनिर्वाहायप्रतियोग्य
सामानाधिकरण्यंव्यापकताघटकमावनिवेशनीयंतावताउभयत्वस्यापिव्यापकत्वंनिर्वहतिपर्याप्तिसंबंधे
नोभयत्वपर्याप्त्यधिकरणस्यप्रत्येकानतिरिक्ततयाप्रत्येकवृत्तेरुभयत्वाभावस्यापिप्रतियोगिसमानाधि

करणत्वात्इतिवाच्यं। पृथिवीत्वघटत्वाभयत्वादिनायत्रसाध्यतात्तत्रजातित्वावच्छिन्नाभावप्रतियोगितासमा
नाधिकरण्यंतादृशसाध्यतावच्छेदकाभावस्यप्रतियोग्यधिकरणवृत्तित्वविरहेणतादृशसाध्यतावच्छेदक
स्यतादृशप्रतियोगिताव्यापकतापसातादृशाभावसादाय्यतद्वच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषय
त्वादिहेतावतिव्याप्त्यापत्तेःप्रतियोग्यनधिकरणवृत्तित्वस्यैवाभावेनिवेशनीयतयाउभयत्वाभावव्यावर्तना
संभवात्तत्तदभाववतःप्रत्यकंतदनधिकरणत्वात्तत्स्यैवतदधिकरणतायाअपिव्यासज्यवृत्तित्वादितिचेन्न
सामानाधिकरण्यस्याव्याप्यवृत्तितायक्षेप्रतियोगिसामानाधिकरण्याभावविशिष्टाभाववत्ताधटितव्या
पकतायएवनिवेशसंभवात्। पृथिवीत्वादावुक्तोभयत्ववतिपृथिवीत्वावच्छेदनतदभावस्यप्रतियोगिसमा
नाधिकरणत्वेपिजलत्वादस्तत्सामानाधिकरण्याभावविशिष्टतदभाववत्त्वेनातिप्रसंगाभावात्। उभयत्वा
भावस्यतदभाववत्येकैकस्मिन्नपितत्सामान्याधिकरण्याभावानभ्युपगमात्। तत्सामानाधिकरण्यावच्छे
दकस्यप्रसेकानतिरिक्तत्वात्। अथवायनिरूपितसाध्यतावच्छेदकतावच्छेदकसंबंधसामान्येप्रतियोगित्वा

१ काऊदेशतिरिक्तनिष्ठावच्छेदकतायाःकिंचिद्वच्छिन्नत्वस्याप्रामाणिकतयातद्व्यक्तिविशिष्टावच्छेदनापिनतदभाववत्त्वसंभवः

धिकरण्यलिंविच्यत्त्यनुयोगिकत्वाभावस्तदन्यत्वमेवप्रतियोगितावच्छेदकत्वंउभयत्रनिरूपितपर्याप्तसंबन्धावच्छिन्नप्रसंका
नुयोगिकत्वाभावस्तदनुयोगिनःप्रसंकानतिरिक्तत्वादितियत्तुप्राचीनमतेरूपादिसामान्याभावस्यरूपध्वं
सतत्त्वागभावेतन्नित्यप्रतियोगिकतयारूपध्वंसादिसाध्यकरूपादिहेतावतिव्याप्तिःरूपादिसामान्याभावीय
रूपध्वंसत्वावच्छिन्नप्रतियोगितायाःसाध्यतावच्छेदकसमनियतत्वेनतद्दूषितत्वाभावकूटाधिकरणेरूपादेरवृत्तेः
नचरूपस्यापिरूपध्वंसाभावरूपतयातद्दूषितस्यरूपसामान्याभावाद्यदितकूटस्यापियावत्तामेकाधिकरण्य
मितिविवक्षयालक्षणंघटकत्वात्।तदूतिहेतोर्दूरयानोक्तोतिव्याप्तिरितिवाच्यं।रूपादीनांप्रत्येकंस्वस्वध्वंसाभा
वरूपत्वेपिस्वात्यरूपादिध्वंसायसमवानासकतयासाध्यतावच्छेदकसमनियतप्रतियोगितात्वविरहेणल
क्षणघटकत्वादितितन्नजलपरमाण्वादौरूपध्वंसत्वावच्छिन्नाभावबुधिनिर्वाह्यंजन्यरूपत्वाद्यवच्छिन्ना
भावेरूपध्वंसत्वावच्छिन्नप्रतियोगितात्वस्यावश्यकतयातत्तएवरूपादिसामान्याभाववद्यपितत्प्रतीतिनि
र्वाहात्।रूपादिसामान्याभावस्यरूपध्वंसादिप्रतियोगित्वानभ्युपगमात्।साधनसमानाधिकरणत्वस्यः

साध्याभाव विशेषणतापक्षेतेनाव्युक्तस्थलेनूपादिसामान्याभावव्यावर्तनात्स्वनिरूपकाभाववत्त्वसंबंधेन
साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्वमेवनिवेश्यलक्षणस्यपरिष्करणीयतयानूपादिसा
मान्याभावानधिकरणस्यापिजलपरमाण्वादेरुक्तस्थलेनतत्कूटाधिकरणत्वेनातिव्यासेरनवकाशाच्चप्रतियो
गितायाःप्रतियोगिस्वरूपत्वमतेनानाव्यक्तिसाध्यकस्थलेसाध्यतावच्छेदकसमनेयत्वस्यप्रत्येकप्रतियोगि
तायामसत्वेपिस्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेनसमनेयत्वस्यविवक्षणान्नदोषःतन्तहून्हि
तन्तध्मादिस्वरूपप्रतियोगितानामपिस्वावच्छेदकवन्हित्वधूमत्वावच्छिन्नतदभावीयप्रतियोगितात्वेनव
न्हित्वधूमत्वादिसमनेयत्वात्।वन्हित्वाद्यवच्छिन्नवन्त्वादिस्वरूपप्रतियोगितानांद्रव्यत्वाद्यवच्छिन्नाभावीयव
न्त्वादिस्वरूपप्रतियोगितात्मकतयातदवच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रतियोगितायाघटादावपिसत्वात्ननत्र
तियोगितावच्छेदकावच्छिन्नप्रतियोगितात्वेनवन्हित्वादिसमनेयत्वमितितदभावीयत्वविशेषणंतथासति
वन्हित्वाद्यवच्छिन्नाभावीयप्रतियोगितायाःघटादावसत्वात्।नानुपपत्तिःयद्येवमपिवच्यत्वत्वादिसमनि

यतप्रतियोगित्वाप्रसिद्धिर्दुर्वारैवव्यधिकरणधर्मावच्छिन्नाभावानामभिन्नतयावाच्यत्वादिस्वरूपवाच्यत्वमिन्नत्वा कूट०
वच्छिन्नाभावीयप्रतियोगितावच्छेदकपदत्वाद्यवच्छिन्नप्रतियोगितानांपरादावपिसत्वात्।यत्किंचिदधर्मवि
च्छिन्नतदभावीयप्रतियोगितात्वेनसमनेयस्यपरकव्याप्यत्वविवक्षणेचपृथिवीत्वाद्यभावादिसाध्यकस्थलेघ
टादवृत्तित्वावच्छिन्नाभाववारणमशक्यंतदभावीयपृथिवीत्वाभावादिप्रतियोगितानांपृथिवीत्वाभावत्वावच्छे
दकावच्छिन्नाभावीयप्रतियोगितासकतयापृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेनपृथिवीत्वा
भावत्वादिसमनेयस्यसत्वात्।तथापियधर्मावच्छिन्नप्रतियोगितात्वेनयदभावनिरूपितत्वंतादृशधर्मावच्छि
न्नतदभावीयप्रतियोगितात्वेनव्याप्यत्वनिवेशान्नदोषःपृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेनपृथिवी
त्वादिरूपाभावमात्रनिरूपितत्वंनतुघटावृत्तित्वावच्छिन्नाभावनिरूपितत्वमितियद्यपिपूर्वदलाप्रवेशेवन्ह्या
दिसाध्यकधूमादिहेतौसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकव्यापकप्रतियोगिताकतत्तद्धटा
वृत्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्यगुणेदोषप्रसिद्धत्वेपितन्नहेतुतावच्छेदकसंबंधेनवृत्तेरप्रसिद्ध्यावा

त्तिसंभवः। तथापि साध्याभावकूटवतितादृशदत्तरप्रसिध्याव्यापित्तदूलनिवेशेपि सत्तावान्जातेरित्यादौवक्ष्यत
इतिस्थलांतरेकूटाधिकरणप्रसिध्याऽव्यापिवारणमूपंतत्रयोजनमाह। यत्रपृथिवीत्वाभावादावितितत्तद्विपक्षे
तिघटपटादिरूपेत्यर्थः। तत्रसाधेतावितिः। तत्रसाध्यंयःसाधेतुःजलत्वादिस्तत्रत्यर्थः। नाव्याप्तिरित्यनेनान्वयः। याव
न्मात्रेकाधिकरणंसंभवति। तावद्भावसमुदायाधिकरणविवक्षायांतद्दोषासंभवेनस्थलांतरेव्यावृत्तिमाह। पृ
थिवीत्वादाविति। द्रव्यत्वादेः समवायेनहेतुत्वेजातित्वाद्यवच्छिन्नाभावघटितकूटाधिकरणसमवायेनदत्तरप्र
सिध्यतिव्याप्तेरनवकाशात्तत्स्वरूपसंबंधेनहेतुत्वानुसरणंसाधनसमानाधिकरणत्वस्यसाध्याभावविशेष
णतापक्षेजातित्वावच्छिन्नाभावस्यसाधनसमानाधिकरणतयावारणसंभवेपिप्रत्येकंसाधनसमानाधिकर
णजलादवृत्तित्वतेजोवृत्तित्वाद्यवच्छिन्नसमवायसंबंधावच्छिन्नाभावकूटाधिकरणतायाःसामान्यादावेवसत्ता
दवस्थापिदुर्वारेतिध्येयं। द्वितीयदलप्रयोजनमाह। नापीतिघटत्वाभावत्वादिनासाध्यतायांघटादावेव
साध्याभावकूटाधिकरणत्वप्रसिद्धिरतउक्तमभावत्वादिनेतिआदिपदात्प्रमेयत्वपरिग्रहः ततस्साध्येतिघ

दत्वाभाँवादिरूपसाध्यर्मेयःसाध्यतावच्छेदकव्याप्यप्रतियोगितांकोघटत्वपटत्वादिरूपोऽभावस्तत्समुदायाधि
+वपटत्वाभा+करणप्रसिद्धेरित्यर्थः। यावतामेकाधिकरणंसंभवतीतिविवक्षायामपितादृग्गभावसमुदायव
तिघटादेर्हेतावतिव्याप्तिरेवंचयावतामभावानामेकाधिकरण्यसंभवःतादृग्गभावकूटाधिकरणंयद्यत्तावं
दन्यतमवृत्तित्वसमनियतप्रतियोगिताकोभावोविवक्षणीयः घटवृत्तित्वादावव्याप्तिर्भावश्चोपदर्शितस्थ
लेनतथाजगतएवतावदन्यतमांतर्गतत्वात्। अपितुघटत्वादिनाजगद्वृत्तित्वसामान्याभावएववृत्तिमद्वृत्ति
त्वतथाविधाभावःतावदधिकरणान्यतमत्वंचतत्तदधिकरणवृत्तित्वत्वंनतुतत्तदधिकरणान्यान्यत्वमतो
नाप्रसिद्धिरितिवाच्यं एवमपिजातिप्रतियोगिकाभाववान्मेयत्वादित्यादौजातिमतामवश्यैकघटत्वप
टत्वघटितताद्दशताद्दशकूटाधिकरणतयाजातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापितादृशतयाव्याप्तिदुर्वा
रत्वादितिकिंअत्रसाध्याभाववत्तायांसंबंधविशेषानिवेशेकालपरिमाणवान्मेयत्वादित्यादावतिव्याप्तिः कालेन
स्यापिकालिकसंबंधेनकालपरिमाणाभावाधिकरणतयाजगतएवसाध्याभावकूटत्वात्देशिकविशेष व

णतासंबंधनिवेशेचघटत्वाभावचान्यटत्वादित्यादावव्याप्तिः घटत्वादेस्तेनसंबंधेनावृत्तेः तेनसंबंधेनतद्वृत्तिता
दाधिकरण्यप्रसिद्धेः तेनसंबंधेनवृत्तिमत्तस्याभावविशेषणत्वेचघटत्वाभावसाध्यकेव्यभिचारिण्यधिकरणध
र्मावच्छिन्नाभावमादायातिव्याप्तिः कालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभावाभावेसाध्येआमत्वादिहे
व तावव्याप्तिश्च घटातिरिक्तवस्तुमात्रस्यैदंशिकविशेषणतयासाध्याभावकूटत्वात् साध्यनिरूपितप्रतियोगितावच्
छेदकसंबंधनिवेशएवदोषः किंचिद्विशिष्टतादृशसाध्यस्याभावस्तस्यैदंशिकविशेषणतासंबंधावच्छि
न्नाभावस्तद्रूपइतिदैशिकविशेषणतायाअपिनिरुक्तसाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधत्वात्। स्वनिष्ठ
तादृशप्रतियोगितावच्छेदकसंबंधेनस्वाधिकरणत्वनिवेशश्चव्यधिकरणधर्मावच्छिन्नाभावस्यसाध्याप्रतियोगि
तयातदसंग्रहप्रसंगइति साध्यतावच्छेदकसंबंधेनप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानंप्रतियसंब
धावगाहियदभाववत्ताज्ञानंप्रतिबंधकंतेनसंबंधेनतदभावाधिकरणत्वंविवक्षणीयंव्यधिकरणधर्मावच्छि
न्नाभाववत्ताबुद्धिरपिव्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिंप्रतिबध्नातीतितादृशभावस्यलक्षण

घटकत्वनिर्वाहः यदि चाभाववत्ताज्ञानं प्रतिदेशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकंज्ञा
नंप्रतिबंधकं अभावाभावस्यातिरिक्ततामतेतादृशज्ञानप्रतिबंधकतायाआवश्यकत्वात् तस्यप्रतियोगित्वरूप
तामतेपिफलसाम्यानुरोधेनतदावश्यकत्वात्। अभावाभावस्यातिरिक्तताग्रहदशायांतत्प्रतिबंधकतायादुरपन्हे
वत्वाच्चएवंचकालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभावज्ञानंवादेरभावेसाध्येआत्मत्वज्ञानित्वादावव्या
प्तिर्दुर्वारिवदेशिकविशेषणतासंबंधस्यापिनिरुक्तरूपात्क्रांतत्वात्। नचैवंतादृशसाध्यवत्त्वेपिपक्षेतादृशसाध्या
भावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबंधकज्ञानसंभवात्। तद्दृष्टस्यदृष्टाभासतापत्तिरितिवाच्यं। तन्मतपक्षेसा
ध्यंनास्तीतिज्ञानस्यभ्रमत्वेनिर्विवादमितितदुपपादनायतादृशसाध्यप्रतियोगिनःतादृशसाध्याभावत्वंतदै
शिकविशेषणतयादृश्यनभ्युपगम्यतादिरुच्यते। तदानिरुक्तसंबंधेनसाध्याभावत्वावच्छिन्नाधिकरणताकूटत्व
मेवविवक्षणीयंहेतुमतितादृशाधिकरणताविरहान्नोक्तव्याप्तिः। ननुघटत्वादेरपिदेशिकविशेषणतास्वी
कारआवश्यकः अन्यथाघटेनघटत्वाभाववद्भूतलादिनभ्रुलूखप्रतीतिव्यवहारयोरनुपपत्तिःकालेनद्रव्यत्व

मिसादिप्रयोगाभावादेशिकविशेषणतासंसर्गावच्छिन्नाधेयतान्वितस्वार्थावगाहिबोधजनकत्वस्येवनभूपदेष्वु
त्पन्नत्वात्।नचभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनभादेशिकविशेषणता अभावरूपप्रतियोगिवा
चकपदसमभिव्याहृतनभाचप्रतियोगिभूताभावप्रतियोगितावच्छेदकसंबंधः प्रत्याय्यतदृत्तिव्युत्पत्तिरितिवा
च्यंप्रतियोगितावच्छेदकसंबंधत्वेनसंबंधताविरहात्।विशिष्यसमवायकालिकसंबंधभानस्यैवापगंतव्यत
याप्रतियोगिन्यभावसंबंधविशेषावच्छिन्नप्रतियोगितात्वबोधकादयमभावोनास्तीत्यादितःसंबंधविशेषा
वच्छिन्नाधेयतायाप्रतीतेतोनियामकाभावात्।समभिव्याहारविशेषनिरपेक्षस्यतात्पर्यस्यनियामकत्वेकालिका
दिसंबंधावच्छिन्नप्रतियोगितात्वाभावस्यासत्त्वापत्तावत्तस्यसमवायादिसंसर्गतात्पर्यग्राह्यनि
अयमभावोनास्तीतिप्रत्ययप्रसंगात्।वास्तवतसंबंधावच्छिन्नप्रतियोगितात्वाभावरूपप्रतियोगिवाचकप
दसमभिव्याहारस्यतत्तत्संबंधभाननियामकत्वेवस्तुतःकालिकसंबंधावच्छिन्नप्रतियोगितात्वेसिन्नभावेका
लिकसंबंधावच्छिन्नप्रतियोगित्वसंशयदशायामन्यायप्रभावोनास्तीत्यादिवाक्यादधिकरणेएतद्भावाभा

ता

वप्रतीतावपिअधिकरणकालिकसंबंधेनतदभावाभाववत्वादिसंशयस्यसर्वानुभवसिद्धस्योच्छेदापत्तेःअ
थैवंकालादावपिकालिकसंबंधावच्छिन्नघटत्वाभावोनास्तीतिप्रतीत्यनुरोधेनघटत्वादर्दैशिकविशेषणतास्वी
कारस्यावश्यकतयातत्समवायावच्छिन्नघटत्वाभावोनास्तीतिव्यवहारापत्तिरितिचेन्न।प्रतियोगिमतितद
भावत्वेनहेत्तेरनभ्युपगमात्। इत्थंचदैशिकविशेषणतासंबंधेनसाध्याभावत्वावच्छिन्नवत्वंलक्षणेनिवेशनी
यंकालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववानात्मत्वादित्यादौघटत्वाभावस्यतादृशसाध्याभा
वत्वेनासत्यपहेत्तेर्नाव्याप्तिः एतेनयादृशसाध्यकस्थलेसाध्याधिकरणसाध्याभावस्यतदधिकरणंचसाध्यस्य
नभ्रमःप्रसिद्धःतत्रप्रतिबध्यप्रतिबंधकभावकल्पनासंभवेनप्रतिबंधकतापटितलक्षणेऽव्याप्तिरितिनिर
स्तमितिवदंतितदुभयेतिद्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगितायाअपितदुभयत्वसमनियत त
यातादृशाभाववत्तागुणादेरवनिरुक्तसाध्याभावकूटाधिकरणत्वादितिभावःप्रतियोगिवैय्यधिकरण्या
घटितस्यव्यापकत्वस्यसाध्यतावच्छेदकविशेषणत्वमुपगम्यतदुभयत्ववतिप्रत्येकमुभयत्वाभावसत्वेनतस्य

त्वसंयोगादिसत्वादा भुवादेरुक्तसाध्यव्यभिचारितागुणसामान्याभावस्यसाध्यत्वेवायवीयस्यश्वादिरपिसाध्याभावः कूट०
तद्घटितनिरुक्ताभावकूटवद्वृत्तित्वाभावस्ययावदंतर्गतस्यवायुत्वादेरभावाच्चातिव्याप्तिसंभवइतिपृथिवीवृत्तीतिच
टॅवायुट्विवपटवायुट्विवादिरूपपृथिवीवृत्तिगुणभावाभावनांयावतामेकाधिकरण्यसंभवेनतद्घटितकूटस्यापि
लक्षणघटकतयातद्वृत्तिरयंहेतुर्वर्त्सानातिव्याप्तिसंभवः।नच्चट्विवादिरूपसाध्याभावस्यउत्पत्तिकालेऽसत्वेन
कालिकाव्याप्यवृत्तितयाव्याप्यवृत्तित्वविशेषणेनतव्यावृत्तिःपार्थिवपरमाण्वेकत्वादिरवलक्षणघटकइतति
व्याप्तिर्दुर्वारेवेतिवाच्यं। प्राचीनमते ट्विवादिमतितत्प्रागभावकालावच्छेदेनतदसंताभावात्सत्वात्ट्विवादिरपिव्या
प्यवृत्तित्वादितिपृथिवीपदमेतत्परंइदंपदपृथिवीपदयोःकर्मधारयोवाऽभिप्रेतः।नच्चसमानाधिक
रणाभावाप्रतियोगित्वमनवच्छिन्नवृत्तिकत्वंवाव्याप्यवृत्तित्वंननुस्वसमानाधिकरणात्यंताभावाप्रतियोगित्वं
तच्चनट्विवादिसाधारणमितिपृथिवीपदस्यपृथिवीसामान्यपरत्वेपिनक्षतिरितिवाच्यं। एतदतिव्याप्तिवारण
नुरोधेनायंताभावघटितव्याप्यवृत्तित्वस्यैवनिवेशयितुमुचितत्वात्। एतद्रूपात्यंताभाववानूमेयत्वादित्यादा

वेत द्रूपाभकाभावस्यलक्षणघटकत्वेनातिव्याप्यापत्तेः। प्राचीनमतेसंतानावघटितव्याप्यवृत्तित्वनिवेशस्याव
श्यकत्वाच्च अतएवाग्रतनेरूपादिघटितत्वेनेयमिसाधुसंगच्छतेपार्थिवरूपमात्रस्येवानित्यतयासंताभावाघ
टितव्याप्यवृत्तित्वनिवेशेतस्यव्याप्यवृत्तित्वाभावेनतदसंगत्यापत्तेः। पृथिवीवृत्तीत्यत्रवृत्तिःसमवायेनबोध्या
तेनवायवीयस्पर्शेःकालिकसंबंधेनपृथिवीवृत्तित्वेपिनक्षतिः पृथिवीसमवेतत्वावच्छिन्नाभावोगुरुधर्मस्य
प्रतियोगितानवच्छेदकत्वेप्रसिद्धः पृथिवीसमवेतत्वावच्छिन्नत्वेनाभिमतायांप्रतियोगितायांकेवलसमवेतत्व
स्येवावच्छेदकत्वसंभवेन पृथिवीसमवेतत्वस्याभावप्रतियोगितानवच्छेदकत्वात्तत्रापृथिवीसमवेतत्वाव
च्छिन्नायाजलत्वादिव्यावृत्तप्रतियोगितायाअतिप्रसक्तेःसमवेतत्वेनावच्छेदकसंभवइतिवाच्यं। समवेतत्वा
वच्छिन्नप्रतियोगितातोअतिरिक्तायाजलत्वादिव्यावृत्तप्रतियोगितायाअप्रसिद्धेः। गुरुधर्मस्याभावप्रति
योगितावच्छेदकत्वेपि पृथिवीसमवेतत्वावच्छिन्नाभावसाध्यकेनातिव्याप्तिसंभवः तादृशाभावस्यसमवेतत्वा
वच्छिन्नाभावसमनियतत्वात्तदभिन्नत्वेनसमवेतमानंप्रतितदभावतयावायुत्वादेरवितथात्वात्तत्रवर

थिवीसमवेतत्वविशिष्टाभाववृत्तिजलादेःसमवेतत्वावच्छिन्नाभावविरहान्नतयोःसमनैयत्यं। एवंचगुरुधर्म
स्याभावप्रतियोगितानवच्छेदकत्वेपिपृथिवीसमवेतत्वस्यतादृशविशिष्टाभावप्रतियोगितावच्छेदकत्वाभावस्य
कंसमवेतत्वविशिष्टवृत्तिजलादौनतत्त्वेनतन्मात्रस्यतत्प्रतियोगितावच्छेदकत्वासंभवादितिवाच्यंविशिष्टाभा
वस्यसाध्यत्वेतस्यवायुसाधारणतयासक्षेतुत्वप्रसंगेनपृथिवीसमवेतत्वोपलक्षितभावस्यैवसाध्यतायाउपगं
तव्यत्वादितिगुरुपदोपादानंपृथिवीसमवेतगुरुत्वावच्छिन्नाभावागुरुत्वादिसाधारणत्वान्नसमवेतत्वावच्छिन्ना
भावसमनियतइतिनात्रदोषावसरःध्वंसप्रागभावावच्छिन्नेसामान्याभावमुपगच्छतांवाग्यादेरप्युत्पत्तिकाला
वच्छेदेनपृथिवीवृत्तिगुरुसामान्याभाववत्वात्तत्साध्यकेवायुत्वादिःसाधेतुरवश्यतानातिव्याप्तिसंभवइत्यतःसा
ध्यांतरमाहसत्तान्यत्वेति। सत्तान्यत्वनिवेशेनप्रयोजनंपूर्ववत्। वायुत्वादरपिसत्तान्यसमवेताभावाभावत्वात्। पृ
थिवीतिअत्रपृथिवीपदंपृथिवीसामान्यपरमेवघटवायुद्वित्वादेःस्वसमानाधिकरणसंतानाभावप्रतियोगित्वे
नव्याप्यवृत्तित्वविशेषणव्यावृत्तत्वात्। रूपादिघटितत्वेनेयत्नरूपपदोपादानंप्राचीनमताभिप्रायेणोपन्यस्तं

पूर्वसाध्यमभिप्रेत्यहेतोसाध्यसामानाधिकरण्यविशेषण नवायुवृत्तिव्याप्तिरतो द्वितीयहेतनुसरणंननुसमनि
यताभावेक्यमस्तसन्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावस्यसन्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नतयौवायु
नादृश त्वादिरपितदभावइतिनैतादृशभावसाध्यकेतिव्याप्तिः संभवतीति पूर्वोक्तरूपाभाववान्वायुत्वादिसन्नाव्याप्तेर
वोक्तविवक्षायांदुर्वारतामाह। वस्तुतइतिअन्नायमाशयः यावतामेकाधिकरणंतावत्समुदायाधिकरणमियस्य
यत्किंचिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वंयत्किंचिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयत्वके
वपर्यवसितमर्थः साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिकरणत्वंसाध्याभावसमानाधिकर
णसाध्याभावत्वव्यापकाधेयतावत्वपर्यवसितंवा आद्यव्यभिचारिमानेतिव्याप्तिः जगत्तावत्साध्यवद्यत्किंचिद
धिकरणवृत्तिसकलसाध्याभाववत्वादिसमुदायोपादानस्याकिंचित्करतयातद्विवक्षासंभवः द्वितीयेचसाध्या
भावसमानाधिकरणसाध्याभावत्वमुक्तस्थलेनिरवच्छिन्नरूपाणामेवाक्षतमितितादृशसाध्याभावत्वव्यापिका
नेकेनाप्यधिकरणेननिरूपिताधेयतेतितादृशाधिकरणप्रसिद्धिस्तदवस्थेवेति। ननुस्ववृत्तिसाध्याभावत्व

११ व्यापकंयद्यदधिकरणवृत्तिंतत्तदधिकरणवृत्तिसाध्याभावत्व ११

व्यापकस्ववृत्तिताकाधिकरणमेवाधिकरणंतार्थः धूमवान्वह्नेरितादौमहानसादिर्नतथा अयोगोलकवृत्तिता
यास्तद्वृत्तिसाध्याभावत्वव्यापकत्वात् अयोगोलकादिवृत्तिसाध्याभावस्तस्यचसमानाधिकरणधर्मावच्छिन्नसाध्या
भावसाधारणतयातद्वृत्तित्वाप्राप्त्यादियोगोलकाद्यवृतादृशंस्वमितिनातिव्याप्तिः तादृशंयत्किंचिदधिकरण
ह्रदादिवृत्तित्वाभावस्यवह्न्यादौसत्वेपिनक्षतिः तादृशंयद्यत्स्वतावदत्यंतमवृत्तित्वंतस्मिन्नियतप्रतियोगिताका त्व
भावस्यनिवेशगतअत्यंतमत्वंचतत्तदवृत्तिरित्यत्रतुतत्तदन्यान्यत्वं अतानेकवलान्वयिसाध्यकप्रसिद्धिरिति
तादृशंस्वंयद्यत्तत्तदधिकरणवृत्तित्वाभावकूटवत्वनिवेशपिकवलान्वयिसाध्यकहेतुभतापितथात्वादितिनदु
पेक्षितंरूपसामान्याभाववान्वायुत्वादित्यादौचसकलरूपवतामेकतथात्वंस्ववृत्तितायाएवतत्तद्व्यादिवृत्तिसा
ध्याभावत्वव्यापकत्वादतानाव्याप्तिः अथवास्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वावलंदेन
यद्यधिकरणवृत्तित्वंतादृग्धिकरणवृत्तिसकलसाध्याभाववत्वमेवयावतामित्यादेरर्थः। धूमवान्वह्नेरित्या
दौचयदधिकरणंनसाध्यवत्तत्तद्वृत्तिसकलसाध्याभावसमानाधिकरणंयसाध्यतावच्छेदकावच्छिन्नसाध्याभाव

यदिचतादृशयात्किंसकलसाध्याभाववत्वमेवयावतामित्यादेरर्थइतिपाठः एकविपक्षकस्थलपूर्वपाठेयद्यदर्थाप्रसिध्यापीप्सासाम्यमपेक्ष्यायं
+चिदधिकरणवृत्ति+ पाठस्सम्यक्तदाशेषंपूर्ववदितिपाठोनास्तीत्यवधेयं

स्यतद्वृत्तित्वाभावात्किंतु अयोगोलकाद्यवृत्तिजगतोतथात्वात्।नातिव्याप्तिः रूपाभाववान्वायुत्वादित्यादौचतादृशाधिकरणंतद्वृदादिरवयधिकरणधर्मावछिन्नसाध्याभावस्येवतद्वृत्तिसकलसाध्याभावसमानाधिकरणत्वात् तस्यचतद्वृत्तित्वनियमादितिनाव्याप्यवसरःशेषंपूर्ववत्।अथवाव्यासज्यवृत्तिसाध्याभावमान्नवृत्तिधर्मावछिन्नाधिकरणमवसाध्याभावकूटाधिकरणंजगतएवसाध्याभावत्वावछिन्नाधिकरणतयाव्यभिचारिण्यतिव्याप्तिवारणायव्यासज्यवृत्तित्वंधर्मविशेषणंतथासत्यपिजगतएवव्यधिकरणधर्मावछिन्नसाध्याभावमान्नवृत्तित्तित्थाविधधर्मावछिन्नाधिकरणत्वात्सएवदोषइतिअंधयतावछेदकतादृशधर्मन्यूनवृत्तिसत्तव्याप्यंयद्यत्तदन्यत्वनधर्मविशेषणीयःउक्तस्थलतद्रूपव्यधिकरणधर्मावछिन्नसाध्याभावाभयत्वादिरक्तादृशधर्मस्तस्यरूपांतरसाधारणनित्वादित्यनवृत्तित्वेपितादृशनित्वाद्यवछिन्नस्यसाध्याभावोक्वचिदप्यवृत्तेःतस्याधयतानवछेदकतयाधेयतावछेदकीभूततादृशधर्मन्यूनवृत्तित्वाविरहात्।नचसमनियताभावेवेपव्यधिकरणधर्मावछिन्नसाध्याभावमान्नवृत्तित्वासज्यवृत्तिधर्मप्रसिध्यादवन्नात्वयिसाध्यकव्यासिरितिवाच्यं।तथास

नित्यासज्यवृत्तित्वस्थले व्यासज्यवृत्तिधर्मभिन्नत्वस्यनिवेशनीयत्वात्केवलान्वयिसाध्यकेसाध्याभाववत्ये कूट०
वतथात्वादित्यतोदोषांतरदानायहेतौहेतुतावच्छेदकसंबंधंनिवेशयतिकिंचेतिधूमादावव्याप्तिरितिवह्निमन्मा
त्रसमवेतघटादौवर्तमानस्यनिर्वह्निसमवेतत्वाभावस्यतन्नास्त्वादितिभावः एतच्चयत्किंचित्संबंधावच्छिन्नता
दृशवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशगर्भप्रायेण अन्यथानिर्वह्निसंयुक्तत्वादिसाधारणतादृ
शवृत्तित्वंप्रतितथाविधाभावप्रतियोगितायाअव्यापकत्वात्तस्यलक्षणघटकतयावृत्तिमन्मात्रस्यैवसा
ध्याभावाधिकरणकालादौहेत्तेर्निर्वह्निवृत्तित्वसामान्याभावस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव
वृत्तिमद्वृत्तित्वादव्याप्यसंगतेः अतएवसंबंधमनिवेश्यतादृशाधिकरणवृत्तित्वसमनियतप्रतियोगिताकाभा
वनिवेशपक्षेदूषणांतरमाह।साध्यतावच्छेदकसंबंधेनेतिएतच्चकालिकसंबंधावच्छिन्नप्रतियोगिताकसाध्या
यथा भावस्यकालादावसत्वेपितस्यैवविवक्षितसाध्याभावसमुदायवत्वमक्षतमेवेतिसूचनायकालादावित्यादि
पदादूषयितादिसंबंधेनवस्तुमात्रसंबंधिनईश्वरज्ञानादेःपरिग्रहः।व्यभिचारिणीतियत्साध्यकवृत्तिमत्वा

त्राधिकरणस्यकालादेर्विवक्षितसाध्याभावकूटवत्तादृग्व्यभिचारिहेतावित्यर्थः।द्रव्यत्वसाधनकद्रव्यत्वपृथिवीत्वा
न्यतराभावश्चद्रव्यत्वाभावयोर्वायुत्वादिहेतुकृपाद्यात्मकसाध्याभावस्यसत्वादिसाध्यकसंयोगेनसमवायेनवा
